॥ श्रीः ॥

सूत्रानुगुण्यसिद्धिविमर्शः ॥

ब्रह्मविदांश्रेरेणुना

गोपालाचार्येण

विरचितः ।

Sutranugunyasiddhivimarsa.

BY

A. V. Gopalachariyar M.A. B.L.,

Advocate

TRICHINOPOLY.

PRINTED AT

THE "SRINIVASA PRESS"

KARUGUDI

TIRUVADI.

1931.

मूल्यम्] [एकरूप्यम्

PUBLISHERS' NOTE.

———:o:———

The attention of the Sabha having been drawn to the "Sutranugunyasiddhi" from the pen of Brahma Sri Karungulam Krishna Sastriar, the Sabha invited the writing of a reply to that work. The first Pada of the book written in reply by Mr. A. V. Gopalachariar, under the supervision of great Swamis, is now published; the remaining parts of the reply will be published in convenient instalments. Replies have also been written by Brahma Sri Thathachariar Swami of Kumbakonam and Devanadachar Swami of Navalpakkam. With the help of the generous Sri Vaishnava Public, the Sabha hopes to be able to complete the publication not only of this book but the other replies also.

The Visishtadvaita Sabha,
Kumbakonam.

PREFACE.

This book is a reply to the 'Sutranugunya Siddhi' of Brama Sri Karungulam Krishna Sastriar purporting to be a refutation of the Sri Bhashya of Sri Ramanuja and its gloss Srutaprakasika and a vindication of Sri Sankara's Sutrabhashya. The question at issue is which of the two Bhashyas is in consonance with the express words of the Sutras concise as they are.

The Srutaprakasika and the Chandrika examine the text of the Sutras exhaustively and with great critical acumen and pronounce in favour of the Visishtadvaita or Dvaita interpretation the authors espouse. Brahma Sri Krishna Sastriar's book is an attempt to demonstrate the faithfulness of the Advaita Bhashya to the text of the Sutras.

We have read a great deal of controversial Vedantic literature— in fact it has been our life-study —and we are sorry to be constrained to say that the book under reply is the most obscurely written Sanskrit book we have ever come across. Obscure writing is not the only feature characteristic of the book. It teems with not only gross misrepresentations of the Sri-Bhashya but also with inexcusable heresies against the traditional interpretations of the Sri Sankara school which betray an amazing lack of remembrance or knowledge of the Sutra literature of that school. In many places Mr. Sastriar in-

dulges in scurrilous and bitter attacks on Sri Ramanuja and Sri Sudarsana, couched in vile and foul language, even where the methods of interpretation of the two schools are in perfect accord. References to Sri Ramanuja or Sri Bhashya as 'the cursed Tantrika', 'a mosquito' 'an unchaste harlot', 'an author who undeservedly and shamelessly continues to live in the memory of men' are quite common in the book. It is amusing to note that where the attacks are most bitter and foul, the abuses recoil on the Advaitic interpretations also, the methods of interpretation in those cases being identical. Mr. Sastriar often attracts to himself the proverbial words of Sri Vedanta Desika 'a controversialist who slings up mud at an opponent's position pure and spotless as the sky, not only fails to hit or besmear the sky but invites the mud to be let down profusely over his own head". If in this book the language of retort is here and there resorted to, it is done merely to show that weak and forceless satirical thrusts are easily warded off and made to hit back.

The fairest statement of the opponent's case with the clearest understanding thereof has always been characteristic of Sanskrit controversialists of all schools. Mr. Sastriar's book is a sad exception to that rule. The extremely obscure character of the writing makes us wonder if the book has been read by any Sanskrit scholar

of any school and found to be anything like clear.

This part covers the first Pada of the first Adhyaya of the Brahma Sutras. We have endeavoured to deal with Mr. Sastriar's arguments as far as we could understand them. We have endeavoured to show by profuse quotations from the Advaita Sutra literature how far the two schools agree and how Mr. Sastriar in his anxiety to hit Sri Ramanuja is hitting his own school consciously or unconsciously.

The two Mimamsas Purva and Uttara are, as the very names indicate, *one* course of study, viz., the science of interpretation of the Vedic texts. The Purva Mimamsa deals with the first part of the Veda; the Uttara deals with the last part. The framers of the Sutras were great Vedic professors who had a large following of devoted pupils eager to absorb all the Vedic knowledge coming from their Gurus' honeyed lips. The study of the six Angas of the Veda had to be carried on side by side with learning of the Vedas by rote; and the Vedic student, who had a smattering of the apparent meaning of the Vedas he learnt to recite, was naturally curious to know their decided meaning and the rules of interpretation by which he could arrive at the true meaning. The two teachers systematised the rules of interpretation, the reasons pro and con and decisions in a terse and aphoristic form for the benefit of their immediate pupils and

of posterity.

After the Vedas and the Angas had been learnt, the Dharma Mimamsa was commenced by Acharya Jaimini with the aphorism, 'Then therefore, an inquiry into Dharma.' The word 'then' in that Sutra is admitted by all to refer to the learning of the Vedas and their Angas which had gone before. The word 'therefore' means, 'as the Vedas must convey a useful meaning'. When the Mimamsa dealing with the Karma Kanda, the first part of the Veda, had been reduced to a system, Acharya Badarayana pursued the Mimamsa by taking up the Vedanta for investigation. He took up the Mimamsa from where it was left and began his further inquiry with the Sutra, 'Then therefore, an inquiry into (or a desire to know) Brahman.' The Vedanta Sutras necessarily pre-suppose a knowledge of Jaimini's Sutras to which they expressly refer. There could be no doubt as to the order in which the two Mimamsas were compiled by the two teachers and intended by them to be taken up by the students. Regard must be had to the conditions prevailing at the time of the framing of the Sutras to understand their meaning. The Vedic student had no lack of leisure or industry and he had an unquenchable thirst for Vedic knowledge. The two Mimamsas were counted as one Vidyasthana (branch of study) by Vyasa in the Mahabharata. The word 'then' in the

first Sutra of Badarayana would naturally refer to the study of the earlier part of the Mimamsa, which must have gone before.

Stress was laid on the virtue of Sacrificial acts by Jaimini. In laying stress on mandatory precepts enjoining the perfomance of acts, his Sutras gave a very subordinate place to words denoting Dravya and Devata which are known as Siddha (objects pre-existing) as distinguished from Sadhya (acts to be done hereafter.) The subordination was carried to such an extreme that some interpreters of Jaimini, the Prabhakaras, proclaimed that words purporting to connote Siddha objects—in which category the Brahman must come—could not convey the intended object independently and by themselves except as subservient and auxiliary to some action enjoined by the text. When after the completion of Jaimini's Sutras, Acharya Badarayana set about the framing of his Vedanta Sutras, the final part of the Mimamsa Sutras, he would have thought it his first duty to dispel any wrong notions in regard to the power of the words denoting Siddha objects to connote them independently of their connection with any action. Professor Sayce in his Philology points out that a divergence exists among the Philologists as to the power of words denoting objects to convey the objects independently of and except in relation to some action. Mr. Cowell points out in the Mimamsa Darsana

that the divergence between Modern Professors on this question existed in times of old between the Bhatta and the Prabhakara schools of Mimamsa. In the Sankara Bhashya, this very question is the topic of discussion in the 4th Sutra. The Sudha of the Dvaita school discusses this in the first Sutra itself. This question is considered by all the Bhashyakaras to be a necessary question to be raised and decided in the opening part of the Brahma Mimamsa. Sri Sankara in his Bhashya on the first Sutra dwells at length on the distinction between the earlier and the later Mimamsa as dealing with Sadhya and Siddha. To justify an inquiry about Brahman with the aid of Vedanta texts, the power of the word Brahman to connote the 'Infinite' independently and by itself should first be established. The Sri Bhashya considers this to be the topic of the discussion in the first Sutra instead of in the 4th Sutra. Sri Sankara expressly states in the first Sutra itself that the Vyutpatti of the word Brahman which means 'Great' gives the student a first impression of Brahman and makes him curious to know it more definitely and fully. Without a first impression, no desire to attain a definite knowledge by inquiry is possible.

The author of the Brahma Mimamsa Sutras, commencing his work after the completion of Jaimini's Sutras, would naturally intend the first word 'then' in his first Sutra to refer to the

Mimamsa which had gone before.

The first four Sutras have a common purpose, namely, the justification for a science of inquiry into Brahman with the aid of the Vedantic texts. The objections to such an inquiry are four-fold and are answered in the four Sutras. The first objection is to the connoting power of the word Brahman. A declaration of the commencement of a Mimamsa into Brahman necessarily carries with it an emphatic assertion of the connoting power of the word 'Brahman'. The inquiry declared to be commenced cannot be purely a rationalistic inquiry. It can be only an enquiry with the aid of the Sabda Brahma, the Vedanta. The word Brahman in the first Sutra may, by the rule of Ekasesha, refer both to the Sabda Brahman (the Pramana) and to the Brahman (the Prameya). All the Bhashyakaras agree that the first Sutra expressly declares the commencement of an examination of the texts of the Upanishads to attain a knowledge of Brahman. The Sutra is obviously intended to refer to the Taittiriya text expressly laying down Brahmajignasa. This is clear from the Sankara Bhashya. Mr. Sastriar forgets this and in all seriousness advances the argument that a discussion as to the connoting power of a class of 'Sabdas' is irrelevant here as the proposed inquiry may not be one with the aid of 'Sabda' and may be an inquiry based purely on reason. The question

of the definition of Brahman is the topic of the Second Sutra. The Brahma Jignasa Vidhi in the Taittiriyopanishad which is intended to be referred to by the word Bramajignasa in the first Sutra contains a definition of Brahman. The validity of the definition contained therein is declared in the second Sutra by adopting it as the definition of Brahman. In declaring the validity of that definition, the question of the possibility of defining Brahman, the subject of enquiry, is decided by implication. The Taittirya definition is taken as an illustration of a definition and is objected to by the opponent and adopted by the Siddhantin. This method of interpretation of the Sutra is common to both the Schools. The words of the Sutra make it quite clear that the definition under examination is that contained by the Taittirya text referred to in the first Sutra. The word 'whence' in that Sutra which is taken from that text and the word 'etc.' after 'Janma' put this beyond doubt. Mr. Sastriar contemptuously calls the Sri Bhashya as a 'Kulata' for following the traditional method of discussion of the second Sutra and wrongly fancies that the Bhamathi supports him forgetting that the Kalpatharu and the Parimala demolish his argument. The first Adhyaya justifies the validity of this definition by proving by an examination of the Vedanta texts that Brahman is the source of all being, and that Brahman *alone is* such source. The second

Adhyaya raises and disposes of objections to the Vedanta Vada which affirms Brahman to be the ultimate cause. The Taittiriya definition also affirms that Brahman is the ultimate goal to be attained. The third and fourth Adhyayas deal with the way (sadhana) to attain the goal and the nature of the goal. The Sastra winds up by emphasising the distinction between the Mukta (freed soul) and the Brahman he has attained. Is the Mukta the same as the Brahman he reaches? If so, he must also be the Creator, and the definition of Brahman at the outset as the creator would be too wide (Ativyapta) as it would include the Mukta Jiva. To free the definition of Brahman from the reproach of being too broad, the Sutrakara emphasises that the Samya (sameness or equality) of the liberated soul with Brahman is a sameness of bliss only (Bhogamatra) and not of the functions, creation etc. of the universe (Jagadvyapara). The opening of the Sastra with defining Brahman as the creator, sustainer and final goal of all being and the winding up of the Sastra with an emphatic declaration that the Mukta has only a sameness of bliss, but no sameness of the creative and governing functions of Brahman do appear to favour the interpretation of the Brahman under inquiry in the Sastra as the Saguna Brahman. The sameness of the opening (Upakrama) and the peroration (Upasamhara) is an unmistakable index of the author's

purpose. The first two Sutras deal with objections to the commencement of a Vedantic Mimamsa arising from the nature of Brahman, the object-matter of the inquiry. It is Siddha and not Sadhya and cannot therefore be independently connoted by words. It cannot be defined. The two other objections arise from the nature of the Pramana relied on in proof of Brahman. If Brahman, such as is meant in this Sastra, can be known by other proofs, the Sastra can have no authority, as its authority is exclusively confined to what cannot be proved by other proofs. The Sastra must throw light on matters otherwise unknown and unproved. This objection is dealt with in the third Sutra and it is declared that Sastra alone can give the knowledge of Brahman as understood by the Vedantin and that a science of the inquiry of Brahman with the aid of the Sastra is necessary. Apurvatva (otherwise-unprovability) and Saphalatva (utility) are necessary conditions to give force to the Sastra. Utility is affirmed by the 4th Sutra which states that knowledge and realisation of the Brahman, blissful in its nature, is itself the highest bliss. It is common ground between both the schools, that the first Pada has for its purpose what is known as the Ayoga-Vyavachcheda i. e., the demonstration of the applicability of the defenition as the ultimate cause to Brahman. This

will be clear from the opening of the 4th Pada of the Bhamathi and Kalpataru. Forgetting this, Mr. Sastriar frequently taunts the Sri Bhashya for adopting this as the purpose of the first Pada. The language of the Sankara Bhashya in the Ikshatyadhikarana is perversely and cruelly distorted by Mr. Sastriar quite contrary to the Bhamathi and the Kalpatharu merely for the pleasure of delivering attacks on Sri Ramanuja's interpretation.

Sri Sankara in his Bhashya on the Anandamaya Adhikarana frankly indicates that the language of the Sutras and tceir traditional interpretation are against his own interpretation of the text under inquiry and that the Sutras must be much strained to fit in with his Puchchavada. He does not even attempt to explain all the Sutrasa of the Adhikarana on the basis of the Puchchvada, bscause he is sure that the natural meaning of the Sutras is against his view. The Bhamati and the Kalpataru admit in the clearest terms the direct aud irreconcilable conflict between the Sutrakara's interpretation of the Vedic texts and Sri Sankara's interpretation and say that the former must be discarded as being opposed to the clear meaning of the Vedic text. To attempt to cruelly strain and distort the clear words of the Sutras as the Nyayarakshamani does, cannot commend itself to any Sanskrit scholar? Badara-

yana himself admittedly declares in the Anandadyadhikarana of the third Pada of the third chapter that the Anandamaya is no other than Brahman and that the attributes of the Anandamaya are the attributes of Brahman. That is the last word on the mind of the Sutrakara as regards the identity of Anandamaya and Brahman. Mr. Sastriar has hopelessly misunderstood the Sri Bhashya interpretation of the Adhikarana and developed baseless attacks upon supposed interpretations coined by his own imagination.

We have endeavoured in this book to state correctly the interpretations of the two schools with citations from books of authority and to answer the arguments of Mr. Sastriar. We would invite a perusal of the two books side by side.

I should be failing in my duty if I did not acknowledge my indebtedness to the great Swamis Mahamahopadyaya Kapisthalam Desikacharya Swami and Goshtipuram Saumyanarayanachariyar Swami for their invaluable help rendered to me by looking through the manuscripts and revising and improving them completely and by helping me to make some sense out of Mr. Sastriar's book.

THE AUTHOR.

शुद्धिपत्रिका ॥

पृष्ठ.	पंक्ति	अशुद्धम्	शुद्धम्
४	६	असमदायैः	असमदीयैः
५	५	संमतम् । तस्याः	संमतं तस्याः
१९	२०	लह्म	ब्रह्म
५६	२०	इयं पंक्तिः सर्वा परित्यक्तव्या ।	
९४	२	तन्यः	तन्मयः
९५	२३	अशेषं	अवशेषं

सूत्रानुगुण्यसिद्धिविमर्शः ।

॥ श्रीः ॥

जिज्ञासाधिकरणम् ॥

प्रणामं लक्ष्मणमुनिः प्रतिगृह्णातु मामकम् ।
प्रसाधयति यत्सूक्तिः स्वाधीनपतिकां श्रुतिम् ॥

श्रुतिस्मृतीः, सूत्राक्षराणि; भवदीयग्रन्थोक्तीः, भवदुक्तीरसत्पूर्वोक्तीः; स्वरसयुक्तीश्चावलम्ब्य भवदुक्तं प्रतिवदामः। भवदुक्तीनां प्रसादविधुरत्वादनेकत्र भवदाशयो बोद्धुं न शक्यते। यदि क्वचिद्भवदाशयस्यायथार्थानुवादो भवेन्न सोऽस्मदपराधः ॥

चतुःसूत्री वेदान्तार्थविचारात्मकब्रह्ममीमांसाशास्त्रारम्भसमर्थिका तदुपोद्घातभूता एका पेटिकेति वयम्। चतुःसूत्रीति भाष्यादिषु भवदीयसर्वग्रन्थेषु व्यवहारो दृश्यते। स च तस्या एकपेटिकात्वे सरसः। यद्यपि प्रथमसूत्रमात्रस्य वेदान्तविचारशास्त्रारम्भसमर्थकत्वमुच्यते भवन्मतग्रन्थेषु; तथाऽपि चतुर्णामपि सूत्राणां फलतो ब्रह्ममीमांसाया अनारम्भणीयत्वशङ्कानिरासपरत्वम्; तदारम्भसमर्थनपरत्वं च स्पष्टं तत्रोपपाद्यते। श्रीमत्सदाशिवेन्द्रयतिभिः कृतायां ब्रह्मतत्त्वप्रकाशिकायां द्वितीयसूत्रमवतारितम् 'नन्वित्थं ब्रह्मणस्त्वत्यन्तविचारमुखेन विचार्यत्वमवादि, तदसारम्; लक्ष-

णाभावेन स्वरूपस्यैवासिद्धेरित्याक्षिप्याह जन्माद्यस्य यत इति' इति । तृतीय-सूत्रस्य द्वितीयवर्णके 'अत्र पूर्वपक्षेऽनुमानस्यैव विचार्यत्वसिद्धिः । सिद्धा-न्ते वेदान्तवाक्यानामिति फलभेदः' इति । समन्वयसूत्रे 'फलं तु पूर्वपक्षे मुमुक्षोर्वेदान्तेषु प्रवृत्त्यनुपपत्तिः । सिद्धान्ते प्रवृत्तिसिद्धिरिति द्रष्टव्यम्' इत्युक्तम् । एवमनुगततया सर्वेष्वप्यधिकरणेषु वेदान्तविचारानारम्भणीय-त्वशङ्कोदयतन्निरासयोः, शास्त्रारम्भसमर्थनरूपफलस्य चानुगतिः प्रदर्शिता तैः॥

श्रीमद्ब्रह्मानन्दकृतशास्त्रमुक्तावल्याम् 'लक्षणेनाविज्ञातेऽर्थे न विचार-सम्भवः' इति जन्माद्यधिकरणमवतारितम् । समन्वयाधिकरणान्ते भाषितं भगवत्पादैः "एवं च सति 'अथातो ब्रह्मजिज्ञासा' इति तद्विषयः पृथक्छा-स्त्रारम्भ उपपद्यते" इति । आसमन्वयाधिकरणान्तं वेदान्तविचारशास्त्रा-नारम्भणीयत्वशङ्कानुवृत्तिः ; तन्निरासश्च सूत्रकाराभिप्रेताविति भगवत्पादाश-यः स्पष्टः । ईक्षत्यधिकरणे वेदान्तविचारशास्त्रारम्भमनाक्षिप्य तत्सिद्धिं मत्वा वेदान्तानामचेतनकारणपरत्वं पूर्वपक्ष्यते । तस्याधिकरणस्य ब्रह्मणोऽवा-च्यत्वनिरसनपरत्वं वर्णयित्वा पञ्चानामधिकरणानामध्यायपादपीठत्वमुक्तं श्रीमन्मध्वमते ॥

चतुर्भिरपि सूत्रैः 'यतो वा इमानि भूतानि जायन्ते.... .... तद्विजिज्ञासस्व, तद्ब्रह्मेति' इति ब्रह्मणो जिज्ञास्यत्वोक्तिमच्छ्रुतिवाक्यस्य प्रधानतया परामर्श इति भवदीयग्रन्थेषु दृश्यते । तद्विजिज्ञासस्वेति वाक्यं जिज्ञासाप्रतिज्ञातृप्रथमसूत्रपरामृष्टमिति स्पष्टं सूत्राक्षरेभ्यः । तच्छ्रुताविव सूत्रे ब्रह्मणो जिज्ञासाकर्मत्वमुच्यते । "श्रुत्यनुगमाच्च 'यतो वा—' इत्याद्याः श्रुतयः 'तद्विजिज्ञासस्व, तद्ब्रह्म' इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं द-र्शयन्ति । तच्च कर्मणि षष्ठीपरिग्रहे सूत्रेणानुगतं भवति" इति भगवत्पा-दभाष्यमत्र प्रमाणम् । किं पुनस्तद्वेदान्तवाक्यं यत्सूत्रेणेह लिलक्षयिषि-तम्' इति पृष्ट्वैतद्वाक्यमेवोदाजह्रे जन्माद्यधिकरणान्ते । द्वितीयसूत्रस्य

तच्छ्रुतिपरामर्शकत्वं शास्त्रयोनित्वसूत्रेणोपदिश्यत इति भाषितं शास्त्रयोनित्वाधिकरणे 'शास्त्रमुदाहृतं पूर्वसूत्रे यतो वा इत्यादि—' इति । समन्वयाधिकरणे सर्ववेदान्तवाक्यानां ब्रह्मणि समन्वयः प्रतिज्ञायते । तत्र "तद्ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिविलयकारणं वेदान्तशास्त्रादवगम्यते । सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि 'सदेव सोम्येदमग्र आसीदित्यादीनि—" इति भाषितम् । तत्र 'यतो वा—'इति वाक्यस्यानुपादानेऽपि तस्यैव प्रथमबुद्धिस्थत्वं,प्रथमवाक्ये तदर्थानुवादात् 'इति स्पष्टमुक्तं भामतीकल्पतर्वोः ॥

चतुर्ष्वपि सूत्रेषु ब्रह्मजिज्ञासाप्रवर्तकं श्रुतिवाक्यं प्रथमोपस्थितं सूत्रकृद्बुद्धौ । एवं च बुद्धिस्थश्रुतिबोधितब्रह्मजिज्ञास्यत्वं शङ्काभेदैश्चतुर्ष्वधिकरणेष्वाक्षिप्य समर्थ्यत इत्यवगतिः स्वारसिकी ॥

'व्युत्पत्त्यभावः प्रतिपत्तिदौस्थ्यमन्येन सिद्धत्वमथाफलत्वम्'

इति पूर्वपक्षहेतुचतुष्टयमनारम्भणीयत्वे । व्युत्पत्त्यभावो ब्रह्मपदस्य सिद्धे ब्रह्मणि शक्तिग्रहाभाव इत्यवधेयम् । चतुर्ष्वधिकरणेष्वेष्वन्यतमेनैकैकहेतुना पूर्वपक्षोत्थानमित्युभयसंमतम् । प्रतिपत्तिदौस्थ्यं लक्षणासंभवः । स एव पूर्वपक्षहेतुर्जन्माद्यधिकरणे । अन्येन सिद्धत्वं प्रमाणान्तरप्राप्तत्वम् । 'असन्निकृष्ट'वाचा तज्जिहासितमिति प्रसिद्धम् । मानान्तरसिद्धिनिरासेनापूर्वत्वसमर्थनेन शास्त्रयोनित्वं समर्थ्यते तृतीये । द्वौ हेतू अवशिष्टौ । प्रथमसूत्रे ब्रह्मपदशक्तिग्रहः, समन्वयसूत्रे ब्रह्मवाक्यानां प्रयोजनवत्त्वसमर्थनेन वेदान्तवाक्यानां प्रवृत्तिनिवृत्तिरूपविरहेऽपि ब्रह्मणि तात्पर्यं च समर्थ्यते इति वयम् ॥

सिद्धे ब्रह्मणि शक्तिग्रहाक्षेपः, तत्समर्थनं च समन्वयाधिकरणद्वितीयवर्णके क्रियते भवदीयग्रन्थेषु । 'यत्तु सिद्धे प्रवृत्त्यादिलिङ्गाभावेन न शक्तिग्रह इति, तन्न । प्रवृत्तिनिवृत्ती लिङ्गमिति न निर्बन्धः । पुत्रस्ते

नात इत्यादिषु हर्षादिलिङ्गेनापि शक्तिग्रहसंभवात्' इत्युक्तं तद्वर्णके श्री-सदाशिवेन्द्रैः ।

'कार्यबोधे यथा चेष्टा लिङ्गं हर्षादयस्तथा ।
सिद्धबोधेऽर्थवत्तैवं शास्त्रत्वं हितशासनात् ॥'

इति कारिकामुपन्यस्य श्रीमन्मिश्रा इदं विस्तरेण विचारयामासुः । सविस्तरमिदमुपपादितं परिमळे, न्यायरक्षामणौ च । यद्यदुक्तमस्मदार्यैः प्रथमसूत्रे सिद्धे व्युत्पत्तिविषये पूर्वपक्षसिद्धान्तयोस्तत्सर्वमुक्तं कण्ठरवेण भवदीयैः । 'सिद्धेऽपि शक्तिमनुरुद्धय—' इति भवच्छ्लोकोऽप्यत्र स्मर्तव्यः । सुधायां प्रथमसूत्र एवायं पूर्वपक्षः कृतः । अयं पूर्वपक्षः शास्त्रारम्भे सूत्रकारबुद्धिस्थ इति भवत्संमतम् । स च शास्त्रानारम्भोपपादकहेतुरिति च न संमतम् । धर्मिरूपब्रह्मणि शक्तिग्रहसमर्थनं प्रथमकर्तव्यतया रोचयन्ते श्रीभाष्यकाराः ॥

'व्युत्क्रम्यात्राद्यतुर्यावभिदधति नयौ केचिदप्राप्तमेतत्
बोधासिद्धौ कथं तत्फलमिह विमृशेत्सिद्धवत्कारमान्द्यात् ॥'

इत्यधिकरणसारावली । 'सति धर्मिणि धर्माश्चिन्त्यन्त इति हि न्यायः । तेन सिद्धे बोधे साफल्यासाफल्यचिन्तनं न्याय्यम् । अनागतावेक्षणन्यायेन सिद्धं कृत्वा चिन्त्यत इति चेत्तदपि न । तस्य न्यायस्य मन्दगतित्वात्' इति तद्व्याख्या चिन्तामणौ । एवं प्रथमसूत्रे शक्तिग्रहसमर्थनस्वारस्यमस्ति ॥

कर्ममीमांसायाम् 'भव्यो धर्मो जिज्ञास्यः । इह तु सिद्धं ब्रह्म जिज्ञास्यम्' इति प्रथमसूत्र एव भगवत्पादाः साध्यसिद्धभेदेन मीमांसयोः प्रतिपाद्यविषयवैलक्षण्यं प्रदर्शयामासुः । सूत्रकारोऽपि शास्त्रप्रमुख एव तं भेदं स्मृत्वा जैमिन्युक्तत्वेन प्रतीयमानं सिद्धव्युत्पत्त्याक्षेपं परिहरति भवद्भिरप्युच्यते — 'सिद्धं न शास्त्रार्थ इति चोद्घुष्यति शास्त्रैकशरणोऽपि भगवान् जैमिनिः' इति । सिद्धे व्युत्पत्तिपक्षस्य निरासो जैमिनिसूत्राक्षर-

प्रत्यायिततयोपन्यस्तो भगवत्पादैः समन्वयाधिकरणे । सिद्धब्रह्मपरवेदान्तविचारशास्त्रमारभमाणः सूत्रकारः स्वमीमांसापूर्वभूतपूर्वतन्त्रप्रतीतसिद्धविषयशक्तिग्रहाभावपूर्वपक्षं प्रथमतो निराकृत्यैव तदंशे तद्विजातीयमुत्तरतन्त्रमारभेत । ब्रह्ममीमांसापेक्षया धर्ममीमांसायाः पूर्वत्वम् , पूर्वभागत्वं च भगवत्पादसंमतम् । तस्याः पूर्वशास्त्रत्वम् ; पूर्वत्वं च सूत्रकारसंमतं च । 'स्वाध्यायानन्तर्यं तु समानम्' इति भाष्यव्याख्यावसरे उक्तं भामत्याम्—

"धर्मब्रह्मजिज्ञासयोः समानम् । स्वाध्यायेन तद्विषयमध्ययनं लक्षयति । तथा च 'अथातो धर्मजिज्ञासा' इत्यनेनैव गतमिति नेदं सूत्रमारब्धव्यम् । धर्मशब्दस्य वेदार्थमात्रोपलक्षणतया धर्मवद्ब्रह्मणोऽपि वेदार्थत्वाविशेषेण वेदाध्ययनानन्तर्योपदेशसाम्यादित्यर्थः" इति ।

अत्र कल्पतरुपरिमलाभ्यां मीमांसयोरैकप्रबन्ध्यं भगवत्पादाशयत्वेन समर्थितम् । एतन्मीमांसाशास्त्रप्रथमभागभूतजैमिनीये प्रथमसूत्रेऽध्ययनस्य वेदार्थमीमांसापूर्ववृत्तत्वेनाथशब्देन कीर्तनात् तच्छास्त्रस्यैवोत्तरभागेऽत्र न तस्य पुनःकीर्तनीयतेति भगवत्पादाशयः । 'एक आत्मनः शरीरे भावात्' इत्यधिकरणारम्भे

'ननु शास्त्रप्रमुख एव प्रथमे पादे देहव्यतिरिक्तस्यात्मनोऽस्तित्वमुक्तम् । सत्यमुक्तं भाष्यकृता । न तु तत्रात्मास्तित्वे सूत्रमस्ति'

इति भाषमाणा इदं स्पष्टीचक्रुः । एतद्भाष्यमुदाहृत्योक्तं परिमळे—

'शास्त्रारम्भप्रतिज्ञैक्येन वक्तृभेदेप्यैकप्रबन्ध्यमात्रमापद्यते समयबन्धपूर्वमनेककविकर्तृकैककाव्यवत् । तदपि सिद्धान्ते प्रौढ्याऽभ्युपगम्य इष्यत एव । .... ब्रह्मसन्यासदेवतापलापविषये विरोधस्तावन्नैकप्रबन्धत्वापवादकः । परस्परविरुद्धाभिमान्यनेककविकृतरामायणादिवदेकप्रबन्धतोपपत्तेः" इति ।

यत्र यत्र विवादः शङ्क्येतयोस्तत्सर्वमनूद्याविरोधसमर्थनं कृतं श्रीमद्दीक्षितैः

परिमळे । तिर्यगधिकरणे देवताभ्युपगम उपपादितः । 'अर्थवादाधिकरणोक्तं सिद्धार्थवाक्यानां विधिशेषत्वं विधिसमभिव्याहृतवायुक्षेपिष्ठादिवाक्यविषयम्' इति चोक्तम् । 'शेषत्वात् पुरुषार्थवादः' इति जैमिनिर्विवदते बादरायणेन। अतो न कर्मविचारानन्तर्यम्' इति भवन्तो वदन्ति । जैमिनेरन्वारुह्य वाद एव सः ; ब्रह्मप्राप्तिरूपमोक्षस्य तदभ्युपगतत्वात् । 'परं जैमिनिर्मुख्यत्वात्' 'ब्राह्मेण जैमिनिरुपन्यासादिभ्यः' 'भावं जैमिनिर्विकल्पामननात्' इति तन्मतानुवादेन, ज्ञानस्य कर्मशेषत्ववादे न तस्य हृद्गतं तात्पर्यमिति स्फुटीभवति। यथाऽपरामर्शं जैमिनिरचोदनाच्चापवदति हि' इति सूत्रे नैष्ठिक्यसन्यासाद्यभावं मन्यते जैमिनिरिति प्रतीयमानेपि 'तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात् तद्रूपाभावेभ्यः' इति सूत्रे तदाश्रमिणां जैमिन्यभिमतत्वं स्पष्टमुच्यते। जैमिनिर्वावदूकः शिष्यः । मुहुर्विवदते गुरुणा तत्त्वशुद्ध्यर्थम् । स्वप्रियशिष्येण विरचितं मीमांसातन्त्रपूर्वभागं स्वशास्त्रपूर्वभागत्वेनैवाभिमन्यते बादरायणः । 'तदुक्त' मिति जैमिन्युक्तं सिद्धवत्करोति । 'चोदनाद्यविशेषात्' इति स्वसूत्रस्थादिपदस्य जैमिनिसूत्रेणैव पूरणं मन्यते । बादरायणसूत्रापेक्षया जैमिनिसूत्राणां पूर्वरचितत्वं स्पष्टम् । 'यदपि जैमिनीयं वचनमुद्धाटयसि, तदपि तद्विवक्षापरिज्ञानादेवोद्भाव्यते । किं कारणम् । यतो न जैमिनेरयमभिप्राय आम्नायः सर्व एव क्रियार्थ इति । यदि ह्ययमभिप्रायोऽभविष्यत् 'अथातो ब्रह्मजिज्ञासा' 'जन्माद्यस्य यतः' इत्येवमादिब्रह्मस्वरूपवस्तुस्वरूपमात्रयाथात्म्यप्रकाशनपरं गम्भीरन्यायसन्दृब्धं सर्वं वेदान्तार्थमीमांसनं श्रीमच्छारीरकं नासूत्रयिष्यत् । असूत्रयच्च' इति नैष्कर्म्यसिद्धौ वदन्तः सुरेश्वराचार्याः शिष्याचार्ययोरेकाभिप्रायत्वमभिप्रयन्तीव। ते च मीमांसकमूर्धन्या मण्डनमिश्राः(?)।

वेदवाक्यसामान्यस्याविवक्षितार्थत्वं पूर्वपक्षयित्वा तत्सामान्यस्य विवक्षितार्थत्वं प्रसाध्य वेदवाक्यार्थविचारारम्भः प्रतिज्ञातो' धर्मजिज्ञासासू-

त्रेण । न तत्र कर्मकाण्डवाक्यमात्रस्याविवक्षितार्थत्वशङ्का वा, तन्निरसनं वा । धर्मशब्दस्य वेदार्थमात्रोपलक्षकत्वेन धर्मजिज्ञासाप्रतिज्ञायाः कृत्स्नमीमांसारम्भपरत्वमिष्टं भवदीयानाम् । यथा ब्रह्मकाण्डस्य प्रकरणान्तरत्वम्, तथा ब्रह्ममीमांसाया अपि पृथक्प्रकरणत्वात्पृथक्प्रतिज्ञयारम्भः 'अथात' इति ।

कर्मविचारस्य नियतपूर्ववृत्तत्वमात्रे विवदन्ते भगवत्पादाः । मीमांसाद्वयस्य मिथो विरोधित्वाभिमत्या पूर्वमीमांसायाः पूर्ववृत्तत्वासम्भवकथनं भवदीयाभ्युपगमविरुद्धम् । विस्तरेणोपपादितमैकशास्त्र्यं शङ्कितसर्वविरोधपरिहारपूर्वकं श्रुतप्रकाशिकायाम्, श्रुतदूषण्याम्; चण्डमारुते, मीमांसापादुकायाम्; परिमळे च । स्वशास्त्रात् पूर्वं प्रणीतायां मीमांसायामापाततो वा, वस्तुतो वा प्रतीयमानं सिद्धे शक्तिग्रहाभावं प्रथमं निरस्यैव सिद्धब्रह्मपरं शास्त्रमारभते सूत्रकारः ॥

अथ ब्रह्मजिज्ञासेत्युक्तेस्तत्पूर्वं जिज्ञासान्तरस्य वृत्तत्वं स्वरसतयावगम्यते । पूर्वं वृत्ता जिज्ञासा धर्मजिज्ञासैव भवेत् । 'अथातो धर्मजिज्ञासा' इति सूत्रे जिज्ञासान्तरस्यावृत्तत्वादेतत्स्वारस्यं त्यज्यते । साङ्गसशिरस्ककृत्स्नवेदाध्ययनं धर्मजिज्ञासायाः पूर्वमेव वृत्तम् । तेन च कृत्स्नवेदविषयापातप्रतीतिः समजनि । वेदार्थनिर्णयेच्छाऽजायत । 'प्रावण्यं प्राक्त्रिवर्गे' 'यदि मधु सविधे यातु चाद्रिं किमर्थम्' इति त्रिवर्गे सहजरुच्या आमुष्मिकफलस्याक्षय्यत्वादेरापातप्रतीत्या कर्मविचारे प्रथममवतीर्णम् । तत्स्यग्विचार्य कर्मणामस्थिरफलतां निश्चित्य पूर्वमेवापाततः प्रतिपन्नस्यानन्तस्थिरफलब्रह्मणो विचारे प्रवर्तते । कर्मब्रह्मणोरुभयोरप्यनन्तस्थिरफलत्वं साङ्गकृत्स्नाध्ययनेन पूर्वमेवापातप्रतिपन्नम् । कर्मणामप्यक्षयफलत्वस्यापातप्रतीतिर्ब्रह्मविचारप्रवृत्तिं प्रत्यनध्यात् । 'कर्मणैव निरतिशयं सुस्थिरं च फलं प्रतिपादयता पूर्वतन्त्रेण निर्वृत्तः कर्माधिगमः कथं साक्षाद्ब्रह्मविविदिषाहेतुः स्यात्' इति भवद्भिरनुयुज्यते । कर्मफलस्य सातिशयत्वं प्रसिद्धत्वेनोपन्यस्तं

भगवत्पादैः समन्वयाधिकरणे । कर्मविचारेण तदेव निर्णीतं भवति । 'प्रत्यक्षं चातुर्मास्याद्यावृत्तिविधानं दृश्यते । चातुर्मास्ययाजिनोऽक्षय्यं फलं श्रूयते । आवृत्त्या फलातिशयवत्या भाव्यम् । एकेनैव प्रयोगेण मुख्याक्षय्यफललाभे तदावर्तनस्यानर्थक्यं स्यात् । ततो गम्यतेऽक्षय्यत्वस्यौपचारिकत्वमोपेक्षिकत्वं चेति । 'आरम्भभाव्यत्वात्कृषिवत्प्रत्यारम्भं फलानि स्युः' इत्येकादशाध्यायाधिकरणे कर्मणां कृषिन्यायेन प्रत्यारम्भं फलभेदो व्युत्पाद्यते जैमिनिना । 'हिरण्यदा अमृतत्वं भजन्ते' 'अपाम सोमममृता अभूम' इत्युभयत्राविशेषेण श्रूयमाणस्यामृतत्वफलस्य न निरतिशयामृतत्वसंभवः' इति भावप्रकाशिका । 'मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यमनुश्रूयते । ततश्च तद्धेतोर्धर्मस्य तारतम्यं गम्यते । धर्मतारतम्यादधिकारितारतम्यम् । प्रसिद्धं चार्थित्वसामर्थ्यादिकृतमाधिकारितारतम्यम् ॥

एवं धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखतारतम्यमानित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम्' इति भाषितं भगवत्पादैः । श्रुतिस्मृतिन्यायप्रसिद्धिः श्रुतिस्मृतिविषयकन्यायपूर्वकविचाररूपया वृत्तया पूर्वमीमांसया जनितां प्रसिद्धिं परामृशति । 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते ।' नास्त्यकृतः कृतेन' 'न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत्' इति न्यायप्रदर्शकश्रुतिजनितापातप्रतीतिरपि कर्मफलस्यासारताऽनित्यतानिर्णये सहकरोति । अहंप्रत्ययस्य यथा पूतिकूश्माण्डायितत्वं वर्ण्यते भामत्याम्, तथा कर्मजन्यामृतत्वमपि पूतिकूश्माण्डम् । विचारेण तस्य तथाविधत्वमेव निर्णीयते कृतेन कर्मविचारेण कर्मफलस्याल्पास्थिरत्वनिश्चयेऽनन्तस्थिरफलत्वेनापातप्रतिपन्नब्रह्मप्रातीच्छया तद्विचारस्यावसरस्तत्र प्रवृत्तिश्च भवति ।

अर्थवादाधिकरणे 'अन्यानर्थक्यात्' इति पूर्वपक्षसूत्रेण 'पूर्णाहुत्या सर्वान् कामानवाप्नोति' इति श्रवणात् 'क्रतुसाधनीभूताहवनीयाद्यग्निनिर्व-

र्तकाम्नयाधेयान्तर्गतपूर्णाहुत्यैव सर्वक्रतुफलावाप्तौ सत्यां किमिति क्रतुषु प्रवर्तेत' इत्याक्षिप्य 'फलस्य कर्मनिष्पत्तेस्तेषां लोकवत् परिमाणतः फलविशेषः स्यात्' इति सिद्धान्तसूत्रेण 'कर्मणां परिमाणतोऽल्पत्वभूयस्त्वतारतम्यात् फलविशेषः स्यात्' इति स्वर्गफलस्य यथ साधनमल्पत्वादितारतम्यं समर्थितम् । 'लोकवत् लोके सेवादितारतम्यात्फलतारतम्यवत् । ततश्च पूर्णाहुत्या स्वर्गादि-सर्वफलान्यल्पानि भवन्ति । अग्निहोत्रादितस्तु ततस्ततो भूयांसीत्युक्तं भवति' इति कुतूहलवृत्तिः । एकादशप्रथमपादतृतीयाधिकरणे उक्तं शास्त्रदीपिकायाम्——

'तस्मादतिशयः कश्चित् कर्मभ्यो जायते नरे ।
स च कार्यविरोधित्वात् स्वफलाप्तेर्विनश्यति ॥
फलान्तरार्थं कर्तव्यं तस्मादतिशयान्तरम् ।
स एवातिशयोऽस्माभिरपूर्वमिति गीयते ॥
तस्माद्भूयः प्रयोक्तव्यं पुनः फलमभीप्सता ॥'

इति । 'क्रतुवद्वाऽनुमानेनाभ्यासे फलभूमा स्यात्' इति सूत्रेणाग्नेः क्रतोः पुनःपुनरभ्यासेन फलाधिक्यं प्रसिद्धत्वेन दृष्टान्तीकृतम् ।

साङ्गकृत्स्नवेदाध्ययनं कर्मविचारपूर्ववृत्तमिति सर्वसम्मतम् । अथशब्देन कर्मविचारानन्तर्यकथने तादृशाध्ययनान्तर्यमपि सिद्ध्यति । तस्य नियतापेक्षास्ति ब्रह्मविचारस्य । अधिकारकोटिप्रविष्टमेव तत् । कर्मविचारानन्तर्यकथने तस्य नियतलाभ इत्यप्यस्ति स्वारस्यमस्माकम् ।

"यस्माद्वेद एवाग्निहोत्रादीनां श्रेयःसाधनानामनित्यफलतां दर्शयति 'तद्यथेत्यादिः'; तथा ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शयति 'ब्रह्मविदाप्नोति परम्' इत्यादिः" इत्यतःशब्दार्थं विवृण्वतां भगवत्पादानामतःशब्दार्थत्वेनास्माभिर्वर्णिता विशिष्टप्रतीतिः कथञ्चिदभिमतैव । केवलकर्मणामनित्यत्वीफलनश्वयसहितोऽनन्तस्थिरफलब्रह्मण आपातप्रतीतिरेवोक्ता तैरप्यतः-

शब्दाभिप्रेतहेतुत्वेन । विशिष्टप्रतीतौ ब्रह्मविषयकप्रतीतिर्विशेष्यांशः प्रधानभूतः । केवलकर्मणामल्पास्थिरफलत्वनिश्चयो विशेषणांशः । विशेष्यांशः साङ्गसशिरस्कवेदाध्ययनजन्यः । विशेषणांश. कर्मविचारजन्यः । तद्यथेहेत्यादिश्रुतिरुभयत्रोपकरोति । कर्मब्रह्मणोरुभयोरप्यनन्तस्थिरफलत्वापातप्रतीतेः कर्मविचारेण तत्फलासारतानिश्चयापेक्षा न्याय्यैव ब्रह्मविविदिषावसरलाभाय।

विशिष्टप्रतीतौ विशेषणांशो यथोचितं यथासम्भवं नित्यानित्यविवेकं इहामुत्र फलभोगविरागं चान्तर्भावयति । विशेष्यांशश्च ब्रह्मप्राप्तीच्छारूपमुमुक्षामन्तर्भावयति । 'प्रशान्तचित्ताय शमान्विताय प्रोवाच—' इति विविदिषुशिष्यलक्षणवर्णिका श्रुतिः । प्रशान्तचित्तत्वम् ; शमान्वितत्वं च तस्याधिकारसम्पत्त्यपेक्षिते । 'शमो बाह्येन्द्रियनियमनरूपः । प्रशान्तचितायेत्यन्तःकरणनियमस्योक्ततया पारिशेष्यात् । एतेन श्रवणोपयुक्तावधानं विवक्षितम् । न तूपासनोपयुक्तात्यन्तेन्द्रियजयादिः ।' इति श्रुतप्रकाशिका । 'निर्वेदमायात्' इत्युक्तस्य निर्वेदस्य वैतृष्ण्यार्थकत्वमुक्त्वा 'नात्रोपासनाङ्गभूतात्यन्तविषयवैतृष्ण्यं विवक्षितम् । तद्धि शमदमाद्युपेतः स्यादिति निरूपयिष्यते' इत्युक्तं तत्र । 'ब्रह्मजिज्ञासुना बाह्यान्तःकरणसमाधानलक्षणं परमं तपःसाधनमनुष्ठेयम्' इति भगवत्पादा भृगुवल्लीभाष्ये । शमदमादिसाधनविधायकत्वेन भवदभिमता 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत्' इति श्रुतिः 'एवंविदि'ति विचारजन्यनिश्चयमनूद्य शमदमादिसम्पन्नीभवनम्, तस्योपासनाङ्गत्वं च विदधाति । सूत्रं च 'शमदमाद्युपेतः स्यात् तथाऽपि तु तदङ्गतया तद्विधेः' इति शमदमादेर्विधाङ्गत्वं ब्रवीति । साधनचतुष्टयस्य ब्रह्मविचारात् पूर्वं न सम्पूर्णलाभसम्भवः । श्रीभाष्यश्रुतप्रकाशिकाशतदूषणीचण्डमारुतादिग्रन्थोक्तविचारपूर्वासम्भवान्योन्याश्रयादिदोषाणां दुष्परिहरत्वमभ्युपगम्योक्तं श्रीमद्दीक्षितैर्न्यायरक्षामणौ ; "न हि ब्रह्मैव नित्यमन्यदनित्यमि-

ति निर्णयः सिद्धान्ताभिमतो नित्यानित्यवस्तुविवेको ब्रह्मविचारं विना संभवति । संभवे वा एतस्मिन् शास्त्रे 'असंभवात्तु' इत्यधिकरणे ब्रह्मनित्यत्वप्रतिष्ठापनम् , वियदधिकरणादिषु वियदाद्यनित्यत्वप्रतिष्ठापनं च, वैराग्यपादे कर्मफलानित्यत्वप्रदर्शनं च नाकरिष्यतेति चेत्—उच्यते । साङ्गसशिरस्कवेदाध्ययनजन्यापातप्रतीतिरूपो नित्यानित्यवस्तुविवेक इह परिगृह्यते" इति । श्रीभाष्यक्रमभावितशब्दानुपूर्व्यैव तदुक्ताधिकारांशो ब्रह्मविचारनियतपूर्ववृत्तत्वेन वर्ण्यते स्वारस्यशरणैः श्रीमद्दीक्षितैः ॥

ब्रह्मसूत्रार्थपरिज्ञानाय जैमिनिसूत्रपरिज्ञानमपेक्षितमिति संप्रतिपन्नम् । एवमपि कर्ममीमांसापठनस्य पूर्ववृत्तत्वेनापेक्षास्ति ॥

विविदिषोत्पादकत्वेन सर्वकर्मापेक्षा विद्येति भवत्स्थितिः । विविदिषा च विचारमाक्षिपति । कर्मानुष्ठानस्य ब्रह्मवेदनेच्छोत्पादकत्वमभ्युपगतम् । कर्मानुष्ठानं च तत्प्रकारनिर्णायकधर्ममीमांसाज्ञानमपेक्षते । 'न चैतानि कर्माणि दृष्टादृष्टसामवायिकारादुपकारहेतुभूतौपदेशिकक्रमपर्यन्ताङ्गग्रामसहितपरस्परविभिन्नकर्मस्वरूपतदधिकारिभेदपरिज्ञानं विना शक्यान्यनुष्ठातुम्' । 'न च धर्ममीमांसापरिशीलनं विना तत्परिज्ञानम्' इति भामतीपूर्वपक्षवाक्ये अत्र स्मर्तव्ये । वाक्यार्थज्ञाने कर्मणामङ्गभावानभ्युपगमेऽपि तीव्रेच्छारूपविविदिषोत्पादकत्वेन सर्वकर्मणामारादुपकारकत्वरूपाङ्गत्वमभ्युपगतमेव । एवमपि कर्मविचारस्य पूर्ववृत्तत्ववर्णनं स्वरसम् । कर्मणां विद्यया सहवृत्तत्व एव विवादः । तेषां विद्यापूर्ववृत्तत्वे न विवादः । अतः कर्मज्ञानापेक्षास्त्येव । मीमांसाद्वयमेकं विद्यास्थानमित्यार्षवचनम् । इदं चैकशास्त्र्ये लिङ्गम् । कृत्स्नमीमांसाया एकविद्यास्थानत्वमङ्गीकृतं कल्पतरौ शास्त्रयोनित्वाधिकरणे भाष्यस्थानेकाविद्यस्थानपदव्याख्याने ॥

अथातःशब्दयोरस्मदुक्तोऽर्थः कृत्स्नं ब्रह्मविचारापेक्षितं प्रापयति । यथासंभवं यथोचितं साधनचतुष्टयसंपत्तिमपि हेतूकरोति ॥

अथशब्दः कर्मविचारानन्तर्यं बोधयति । कर्मविचारस्य नियत-पूर्ववृत्तत्वेन अभ्युपगतसाङ्गसशिरस्कवेदाध्ययनतज्जन्यवेदवेदान्तवाक्यापातप्रतीतिमप्यर्थादाक्षिपति। 'अथशब्दाक्षिप्तहेत्वासिद्धिशङ्कापरिहारार्थत्वमतःशब्दस्य' इत्यतःशब्दप्रयोजनमुक्तं श्रुतप्रकाशिकायाम्। कर्मविचारस्य कथं ब्रह्मविचारप्रवृत्तिहेतुत्वमित्याक्षिप्ते केवलकर्मणामल्पास्थिरत्वनिश्चयजननद्वारा पूर्वमेव कृत्स्नाध्ययनजनितायां ब्रह्मविषयकानन्तास्थिरफ...तप्रतीत्यां सहकारित्वेन प्रविश्येति ब्रह्मविचारहेत्वसिद्धिः परिह्रियते हेतुत्वकण्ठोक्तिमताऽतः शब्देन। आपातप्रतीतेर्मीमांसाप्रयोजकत्वं सर्वसंप्रतिपन्नम्। कर्मभ्य एवानन्तास्थिरफललाभप्रत्याशा वेदान्तविचारप्रतिबन्धिका बभूव । तत्प्रतिबन्धनिरसनद्वारा पूर्ववृत्तः कर्मविचार उपकरोति । अतःशब्दपरामृष्टत्वेन भगवत्पादैरादृता तद्यथेहेति श्रुतिरपि कर्मणामल्पास्थिरफलत्वं प्रत्याययति ॥

अथशब्दः प्रतिज्ञातब्रह्मविचारेणान्वेति--'कर्मविचारानन्तरं ब्रह्मविचारः कर्तव्यः' इति। अतःशब्देन हेतूपपादनम् । 'एवम् अथातः-पदयोः प्रतिज्ञाहेत्वर्थत्वेन विभागः' इत्युक्तं श्रुतप्रकाशिकायाम् ॥

श्रुतप्रकाशिकायां स्पष्टमुक्तमतःशब्दप्रयोजनमनवलोक्यैव 'अथातःशब्दयोरन्यतरेणालम् । अतःशब्दवैयर्थ्यं युष्मन्मते' इति भवतां, सिद्धान्तसिद्धाञ्जनकृतां चानुयोगो निरर्थकः । भवतां यथाऽतःशब्दस्य प्रयोजनम्; तथास्मन्मतेऽपि । अथशब्दाक्षिप्तपूर्ववृत्तरूपसाधनचतुष्टयस्य हेतोरसिद्धिमाशङ्क्य तत्परिह्रियतेऽतःशब्देन वृत्तस्य हेतुत्वकीर्तनेनेति भवन्मतम् । अस्मन्मतेऽपि वृत्तस्य हेतुभाव एव दृढीक्रियतेऽतःशब्देन । साध्यहेत्वोः पृथगन्वयेनापि वैयर्थ्यशङ्कापरिहारोऽस्मन्मते ।

असद्रीत्यार्थवर्णने सर्वापेक्षितलाभः । पूर्ववृत्तत्वेनाभ्युपगतसाङ्गसशिरस्काध्ययनस्यालाभो भवताम् । अपेक्षितपूर्वमीमांसातत्त्वज्ञानस्य चा-

लाभः । आरादुपकारकत्वेन विद्योत्पत्तावङ्गत्वेनाभ्युपगतकर्मानुष्ठानापेक्षितताद्दितिकर्तव्यतानिर्णायकधर्ममीमांसाया अलाभः । 'एवंवित्' इति श्रुत्या स्पष्टोक्तक्रमस्य परित्यागो भवन्मते ॥

ब्रह्मजिज्ञासेति ब्रह्मज्ञानेच्छा । इच्छाया इष्यमाणज्ञानप्रधानत्वमिष्यत एवास्माभिः । अत्र ब्रह्मविचारः प्रतिज्ञायत इति भवदीयसर्वग्रन्थसंप्रतिपन्नम्; यद्यपि तत्रापि विवदन्ते भवन्त इति दृश्यते भूयस्तद्विरोधेन दृष्टैर्विचित्रैर्भवदुपन्यासैः । अत्र ज्ञानशब्दस्य विचारवाचकत्वकथनेन सूत्रप्रतिज्ञातब्रह्मविचारस्य वाचनिकत्वलाभः । 'वेदान्तवाक्यार्थमीमांसा तदविरोधितर्कोपकरणा निश्श्रेयसप्रयोजना प्रस्तूयते' इति भगवत्पादानामधिकरणनिगमनवाक्यम् । एतत्सूत्रप्रतिज्ञातत्वेन संमतस्य विचारशास्त्रस्य सौत्रज्ञानपदादेव लाभे अन्वाच्येच्छया तस्य लक्ष्यत्वान्वेषणं क्लिष्टम् । वेदवाक्यार्थमीमांसाशास्त्रे प्रक्रंस्यमाने विचारार्थबोधनसमर्थसौत्रज्ञानपदेन विचारविषयभूतब्रह्मपदानन्तरपठितेन विचाररूपतर्कात्मकज्ञानस्य ग्रहणं स्वरसम् । जिज्ञासाशब्दस्यैव विचारवाचकत्वमिष्यते श्रीमन्मध्वमते । वेदवाचकस्य ब्रह्मशब्दस्यावृत्त्या तर्करूपविचारस्य वेदान्तवाक्यविषयकत्वमपि लभ्येतेति गतिः प्रदर्शिता तन्मते । वेदवाक्यविचारस्य धर्मजिज्ञासाप्रतिज्ञयैव प्रक्रान्तत्वात्कर्मकाण्डवाक्यानां विचारितत्वाद्विचार्यत्वेनावशिष्टवेदान्तवाक्यविषयकत्वस्य प्रकरणाद्वा लब्धिः । ब्रह्मरूपविषयकीर्तनेन तद्बोधकैकप्रमाणभूतवेदान्तवाक्यविषयकत्वस्य प्राप्तिर्वा । यथाकथञ्चिद्वेदान्तवाक्यार्थविचारद्वारा तद्विषयब्रह्मविचारोऽत्र प्रतिज्ञायत इति सर्वसम्प्रतिपन्नम् । अस्मिन्नेव सूत्रे भाष्यते भगवत्पादैः 'प्रत्यक्षं कर्मत्वमुत्सृज्य परोक्षत्वं कल्पयतो व्यर्थः प्रयासः स्यात्' इति । तुल्यन्यायेन ज्ञानपदस्यात्र विचारात्मकज्ञानपरत्ववर्णनं न्याय्यम् ।

प्रतिज्ञातस्य ब्रह्मविचारस्येष्यमाणत्वं सना बोध्यते । ब्रह्मविषय-

कविचारस्य सुखरूपत्वं बोध्यते तस्येष्यमाणत्वोक्त्या । सन्घटितश्रौत-विधिरपि कर्तव्यत्वेन विधेयस्य ज्ञानस्य विचारारम्भदशाप्रभृति सुखरूपत्वं सना विवक्षति । "सनन्तनिर्देशश्च 'निदिध्यासितव्यः' 'विजिज्ञासितव्यः' 'तद्विजिज्ञासस्व' इत्यादिश्रुत्यनुसारेण क्रियते । श्रुतिश्चोपायदशाप्रभृति भगवज्ज्ञानस्य प्रीतिविषयत्वेनेच्छाविषयत्वात् तथा निर्दिशति" इति श्रुत-प्रकाशिका ।

भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ।
यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ।
'पिबन्तं त्वन्मुखाम्भोजाच्च्युतं हरिकथामृतम्'

इत्याद्यनुभवरसिकोक्तिरत्र स्मर्तव्या ॥

सर्वापेक्षाधिकरणे उक्तं भामत्याम् 'चतस्रः प्रतिपत्तयो ब्रह्मणि । प्रथमा—तावदुपनिषद्वाक्यश्रवणमात्राद्भवति यां किलाचक्षते श्रवणमिति । द्वितीया—मीमांसासहितात्तस्मादेवोपनिषद्वाक्यात्; यामाचक्षते मननमिति । तृतीया—चिन्तासन्ततिमयी यामाचक्षते निदिध्यासनमिति । चतुर्थी—सा-क्षात्कारवती वृत्तिरूपा, नान्तरीयकं हि तस्याः कैवल्यमिति' इति । प्रथमद्वि-तीययोः, द्वितीयमात्रस्य वा सूत्रस्थज्ञानपदेन शाब्दं ग्रहणम् । तृतीय-चतुर्थयोश्च फलत्वेन सूचनम् । कैमुत्येन तयोर्महासुखत्वज्ञापनम् । कैमु-त्यविधया प्रदर्शनं सुखत्वप्रतीतिदार्ढ्याय भवेत् । एवं शाब्दमर्यादानुरो-धेन प्रक्रान्तानुरोधेन विचारप्रतिज्ञाया अवश्यकीर्तनीयत्वानुरोधेनापेक्षितसर्व-लाभोऽस्मद्वर्णने । ब्रह्मविचारो ब्रह्मस्वरूपादिविषयनिश्चयज्ञानसाधनम् । तच्च ब्रह्मध्यानोपयोगि । ध्यानं च ध्येयहार्दानुग्रहद्वारा परिपूर्णब्रह्मानुभव-रूपमोक्षसाधकम् । साधनं ज्ञानविशेषः । साध्यमपि ज्ञानविशेषः । परिच्छिन्नानुभवःसाधनम् । अपरिच्छिन्नानुभवः साध्यम् । विचारव्यति-रिक्तानां फलपर्यन्तसर्वज्ञानानामिष्यमाणत्वस्य कैमुत्यविधयार्थिकतया लाभः ।

आर्थत्वेऽप्युद्देश्यफलत्वाकारेण प्राधान्यम् ॥

अत्र ब्रह्मशब्दस्य जिज्ञासाशब्दप्रकृतिभूतज्ञानेनाभेदान्वय इष्यते भवद्भिः । 'ब्रह्मणो जिज्ञासा' इति कर्मणि षष्ठी । ब्रह्मणो जिज्ञासाकर्मत्वं स्पष्टं श्रुतं तयोर्भेदगमकविषयविषयिभावेन भेदं द्रढयति । 'कर्मकर्तृव्यपदेशाच्च' 'शब्दविशेषाच्च' इति सूत्रप्रदर्शितन्यायः स्मर्तव्यः । जिज्ञासाप्रकृत्यन्तर्गतस्य ज्ञानस्य स्वरूपज्ञानपरत्ववर्णनमत्र दुर्घटम् । तस्य ब्रह्मणा समानाधिकरणान्वयो दुर्घटः । अतःशब्दोक्तहेतुना साध्यत्वेन भवदुक्तब्रह्मविचारस्य शाब्दलाभाभावश्च प्रसजेत् ॥

विचारजन्यं ब्रह्मज्ञानं प्रयोजनमिति भवदीयग्रन्थेषु वर्ण्यते । 'जिज्ञासया सन्देहप्रयोजने सूचयति । तत्र साक्षादिच्छाव्याप्यत्वाद्ब्रह्मज्ञानं कण्ठोक्तं प्रयोजनम्' इति भामती । 'ब्रह्मज्ञानमिति वृत्तिव्यक्तस्वरूपज्ञानमभिप्रेतम्' इति कल्पतरुः । द्वन्द्वैकवद्भावमाश्रित्य वृत्तिश्च व्यक्तस्वरूपज्ञानं चेति तद्व्याख्यातं परिमळे । अत्र स्वरूपज्ञानस्य कथमुक्तिरिति शङ्कायामुच्यते परिमळे 'स्वरूपज्ञानविवक्षायां ब्रह्मणो यज्ज्ञानं तदिच्छत्यर्थकथने राहोः शिर इतिवदुपचारो द्रष्टव्यः' इति । अगतिका क्लिष्टतमा राहुशिरोगतिराश्रयणीया भवति भवदिष्टलाभाय । 'वेदान्तवाक्यमीमांसारम्भार्थमतःपदम्' इति भवदुक्तिः । अतःपदोक्तहेतुसाध्यत्वेन भवदभिमताया ब्रह्ममीमांसायाः प्रत्यक्षशाब्दत्वपरित्यागो दोष एव। 'अर्थादपरोक्षज्ञानस्य मोक्षसाधनत्वमुच्यते' इति सदाशिवेन्द्रा अपरोक्षज्ञानस्य आर्थिकत्वमेव वर्णयन्ति । निर्विशेषस्य जिज्ञास्यत्वानुपपत्तिर्विस्तरेणोपपादिता बहुष्वसद्ग्रन्थेषु द्वैतग्रन्थेषु च ॥

'अधीतेत्यादिविशेषणद्वयेन ब्रह्मजिज्ञासापदसामर्थ्यानुगृहीताथातःशब्दोपस्थापितोऽधिकारिविशेषः प्रदर्शितो भवति । समधिगतकर्मसांसारिकफलनिर्विण्णोऽनन्तस्थिरफलाकाङ्क्षी हि शास्त्रमधिकरोति ।' इत्य-

धिकारिणः सौत्रं प्रदर्शनमुक्तं श्रुतप्रकाशिकायाम् । अनन्तस्थिरफलब्रह्मा-पातप्रतीत्या तत्प्राप्त्युद्देशेन तदुपायनिर्णयफलकविचारे रागतः प्रवृत्तिकथ-नेन ब्रह्मस्वरूपगुणतत्प्राप्त्युपायादिनिर्णयस्य फलत्वेन सूचनम् । अत्र मीमां-साशास्त्रस्यैवाधिकारिविषयप्रयोजनसंबन्धरूपानुबन्धचतुष्टयसूचनमपेक्षितम् । न मोक्षसाधनभूतब्रह्मविद्यायाः । सा तु विचारितवेदान्तेनानन्तरमुपक्रम्येत । मीमांसायाः साक्षात्फलं मीमांस्यमानब्रह्मस्वरूपगुणादिनिर्णयः । साङ्गसशि-रस्काध्ययनवान्वृत्तकर्मविचारेण कर्मफलनिर्विण्णोऽनन्तस्थिरफलब्रह्मस्वरूपप्रा-प्त्युपायादिनिर्णिनीषुर्विचारशास्त्रेऽधिकारी । विचारविषयश्च ब्रह्मस्वरूप-गुणसाधनप्राप्त्यादिकम् । संबन्धश्च प्रतिपाद्यप्रतिपादकभावः । एना इष्य-माणत्वकीर्तनेन विचारनिर्णयादेः सुखरूपत्वं सूच्यते । अनुबन्धचतुष्टयस्य सूचनमात्रमावश्यकम्, न साधनमस्मिन्नुद्देशसूत्र एव । 'अस्ति हि शास्त्रा-दावनुबन्धचतुष्टयं साध्यत इति शास्त्रकृतां मर्यादा । सा च त्यक्तेति भवति महान्दोष एव' इति भवदुक्तिरस्मदुक्तेः, शास्त्रकृन्मर्यादाया-श्चानभिज्ञतामूला । पदशक्तिग्रहाभावेन ब्रह्मणो विषयत्वासंभवः, शास्त्र-ब्रह्मणोश्च विवक्षितसंबन्धासंभवश्चाक्षिप्यात्र साध्येते । अधिकारिफलयोश्च सूचनं क्रियते । अनुबन्धचतुष्टयस्य सूचनमेवापेक्षितं शास्त्रारम्भे, न साधनम् । तथैव शास्त्रकृन्मर्यादा । 'अथशब्देनाधिकारमत इत्यमुना फलम् । ब्रह्मशब्देन विषयं सूचयामास सूत्रकृत् ॥' इति चान्द्रिकायां विद्वदग्रेसरो-क्तिः । 'विषयप्रयोजनब्रह्मस्वरूपप्रमाणमुक्तिसाधनफलविचाराणां च प्रतिज्ञा-नाद्बह्वर्थसूचनात्' इति कल्पतरुरपि सूचनं निर्दिशति । 'उद्देशो लक्षणं परीक्षा' इति शास्त्रकृन्मर्यादा । मीमांसाशास्त्रभूतधर्मजिज्ञासामर्यादा चेयम् । प्रथमसूत्रे धर्मजिज्ञासाप्रतिज्ञानम् । अनन्तरं लक्षणप्रमाणकथनम् । अन-न्तरं परीक्षेति क्रमः । 'चोदनालक्षणोऽर्थो धर्मः' 'तस्य ज्ञानमुपदेशः' 'तस्य निमित्तपरीष्टिः' इति तत्र प्रवृत्तिक्रमः । लक्षणशब्देन प्रमाण-

स्यापि ग्रहणम् । चतुःसूत्र्यां क्रमेणाध्यायचतुष्टयस्यापि विषयः सूच्यते । जिज्ञासासूत्रे वेदवाक्यानां ब्रह्मणि तात्पर्यवत्त्वमुच्यते । स च समन्वयाध्यायविषयः । लक्षणसूत्रे लक्षणवाक्यघटकविशेषणानामविरोधोपपादनेनाविरोधाध्यायः सूच्यते । शास्त्रयोन्यधिकरणे प्रमाणद्वारा ब्रह्मसाधनोक्त्या साधनाध्यायः सूच्यते । समन्वयाधिकरणे ब्रह्मणः पुरुषार्थत्वोक्त्या फलाध्यायः सूच्यते । इदञ्च क्रमस्वारस्यं प्रदर्शितं श्रीरङ्गरामानुजमुनिभिः । अस्य शास्त्रस्य विषयो ब्रह्म प्रथमद्विकेन प्रतिपाद्यते । प्रथमाध्यायद्वयस्य विषयद्विकमिति संज्ञा । विषयिद्विकमुत्तरद्विकम् । साधनं ब्रह्मविषयि ज्ञानम् । साध्यं च ब्रह्मविषयि ज्ञानम् । अनुबन्धचतुष्टयमध्ये विषयमेव प्रथममुपपादयति सूत्रकारोऽध्यायद्वयेन । फलं च चरमाध्यायेनोपपादयति । इममेव क्रमं सूत्रकारो रोचयते । तद्ग्रन्थव्याख्याने श्रीभाष्यकारोऽपि तद्रुचिमेवानुसरन्ति । दूषणार्थमुपन्यस्ता भवद्रुचिर्निवादर्तव्या ।

'तस्यैव सम्भवासम्भवविवेचनेन प्रधानतः साधनस्य साम्प्रदायिकत्वात्' इति भवदुक्तिः । उद्दिष्टस्य ब्रह्मविचारशास्त्रस्यानारम्भणीयत्वं प्रथमनिरस्यमिति संमतं ते । शास्त्रानारम्भशङ्का चतुर्धोन्मिषति । वाचः क्रमिकत्वादेकैका शङ्का एकैकाधिकरणे निरस्यते । अधिकरणचतुष्टयेन शास्त्रस्यारम्भणीयत्वं समर्थ्यते । शास्त्रब्रह्मणोः प्रतिपाद्यप्रतिपादकभावरूपसम्बन्ध एव भवद्भिरभ्युपगन्तव्यः । शक्तिग्रहाभावे वेदान्तवाक्यद्वारा ब्रह्मविचारशास्त्रस्य विषयो न सिध्येत् । सम्बन्धश्च न सिध्येत् । अनयोः सम्भवासम्भवौ प्रधानतया विचार्येते । अधिकारिफले च सूत्रेण कीर्तिते । काऽसावसांप्रदायिकता ? भित्तिं निर्माय खलु [illegible] [illegible] [illegible] सम्भावनीयं न [illegible] [illegible] समर्थ्यते...। [illegible] विचार्यत्वम् । वेदान्तमीमांसाशास्त्रमिदमिति भे[illegible] । स्वा[illegible] शास्त्रप्रति-

'अस्योपास्यत्वाङ्गीकारे जगद्व्यापारवर्जसूत्रविरोधाच्च' इति भवद्भिरुच्यते ।'तद्वि-जिज्ञासस्व' इति वाक्येनोपासनं विहितम् । उपास्यब्रह्मणस्तद्वाक्योक्तलक्ष-णमत्र सूच्यते । विशिष्टस्य कारणत्वाद्विशिष्टस्योपास्यत्वमिष्टमेव । विशि-ष्टस्यैव प्राप्यत्वं मुक्तानुभाव्यत्वं चास्मदभ्युपगतम् । उपासनात्रैविध्यम-भ्युपगतमस्माभिः श्रुतिसूत्रानुसारिभिः । जगद्व्यापारसूत्रेण को विरोधः ? ब्रह्मप्राप्तिरेवाङ्गीक्रियतेऽस्माभिः ; न ब्रह्मीभवनमेव , यथा युष्माभिः । अतो न तत्सूत्रविरोधप्रसङ्गः ॥

'कारणत्वस्योपलक्षणत्वपक्षे लक्ष्मीपतेर्निर्विशेषतेति मन्मतप्रवेशः' इति भवदीयापादनस्य कुत्रावकाशः ? आनन्दादयो बहवो गुणा अङ्गीकृ-ताः सूत्रकारेणास्माभिश्च । स्पष्टमङ्गीकृतास्तत्सूत्रभाष्ये भवदीये ।

विशेषणभेदेन विशेष्यभेदशङ्कया सत्यादिवाक्योक्तलक्षणविषये आ-क्षेप इति पूर्वपक्षो वर्ण्यतेऽत्र भवदीयग्रन्थेषु । विशेषणानामविरोधसमर्थ-नेनाविरुद्धानेकविशेषणानामेकस्मिन् विशेष्ये सम्भवप्रदर्शनेन च पूर्वपक्ष-निरासोऽस्मन्मते । विशेषणेषु तात्पर्याभाववर्णनेन तन्निरासो भवन्मत इत्येव वैलक्षण्यं मतद्वयस्य ।

'तत्तत्स्वप्रत्यनीकव्युदसननियतं भेदकं नान्यबाधि
व्याघातः कालभेदान्न भवति जननस्थापनध्वंसनानाम् ।
प्रत्येकं लक्षणत्वं सुवचमिह बहूदाहृतिर्धाम्नि हि ब्रह्मे
संभूयाप्याहुरेके फलमपि च तदा शङ्कितार्थव्युदासः ॥'

इत्यधिकरणसारावल्युक्तमत्रावधेयम् ॥

शास्त्रयोनित्वाधिकरणम् ॥

शास्त्रयोनित्वात् ।

शास्त्रैकयोनित्वमिति सावधारणहेतुविवक्षा । स्वार्थ शास्त्रैकयोनित्वा-

भावे शास्त्रयोनित्वं न सिद्धयेत् । अप्राप्ते हि शास्त्रमर्थवत् ।

'असन्निकृष्टवाचा च द्वयमत्र जिहासितम् ।
ताद्रूप्येण परिच्छित्तिस्तद्विपर्ययतोऽपि वा ॥'*

शास्त्रोक्तं ब्रह्मणः कारणत्वरूपलक्षणं विचारितं पूर्वसूत्रे । तत्र प्रस्तुतेन कारणत्वरूपलिङ्गेन ब्रह्मणः सिद्धौ मानान्तरसिद्धे ब्रह्मणि न शास्त्रस्य प्रामाण्यमिति ब्रह्मविषयवेदान्तविचारशास्त्रस्यानारम्भणीयत्वमापतेत् । यादृशं ब्रह्म प्रतिपाद्यते शास्त्रेण तादृशस्य ब्रह्मणो नानुमानेन सिद्धिः । अनुमानेन चेतनकारणकत्वमात्रं सिद्धयेज्जगतः कार्यस्य ; न वेदान्तिसंमतैकचेतनविशेषकारणकत्वम् । अभिन्ननिमित्तोपादानं वस्तुपरिच्छेदरहितमेकं ब्रह्म वेदान्तसंमतं नानुमानेन सिद्धयेत् ॥

ब्रह्मणः शास्त्रैकयोनित्वं वेदान्तमीमांसाशास्त्रारम्भसमर्थने हेतुः । 'तस्मात्पञ्चम्यन्ततया प्रयुज्यमानं हेतुद्वयतामापन्नमपि विविक्तसाध्यमलभमानम्' इति भवदुक्तिरमूला । वेदान्तमीमांसाशास्त्रारम्भस्य साधकत्वादस्य हेतोः । शास्त्रैकयोनित्वाच्छास्त्रयोनित्वं सिद्धयेत् । पञ्चम्यन्तस्य कुतश्चिदन्वयार्थं साध्यमर्थतः शब्दतो वा सर्वैरन्वेष्टव्यम् । ब्रह्मणि शास्त्रस्य प्रामाण्यं द्वेधाऽऽक्षिप्यते । मानान्तरप्राप्तत्वेन प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहादप्रयोजनत्वेन च । मानान्तरप्राप्तत्वाभावोऽत्र सूच्यते । शास्त्रपदस्यावधारणगर्भत्वं भवदीयानामिष्टम् । एक एव हेतुरत्र । न हेतुद्वयं समासद्वयाश्रयणेन । जगत्कारणत्वकथनेनावगतस्य सार्वज्ञ्यस्यात्र शास्त्रयोनित्वकथनेन दृढीकरणकथनमतीव मन्दम् । अत्र श्रुतप्रकाशिकाचन्द्रिकाद्युक्ता दोषा अवधेयाः । अस्यार्थस्य मन्दतां मत्वात्तारुच्या वर्णकान्तरमा-

---

*'अनुमानं ज्ञातसम्बन्धस्य ...असन्निकृष्टेऽर्थे बुद्धिः । शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे । 'चोदना' इति शाबरभाष्यस्थ 'असन्निकृष्ट' पदाभिप्रायप्रदर्शनपरोऽयं श्लोकः' इति श्लोकः श्रुतप्रकाशिकायामुदाहृतः ।

श्रितं भगवत्पादैरिति मन्महे । द्वितीयवर्णकेनैव सङ्गतिर्वर्ण्यते उत्तराधिकरणस्य भवदीयग्रन्थेषु । प्रथमवर्णकस्य तेन सङ्गतिर्मृग्यैव ॥

अत्र 'शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः' इति भाषितं भगवत्पादैः । शास्त्रशब्दस्यावधारणगर्भता तत्संमता । अवधारणस्य मानान्तरयोनित्वनिरसनपरता नापह्नोतुं शक्या । एवं चास्मदुक्तार्थो भगवत्पादसंमतः ॥

'यथा च सामान्यतोदृष्टानुमानं ब्रह्मणि न प्रवर्तते, तथोपरिष्टान्निपुणतरमुपपादयिष्यामः' इत्येतदधिकरणभामत्या वेदान्ताविवक्षितब्रह्मणोऽनुमानागम्यत्वमुक्तम् । तदेव वर्णितं श्रीभाष्येऽस्मिन्नधिकरणे ॥

अस्याधिकरणस्य पूर्वसूत्रस्यानुमानप्रदर्शकतापरत्वशङ्कानिरसनप्रयोजनत्वकथनं न निपुणम् । तथार्थवर्णने विषयप्रयोजनसंशयपूर्वपक्षसिद्धान्तवत्त्वरूपाधिकरणत्वमस्य दुरुपपादमेव । अधिकरणलक्षणमेव हीयेतास्याधिकरणस्य । नात्र तात्पर्यं भगवत्पादानां यथा भवन्तो मन्यन्ते । 'यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत्स्वरूपाधिगमे ।' 'शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः' इति च भाषमाणास्तेऽस्मदुक्तरीत्यैवाधिकरणशरीरवर्णनं रोचयन्ते । शास्त्रैकयोनित्वमित्यवधारणगर्भत्वेन व्याख्यानं तैः स्पष्टं कृतं शास्त्रादेवेति वदद्भिः । 'अत्रापि यतो वा इत्यादिवाक्यद्वारा शास्त्रं विषयः । .... किं सामान्यतोदृष्टमनुमानं जीवविलक्षणमवगमयति, उत नेति' इत्युक्तं श्रुतप्रकाशिकायामेतदधिकरणारम्भे । 'शास्त्रमुदाहृतं पूर्वसूत्रे यतो वा इत्यादिः' इति भाषमाणा भगवत्पादा अप्यत्रैकण्ठाः ॥

'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' इति श्रुत्या वेदरूपशास्त्रस्य ब्रह्मनिःश्वसितत्वं वर्ण्यते । 'निश्वसितेनैव प्राणन्ति चेतनाः । शास्त्रेण प्राणिति चेतनं ब्रह्म । यथा निःश्वसितं विना । स्वास्थ्यसिद्धिस्तथा शास्त्रं

विना ब्रह्मणोऽसिद्धिरिति श्रुत्यभिप्राय इव । प्राणस्य प्राणं प्रति प्राणवत्ताप्रयोजकत्वमिव । शास्त्रस्य ब्रह्मसत्ताप्रयोजकत्वप्रदर्शने श्रुतितात्पर्यमिव । इदं स्वारस्यं प्रदर्शयितुं योनिशब्दः प्रयुक्त इव सूत्रकारेण । 'भूतयोनिः' इति श्रुतस्य जन्मादिकारणस्यापि ब्रह्मणः शास्त्रं योनिरिति वेदान्तशास्त्रे निरतिशयं गौरवं सूच्यते सूत्रकारेण । अस्य विश्वस्य जन्म यतस्तस्य ब्रह्मणो जन्म शास्त्रात् । 'अध्यात्मविद्या विद्यानाम्' 'राजविद्या राजगुह्यम्' 'विद्यान्या शिल्पनैपुण्यम्' 'वेदान्तशास्त्रात्परं नास्ति' इत्यादिवचनान्यत्र स्मर्तव्यानि ॥

'शास्त्रारम्भोपोद्घातपेटिकायां प्रतीतिप्रजननार्थाऽवान्तरपेटिका पूर्वसूत्रद्विकम् । तात्पर्यलिङ्गसमर्थनार्थोत्तरपेटिकाऽत्र प्रारभ्यते । तत्राप्राप्तत्वलक्षणं तात्पर्यलिङ्गं तृतीयसूत्रे । सफलत्वलक्षणं चतुर्थे'

इति क्रमस्वारस्यप्रदर्शनमधिकरणचिन्तामणौ ॥

'हेत्वन्तरसमर्थनाच्चात्राधिकरणान्तरत्वम्' इति कल्पतरूक्तिः, 'सिद्धहेत्वन्तराभिधाने ह्येकाधिकरण्यम्, इह शास्त्रयोनित्वहेतुः प्रसाधनीय इति तदर्थमधिकरणान्तरमित्यर्थः' इति व्याख्याता परिमले । एवमधिकरणभेद एव समर्थितस्ताभ्यां प्रथमवर्णकेऽपि । असिद्धस्य शास्त्रयोनित्वहेतोः साधनं न हेत्वन्तरेण क्रियते सूत्रेण । शास्त्रैकगम्यत्वाद्ब्रह्मणः शास्त्रस्यापूर्वार्थप्रतिपादकत्वलक्षणं प्रामाण्यमस्तीति वयम् । शास्त्रयोनित्वं हेतुः । अवधारणेन प्रमाणान्तरागम्यत्वं हेतुत्वेन विवक्षितम् । तेन शास्त्रारम्भसमर्थनम् । नात्र कस्यापि चोद्यस्यावकाशः ॥

निर्विशेषसन्मात्रस्य शास्त्रादन्यतोऽसिद्धिरिति विवरणोक्तिः । प्रत्यक्षस्य निर्विशेषसन्मात्रविषयतोक्तिस्तद्विरुद्धा ॥

समन्वयाधिकरणम् ॥

तत्तु समन्वयात् ॥

'सिद्धं न शास्त्रार्थः' इति कर्ममीमांसकप्रत्यवस्थाननिरासपरत्वेन भवद्भिरेतदधिकरणमवतारितम् । एतावतात्र ब्रह्मान्यस्य प्रपञ्चस्य भवदीयग्रन्थेषु मिथ्यात्ववर्णनं विस्तरशः कृतं न सूत्रानुग्रहं भजत इति स्फुटम् । नात्र सविशेषपरत्वेन पूर्वपक्षो वर्णितो मीमांसकेन पूर्वपक्षिणा । अत्र सविशेषब्रह्मवादनिराकरणस्य का प्रसक्तिः ? अत्र पूर्वमीमांसकः पूर्वपक्षीति भवत्संमतं वर्णकद्वयेऽपि । सिद्धस्य शास्त्रार्थत्वसाधने तस्य निर्विशेषत्वोपपादनं नैवोपयुज्यते । सिद्धत्वं न निर्विशेषत्वव्याप्तम् ॥

'संसर्गासङ्गि....धीहेतुता या गिरामियम् ।
उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता ॥'

इति भवन्मतााभिमतस्य सर्वतान्त्रिकप्रतिषिद्धस्याखण्डवाक्यार्थस्य नात्र बोधनं दृश्यते सूत्रे । शास्त्राणां तादृशार्थपरत्वेऽन्वय एव न घटेत ; किमुत समन्वयः । अन्वयशब्दः संबन्धवाचक इति प्रसिद्धम् । 'अन्वयात् संबन्धात्' इत्यस्मिन्नधिकरणे श्रीसदाशिवेन्द्राः । 'समन्वयशब्देन तात्पर्येण संबन्ध उच्यते' इति श्रीकण्ठभाष्यम् । सौत्रो हेतुर्भवदभिप्रेतसंसर्गशून्यार्थस्य प्रथमपरिपन्थी भवति । न केवलमत्यन्ताप्रसिद्धसंसर्गशून्यार्थस्यावाचकत्वं सौत्रहेतोः ; किन्तु तद्विरुद्धार्थवाचकत्वमपि ॥

'कार्यान्वयं विना सिद्धरूपे ब्रह्मणि मानता ।
पुरुषार्थे स्वयं तावद्वेदान्तानां प्रसाधिता ॥'

इति समन्वयाधिकरणनिर्णीतार्थोऽनूदितो भामत्यामीक्षत्यधिकरणारम्भे । 'स्वयं पुरुषार्थे' इति संबन्ध इति तद्व्याख्याने कल्पतरुः । स्वयं पुरुषार्थे ब्रह्मणि कार्यान्वयं विना वेदान्तानां समन्वयोऽधिकरणार्थ इति तयोर्भावः । अयमेव श्रीभाष्योक्तोऽर्थो यं भवन्तः प्रद्विषन्ति । स्वारस्यशरणाभ्यां भामती-

कल्पतरुकृद्भ्यां श्रीभाष्यरीतिविशदता । स्वयं पुरुषार्थे सिद्धे ब्रह्मणि कार्यान्वयं विना वेदान्तवाक्यानां मानताऽस्मदभिप्रेतैव । प्रयोजननिर्वर्तकतया ध्यानविधिशेषत्वेनापि ध्यानफलदातृत्वेन स्मृतिमात्रेण सुखरूपत्वेन प्राप्यतया च ब्रह्मणः प्रयोजनत्वम् ॥

यद्भाषितं व्यामिश्रतयैव भगवत्पादैरधिकरणत्रये तदेव विभज्य तत्तदधिकरणे प्रदर्शितं श्रीभाष्यकारैः । एतदुपपादयामः । जन्माद्यधिकरणे 'ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणाऽनर्थिकैव प्राप्ता । न । इन्द्रियाविषयत्वेन संबन्धाग्रहणात् ।....सति हीन्द्रियविषयत्वे इदं ब्रह्मणा संबद्धं कार्यमिति गृह्येत । कार्यमात्रमेव तु गृह्यमाणं किं ब्रह्मणा संबद्धम् ; किमन्येन केनचिद्वा संबद्धमिति न शक्यं निश्चेतुं इति भाषितम् । इदं ब्रह्मणः प्रत्यक्षानुमानरूपमानान्तरासिद्धत्वं शास्त्रयोन्यधिकरणे वर्णितं श्रीभाष्यकारैः । एतच्छास्त्रयोनित्वमूल एव साक्षात्सङ्गतम् । अत्रोक्तमनुसृत्य भाषितं शास्त्रयोन्यधिकरणे 'शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः' इति ॥

'न हि परिनिष्ठितवस्तुप्रतिपादनं संभवति । प्रत्यक्षादिविषयत्वात्परिनिष्ठितवस्तुनः' इति समन्वयाधिकरणावतरणे ब्रह्मणो मानान्तरगम्यत्वशङ्का भाषिता भगवत्पादैः । तच्च शास्त्रयोन्यधिकरणे साक्षात्सङ्गतम् । प्राचीना गहना भगवत्पादभाष्यगतिः । तेषामाशयमबुद्ध्यमाना एव भवन्तो वृथा श्रीभाष्यकाराणां वर्णनं दूषयन्ति भाष्यकारयोरेकाभिप्रायस्थलेष्वपि । 'विशुद्धोपन्यासैर्व्यतिभिदुरशारीरकनयाः' इत्युक्तरीत्या श्रीभाष्यकारास्तत्तदधिकरणे तत्तद्विभज्य भाषन्ते ॥

परिनिष्ठितवस्तुभूतत्वाद्ब्रह्मणस्तद्विषये निरपेक्षत्वलक्षणप्रामाण्यं हीयेत शास्त्रस्येति पूर्वपक्षो वर्ण्यतेऽस्मिन्नधिकरणे भवदीयैः सर्वैः । 'भूतार्थत्वेन च प्रत्यक्षादिभिः समानविषयतया लौकिकवाक्यवत्तदर्थानुवादनकत्वेनाप्रामाण्य-

प्रसङ्गात्। न खलु लौकिकानि वाक्यानि प्रमाणान्तरविषयमर्थमवबोधयन्ति स्वतः प्रमाणम् । एवं वेदान्ता अपीति निरपेक्षत्वलक्षणं प्रामाण्यं व्याहन्येत' इत्यस्मिन्नधिकरणे भामती । 'न खलु परिनिष्ठितवस्तुप्रतिपादनं सम्भवति, प्रत्यक्षादिविषयत्वात्परिनिष्ठितवस्तुनः' इत्येतदधिकरणोपक्रमे भगवत्पादाः । 'सिद्धब्रह्मपरत्वे निष्प्रयोजनत्वसापेक्षत्वप्रसङ्गात्' इति पूर्वपक्षो वर्णितः श्रीसदाशिवेन्द्रैः । सैव रीतिर्भवदीयसर्वग्रन्थेषु । प्रत्यक्षानुमानगम्यत्वं ब्रह्मणः पूर्वाधिकरण एव निरस्तम् । अतः सापेक्षत्वपूर्वपक्षस्यात्रानपेक्षैव ॥

सिद्धे शक्तिग्रहस्य प्रथमसूत्र एव समर्थितत्वात्प्रवृत्तिनिवृत्तित्वविरहप्रयुक्तातात्पर्यशङ्कैव शिष्यते निरसनाय । अत्र प्रवृत्तिनिवृत्तित्वरूपान्वयरहितस्य सिद्धब्रह्मणो बोधनस्याप्रयोजनत्वात्तद्विषये शास्त्रस्य तात्पर्याभावः ततस्तस्य शास्त्रप्रतिपाद्यत्वेनानन्वय इति पूर्वपक्षप्रदर्शनं दृश्यते भवदीयसर्वग्रन्थेषु। अयमेव श्रीभाष्यप्रदर्शितः पूर्वपक्षः। 'भूतमभिदधतां वेदान्तानामपुरुषार्थोपदेशिनामप्रयोजनत्वापत्तेः।' इत्यत्र भामती । 'सिद्धवस्तुबोधात्फलभावाभावाभ्यां संशयः' इति कल्पतरुः । 'तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात्' इति भगवत्पादाः । 'ब्रह्म न वेदान्तप्रतिपाद्यम्, प्रवृत्तिनिवृत्त्यविषयत्वेन निष्फलत्वात्तात्पर्यासम्भवात्' इति श्रीब्रह्मानन्दाः । 'प्रवृत्तिनिवृत्त्यभावेन फलाभावात्' इति न्यायरक्षामणिः । पुरुषार्थतया ब्रह्मणः शास्त्रप्रतिपाद्यत्वरूपसम्बन्धबोधनेनैवास्य पूर्वपक्षस्य निरासः शक्यः, यथा भाषितं श्रीभाष्यकारैः; यथा चोक्तमुदाहृतभामतीकारिकायाम्, कल्पतरौ; परिमळे च। अप्रयोजनत्वादनन्वये पूर्वपक्षिते सप्रयोजनत्वादन्वय इत्येव वक्तव्यम्। इदमजानद्भिर्भवद्भिः कृतं दूषणं मिथ्यैव । अत्र निर्विशेषत्वबोधनं पूर्वपक्षं नैव निरस्येत्। निर्विशेषत्वसूचकं किमपि पदं नास्ति सूत्रे। सविशेषत्वं नोपपादितं पूर्वपक्षिणा ।

समन्वय इत्यत्र संशब्दस्य सम्यगित्यर्थ इति सम्प्रतिपन्नम्। 'अपु-

रुषार्थतया' इति पूर्वपक्ष्युक्तहेतोः प्रतिकोटितया प्रयुक्तः संशब्दः । तस्य पुरुषार्थतयेत्येवार्थवर्णनं सङ्गच्छेत । तथैव वर्णितं श्रीभाष्यकारैर्भामतीकल्पतर्वादिभिश्च । वृथैव भवन्तः श्रीभाष्यार्थं निरासिसिषन्ति ॥

अपुरुषार्थत्वादतात्पर्यमित्युक्ते भवदभिमतरीत्या तात्पर्येणान्वयादित्युक्ते पूर्वपक्षानिरास एव ॥

संशब्दस्यास्त्यन्यदपि स्वारस्यम् । क्लेशरूपकर्मण्यन्वय इष्यते पूर्वपक्षिणा । कर्मणो बहुव्यवधानेन परम्परया सुखप्रदत्वात् । स्मरणमात्रेण सर्वसुखप्रदे ब्रह्मणि सम्यगेवान्वयः संभवेत् । 'यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् । विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥' इति प्रत्यहं सादरं जपे भगवत्पादैः ॥

शास्त्रचोदितस्य कर्मणो न प्राप्यत्वं स्वप्राप्तिसाधनत्वं च । 'मुक्तानां परमा गतिर्ब्रह्म ।' परायणं ब्रह्म । ब्रह्मप्राप्तिः पुरुषार्थकाष्ठाभूतमोक्षः । अध्वपारभूतब्रह्मप्राप्तिः परप्राप्तिः । शास्त्रचोदितस्य कर्मणो नानन्दत्वम् , भोग्यत्वं वा । ब्रह्मणस्त्वानन्दघनत्वेन परमभोग्यत्वम् ॥

प्रथमसूत्रे भवद्भिर्जीवब्रह्मैक्यं शास्त्रस्य विषय इति सिद्धवत्कृत्य तत्संभवासंभवरूपविचारः प्रवर्तितः । अत्रापि तत्सिद्धवत्कृत्य भाष्यते 'न ह्येकत्वविज्ञानोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोऽस्ति । येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपद्येत' इति । नास्यार्थस्य कथञ्चिदपि सूचनं दृश्यते सूत्राक्षरेषु ॥

उपासनविधिशेषत्वे ब्रह्मणः, उपासनफलं कर्मसाध्यफलवत्सातिशयमनित्यं स्यादित्यापाद्यते भाष्ये । ब्रह्मोपासनेन ब्रह्मप्राप्तिः, शोकतरणं चोच्यते श्रुत्या । ब्रह्मनिष्ठस्य मोक्षः फलत्वेन सूच्यते । 'एष ह्येवानन्दयाति' 'तद्धेतुव्यपदेशाच्च' इति श्रुतिसूत्राभ्यां ब्रह्मण आनन्दयितृत्वमुक्तम् । 'अस्मिन्नस्य च तद्योगं शास्ति' इति तन्निष्ठस्यानन्दयोगः सूचितः । वेदनमुपासनं

पर्यायशब्दाविति स्पष्टं भाषितं भगवत्पादैरावृत्त्यधिकरणे । ब्रह्मवेदनस्यानन्तफलत्वं शास्त्रैरुपदिष्टम् । कर्मफलन्यायेनोपासनफलस्यानित्यत्वापादनं प्रत्यक्षशास्त्रोपदेशविरुद्धम् । वचनविरोधे न न्यायावकाशः । ब्रह्मोपासनस्य क्रममुक्तिद्वारा परमफलप्राप्तिर्भवद्भिरुच्यते । उपासनेन क्रममुक्त्यानावृत्तिर्भवद्भिरुच्यते । अत उपासनफलं भवन्मतरीत्यापि नित्यम् । सर्वकर्मफलातिशायिना उपासनफलेन मीमांसककृतोऽप्रयोजनत्वपूर्वपक्षः किं न निरस्तो भवति ॥

'अनियमः सर्वेषाम्' इति सर्वविद्यानिष्ठानामर्चिरादिगतिद्वारा ब्रह्मप्राप्तिः सूत्रिता । 'विकल्पोऽविशिष्टफलत्वात्' इति सर्वविद्यानिष्ठानां फलाविशेषः सूचितः । सर्वासु विद्यासु गत्यन्वयोऽस्त्यविशेषेणेति सूत्रकृत् । न सर्वास्विति भवन्तः । विद्यानामेकफलत्वमिति सूत्रकृत् । भिन्नफलत्वमिति भवन्तः । भाविस्वराट्त्वमेव भूयः प्रदर्शयन्ति भवन्तो व्याख्यातृभावेऽपि ॥

ब्रह्मज्ञानक्षणे मुक्तिं भवन्तो वदन्ति । तच्च प्रत्यक्षेण विरुध्यते । 'बुद्धे क्षेमप्रापणम् । तच्छास्त्रैर्विप्रतिषिद्धम् । बुद्धे चेत्क्षेमप्रापणमिहैव न दुःखमुपलभेत । इति सूत्रयन्भगवानापस्तम्बोऽप्यत्र भवद्वर्णितार्थपरिपन्थी । दृष्टविधया सर्वसंसारोच्छेदं फलत्वेन वर्णयतां भवतां दृष्टविरोधो दुष्परिहरो दोषः । अत्र प्रपञ्चमिथ्यात्ववर्णनस्य प्रसक्तिरेव नास्ति सूत्रपदैस्तत्सार्थस्य कथंचिदपि सूचनं नास्ति ॥

सम्यगन्वयः समन्वयः । पुरुषार्थतयान्वय इत्यर्थः । 'परमपुरुषार्थभूतस्य निरवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयान्वयात्तच्छास्त्रप्रमाणकत्वं सिद्ध्यत्येवेत्यर्थः' इति श्रीभाष्यम् । 'ब्रह्म शास्त्रप्रमाणकमिति प्रतिज्ञाते सति पक्षनिष्ठतया हेतोर्वक्तुमुचितत्वात्समन्वयो ब्रह्मकर्तृकतया व्याख्यातः । न तु शास्त्रकर्तृकतया' इति श्रुतप्रकाशिकायामेवं सूत्रयोजने स्वा-

रस्यमुक्तम् । एवमेव समन्वितो ह्यौपनिषदः पदसमुदायः 'यतो वा इमानि' इत्यादिरित्यव्यवहितानन्तरवाक्यं श्रीभाष्ये । 'औपनिषदः पदसमुदायः परमपुरुषार्थभूते ब्रह्मणि प्रतिपादकत्वेन समन्वित एव हीत्यर्थः।........ समन्वित इति वाक्यकर्तृकत्वेनोक्तिः फलितार्थाभिप्राया । न तु सूत्रयोजनाभिप्राया' इति तत्र श्रुतप्रकाशिका । 'श्रीभाष्येऽभिधेयतयान्वयात्' इत्यस्य 'अभिधेयत्वलक्षणान्वयादित्यर्थः । ततश्चान्वयशब्दस्याभिधेयत्वलक्षणोऽन्वयोऽर्थः । समित्यस्य परमपुरुषार्थरूपत्वं विवक्षितम् ।' इत्यत्र श्रीरङ्गरामानुजमुनीनां भावप्रकाशिका ॥

अन्वयशब्दः संबन्धवाचकः । अत्रान्वयशब्देनाभिधेयस्वरूपसंबन्ध उच्यते । ब्रह्मणः शास्त्रेणाभिधेयतया संबन्धः । शास्त्रस्य च ब्रह्मणाभिधायकत्वेन प्रतिपादकत्वेन संबन्धः । संबन्धश्च द्विनिष्ठः । शास्त्रब्रह्मणोः प्रतिपाद्यप्रतिपादकरूपसंबन्ध एवात्र साध्यः । समिति संबन्धसाधने हेतुसूचनम् ॥

वर्णकद्वयं वर्णितं भगवत्पादैरेतत्सूत्रार्थत्वेन । सिद्धब्रह्मणि शक्तिग्रहसंभवो द्वितीयवर्णके सिद्धान्तितः । 'अन्वयात्' इत्यस्य संबन्धार्थकत्वेनैव तत्र सिद्धान्तहेतूपन्यासः शक्यः ॥

अत्र प्रतिज्ञायमानः समन्वयोऽस्मिन्समन्वयाध्याये प्रायेण प्रतिपाद्यते । उपास्ये ब्रह्मण्यस्मिन्नध्याये भूयः समन्वयः प्रदर्श्यते सूत्रकृता भवव्द्याख्यानरीत्यापि । 'विवक्षितगुणोपपत्तेश्च' इत्यादिसूत्रैरुपास्यगुणविशेषेषु शास्त्रस्य विवक्षा स्पष्टं सूच्यते । वक्ष्यमाणविरोधेनात्र भवद्वर्णितं निर्गुणनिर्विशेषसमन्वयं कः श्रद्धास्यति । उत्तरत्र वक्ष्यमाणानुरोधेन खल्वत्र प्रतिज्ञातस्य समन्वयस्यार्थो वर्णनीयः ॥

'तत्तु समन्वयात्' 'तद्ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते । सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्या-

र्थस्य प्रतिपादकत्वेन समनुगतानि' इति समन्वयशब्दार्थो भाषितो भगवत्पादैः प्रथमवर्णकसिद्धान्तारम्भे । स्वारस्यशरणैस्तैः सर्वज्ञत्वसर्वशक्तित्वादिविशिष्टे ब्रह्मण्येव समन्वयोऽभ्युपगतः । 'एतस्यार्थस्य' इति तदुक्तिः पूर्ववाक्योक्त-सविशेषब्रह्मैव परामृशति ॥

'ब्रह्म च सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिविनाशकारणमित्युक्तम्' इति पूर्वनिर्णीतार्थानुवादो भगवत्पादानामीक्षत्यधिकरणारम्भे । "ब्रह्मजिज्ञासां प्रतिज्ञाय 'जन्माद्यस्य यतः' इति तत्तु समन्वयादित्यन्तेन सूत्रसन्दर्भेण सर्वज्ञे सर्वशक्तौ जगदुत्पत्तिस्थितिविनाशकारणे प्रामाण्यं वेदान्तानामुपपादितम्" इति तत्र भामती । अस्मिन्नर्थे ऐककण्ठ्यमेव तयोः श्रीभाष्यकारैः । स्वोक्तविरोधेन क्वचित्क्वचिन्निर्विशेषत्वभाषणमेव तैर्विरुद्ध्यते । प्रत्यगभिन्ननिर्विशेषब्रह्मणि समन्वये इष्यमाणे भूयः उत्तरत्र शारीरब्रह्मभेदसूत्रणं व्याहन्येत ।

पूर्वाधिकरणे तात्पर्यलिङ्गत्वेन सर्वसम्मतमपूर्वत्वमुपपादितम् । अत्र सफलत्वरूपतात्पर्यलिङ्गमुपपाद्यत इति वयम् । स्वरूपस्यानन्दघनत्वेनानुकूलतमस्य ब्रह्मणः प्राप्यत्वेन बोधने स्वरूपपरवाक्यैः कृते, कस्तत्प्राप्त्युपाय इत्युपायजिज्ञासायां तदुपासनं तत्प्राप्त्युपाय इति बोधयन्त्युपासनवाक्यानि । उभयविधवाक्यानामपि प्रयोजनपर्यवसायित्वं स्पष्टम् । तव गृहे निधिरस्तीति स्वगृहे निधिसत्त्वावबोधकं वाक्यं प्रयोजनपर्यवसाय्येव । 'ते हृदयगुहायां निहितं सत्यं ज्ञानमनन्तमानन्दमयं ब्रह्म' इति बोधयद्वाक्यं स्वतःप्रीतिकरमेव । उपास्यगुणादिसमर्पकाणां वाक्यानां न मिथ्यागुणप्रतिपादकत्वम् । उपास्यगुणेषु विवक्षास्तीति सूत्रितम् 'विवक्षितगुणोपपत्तेश्च' इति शाण्डिल्यविद्याविषयसूत्रेण ॥

"कर्तव्ये ह्यर्थ उक्ते निशमयितृफलं सिद्धरूपे तु न स्या-
त्प्रीत्या साफल्यक्लृप्तौ वितथमपि वचः किं न दृष्टं सदर्थम् ।

विध्यर्थित्वेऽन्यदृष्टेर्विषयवदनृतं तत्परीक्ष्यं न भावी-
त्याक्षेपेऽनन्यशेषे निरवधिकसुखे शास्त्रतात्पर्यमाह ॥"

इत्यधिकरणसारावल्यां स्वरूपपरवाक्यसमन्वयप्रदर्शनम् । स्वरूपपरवाक्यानां विधिशेषत्वं विनैव स्वातन्त्र्येण प्रयोजनपर्यवसायित्वम् ॥

"तात्पर्यं ब्रह्मतत्त्वेऽप्यवहतिविधिनाप्येकवाक्यत्वपक्षे
भेदेऽपि स्यादसिद्धेर्न भवति बलिभुग्दन्तसंख्योक्तिसाम्यम् ।
स्वादार्थत्वं मृषात्वक्षममिति न मृषेत्यूहने प्रीत्ययोगा-
द्बालेपच्छन्दनादिष्वपि विषयतथाभावबुद्ध्यैव हर्षः ॥
यत्प्रीत्यर्थं वचस्तन्निखिलमनृतमित्यर्भकप्रायवाक्यं
सत्योक्त्यानन्ददृष्टेर्न च विहतिरिहाद्धचक्षतः शास्त्रतो वा ।
तेनानन्यार्थसिद्धोक्त्यनृतविषयताशङ्कनस्तम्भनेन
त्रय्यन्ताः सत्यनित्याद्भुतसुखपरमब्रह्मनिष्ठाः प्रमाणम् ॥"

इत्यपि तत्रोक्तमवधेयम् । ध्यानविधिशेषत्वेऽपि ब्रह्मणः प्रयोजनतयान्वयोऽस्त्येव । 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इत्याद्युपासनविधायकवाक्यानि ब्रह्मणो निरतिशयानुकूलत्वाद्याकारं बोधयन्ति । सुखविशिष्टाभिधानादेव चेत्यादिसूत्रं प्रदर्शनमस्मिन्नर्थे प्रमाणम् । तत्सूत्रं 'सगुणत्वेन भवदभिमतोपकोसलविद्याविषयम्' । ब्रह्मज्ञानस्य निरतिशयानन्दरूपत्वं सर्वास्तिकलोकप्रसिद्धम् । भवतां प्रसिद्धं चेति वयं मन्महे । प्राज्ञेनात्मना गाढपरिष्वङ्ग एव ब्रह्मसंपत्तिः । विगलितवेद्यान्तरस्तद्योग एव निरतिशयपुरुषार्थः । ब्रह्मध्यानस्य स्वयं फलरूपत्वादेव फलाध्याये तस्य प्रथमकीर्तनमावृत्त्यधिकरणे । 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इति भगवता स्वस्य निरतिशयप्रियत्वमुक्तम् । इदं च सुविशदं वर्णयति प्राचेतसो रामविरहे जानपदानां शोकवर्णनावसरे । 'पुत्रं प्रथमजं लब्ध्वा जननी नाभ्यनन्दत' 'व्यसृजन्कवळान्नागा गावो वत्सान्न पाययन्' । 'राघवं

वानुगच्छध्वं अश्रुतिं वापि गच्छत' इति पत्न्यो भर्तॄन्प्रति । मुक्तिं ददा-न्मुकुन्दो न भक्तिमिति शुकः ॥

अत्र भवदुक्तं प्रतिवदामः—'तत्र पदसमन्वयो वाक्यसमन्वयः, तथा पदार्थसमन्वयो वाक्यार्थसमन्वय इत्यस्ति तान्त्रिकव्यवहारः । न तु ब्रह्मणः समन्वयः कर्मणः समन्वय इति समस्ति व्यवहारः । अभिधेयतया ब्रह्मणोऽन्वयोऽपि पदेष्विति वक्तव्यम् । तत्रापि न ह्यस्ति घटस्य पदेष्वन्वयः । पटस्य वाक्येष्वन्वय इति समञ्जसो व्यवहार इतीदमपि परिहास्यमेव ।' इति भवदुक्तिरतीव विचित्रा । अन्वयादित्यस्य संबन्धादिति भवदीय-ग्रन्थसंप्रतिपन्नोऽर्थ इति पूर्वमेव प्रदर्शितम् । अभिधेयत्वलक्षणसंबन्धोऽत्रा-भिप्रेत इति पूर्वमेवोक्तं श्रुतप्रकाशिकाभावप्रकाशिकाग्रन्थोक्तीरुदाहृत्य । 'ब्रह्मणोऽभिधेयत्वलक्षणसंबन्धात्' इत्येव श्रीभाष्यार्थः । काऽत्रानुपपत्तिरता-न्त्रिकता वा ? हेतोः पक्षनिष्ठत्वोपपादनायाभिधेयत्वसंबन्धरूपान्वयस्य ब्रह्म-निष्ठतयोपपादनं कृतमिति चोक्तम् । अनन्तरवाक्ये शास्त्रस्य ब्रह्मप्रतिपादने तात्पर्यं स्पष्टं भाषितम् । अत्रैव भवन्तो व्यवहरन्ति 'तेन कर्मोपासनयोरन्वय एव, न समन्वयः ।' यदि कर्मणोऽन्वयः उपासनस्यान्वय इति व्यवहारः साधुः, कर्मणः समन्वय इत्यादिव्यवहारोऽपि साधुरेव । 'यदि कर्मणो न समन्वयः' इति भवद्व्यवहारः साधुः, कर्मणः समन्वय इत्यपि व्यवहारः सा-धुरेव । संशब्देन पुरुषार्थतयेति हेतुरेव वर्णितः । ब्रह्मणः समन्वय इति ब्रह्मपदप्रतिपाद्यार्थस्य समन्वय इत्येवार्थः । 'सर्वज्ञे जगत्कारणे समन्वयप्र-दर्शनेन—' इति कल्पतरुः । 'वेदान्तवाक्यानां ब्रह्मात्मनि समन्वितानां—' इति भगवत्पादा ईक्षत्यधिकरणारम्भे । 'लक्षणसमन्वयः' इति व्यवहारे लक्षणरूपस्यार्थस्यैव लक्ष्ये अन्वय उच्यते ॥

'किं च शास्त्रतात्पर्यविषयत्वमेव वक्तव्यम् । तत्र पुरुषार्थतयान्वयः क्वोपयुज्यते' इति भवत्प्रश्नः । प्रवृत्तिनिवृत्त्यन्वयविरहान्निष्प्रयोजनत्वात्तात्पर्या-

भवः पूर्वपक्षितः । प्रवृत्तिनिवृत्त्यन्वय एव पुरुषार्थत्वमिति पूर्वपक्ष्याशयः । तदन्वयं विना पुरुषार्थत्वबोधेनैव तत्पूर्वपक्षनिरासः संभवेदिति मतद्वय-ग्रन्थोक्त्युदाहरणेन पूर्वमेवोपपादितम् । भामतीकल्पतरूक्तिश्चोदाहृता ॥

'न ह्यपापश्लोकश्रवणादिकं तथान्वीयमानमपि तात्पर्यविषयो भवति । कर्मण्येव तात्पर्यात्' इति भवदुक्तिः ॥ चतुर्थतृतीयप्रथमाधिकरणे 'फलं हि साध्यं भवति । न चात्र साध्यता प्रतिभासते । न शृणोतीति वर्तमान-तानिर्देशात् । पर्णमयीत्वस्यानारभ्याधीतस्यापि वाक्येन क्रतुसंबन्धः संस्का-रकर्मणोस्तु प्रकरणेन । क्रत्वर्थानान्तु निष्पादनव्यतिरेकेण फलाकाङ्क्षाया अभावात् वर्तमाननिर्देशस्य विपरिणामं कृत्वापि फलं कल्पयितुं शक्यम् ।' इत्युक्तं न्यायमालायाम् । तत्र फलविषये आकाङ्क्षाभावादनन्वय उक्तः । अप्रयोजनत्वादतात्पर्यविषयत्वे पूर्वपक्षिते सप्रयोजनत्वोक्त्या पूर्वपक्षहेतोरसि-द्धिमात्रमुच्यते सूत्रकारेण । न तु यस्य यस्य प्रयोजनवत्त्वसंभवस्तस्य तस्य शास्त्रतात्पर्यविषयत्वमिति व्याप्तिरभिप्रेयते । जुहूसमभिव्याहाररूपेण वाक्येन पर्णमयत्वस्य क्रतूपकारकत्वरूपप्रयोजनलाभेन शान्ताकाङ्क्षत्वात् अपाप-श्लोकश्रवणरूपार्थवादिकफलेन नान्वयाकाङ्क्षा । ब्रह्मस्वरूपवाक्यानान्त्वनन्य-शेषतया ब्रह्मणः स्वयंप्रयोजनत्वबोधनम् । प्रयोजनपर्यवसाभावेन तात्पर्यावि-षयत्वे पूर्वपक्षिते प्रयोजनान्तरनिरपेक्षस्वयंप्रयोजनत्वेन तात्पर्यविषयत्वं सम-र्थ्यते । पुरुषार्थाधिकरणे भवत्पूर्वपक्षः सूत्रकृता निरस्यते । तत्र विद्यायाः क्रत्वर्थत्वं निरस्य पुरुषार्थत्वं सिद्धान्त्यते ।

'समन्वयादित्यत्रान्वयोऽनुगमनम् । पदानां परस्परसङ्गतार्थाभि-धानमित्यर्थः, समा, मुख्यं तात्पर्यं द्योत्यते । गौणस्यानुनैव लाभात् । कथंचिदपि तात्पर्याभावेऽनुगमनस्यैवाभावात् । तेन कर्मोपासनयोरन्वय एव; न तु समन्वयः । अत एव ब्रह्मबोधकवेदान्तानां प्रमा-णराजत्वम्; परमतात्पर्येण स्वार्थबोधकत्वात्' इति भवदुक्ति-

रतिविचित्रा । कर्मविधीनां कर्मणि मुख्यतात्पर्यं नास्तीति भवन्तं विहाय न कोऽपि ब्रूयात् । कर्मविधीनां कर्मसु गौणं तात्पर्यमिति भवदुक्तिः केनापि तान्त्रिकेण नानुमन्येत । 'न विधौ परः शब्दार्थः' इति प्रसिद्धो न्यायो भवद्भिर्विस्मृतः । गौणमुख्यभेद एव नाववुद्ध्यते भवद्भिः । मीमांसकैर्मुख्यमेव तात्पर्यं वर्ण्यते कर्मसु कर्मविधीनाम् । तन्न प्रतिषिध्यते वेदान्तिभिः । अक्रियार्थानां सिद्धब्रह्मस्वरूपसमर्थकवाक्यानां न ब्रह्मणि मुख्यतात्पर्यमिति तेषामाक्षेप एवात्र निराक्रियते । अस्मिन्नधिकरणे भगवत्पादभाष्ये वा, तद्व्याख्यानपरंपरासु वा कुत्रापि कर्मवाक्यानांमीमांसकोक्तकर्मणि मुख्यतात्पर्यं न प्रतिषिद्धम् ।भवन्त एव तस्य प्रथमप्रतिषेद्धारः । अत्यन्तममूलं भवद्वचनम् । सन्त्यनन्तानि लौकिकवाक्यानि; यानि परमतात्पर्येण स्वार्थबोधकानि । तेषामपि प्रमाणराजत्वं भवेद्भवदुक्तलक्षणान्वयात् । तात्पर्यशब्दस्यार्थ एवानवगत इव भवद्भिः । वक्तुरिच्छैव तात्पर्यम् । 'यद्यप्यपौरुषेये वेदे वक्तुरभावान्नेच्छार्थः संभवति; तथाप्युपादानेन फलेनोपचर्यते' इति 'विवक्षितगुणोपपत्तेश्च' इति सूत्रे भगवत्पादभाष्यम् । कर्मविधिषु कर्मानुष्ठानप्रवर्तनेन कर्मोपादानेच्छा व्यवह्रियते । कर्म आज्ञाप्यते वेदेन । तत्र वेदस्यातात्पर्यं भवानेव भाषेत । भवद्ग्रन्थोक्तिषु भवतां परमतात्पर्यमस्तीति भवद्ग्रन्थस्य नैव प्रमाणराजत्वं भवेत् । तस्य प्रमाणत्वमेव प्रामाणिका नानुमन्येरन् । 'नह्युपासनार्थं ब्रह्माभिधीयते । किं तु ब्रह्मज्ञानार्थमुपासनम्' इति भवदुक्तिः । यदि ज्ञानपदेन साक्षात्कारोऽभिमतो भवदुक्तमिष्टमेवास्माकम् । यदि श्रावणज्ञानम् । तस्योपासनार्थत्वमावृत्त्यधिकरणे भगवत्पादभाषितं भवदुक्तिमपुनरङ्कुरमुन्मूलयति । शास्त्राचार्योपदेशलब्धब्रह्मस्वरूपगुणादिज्ञानं विना कथं तदुपासनस्य संभवः ? उपासनं ब्रह्मप्रसादद्वारा परिपूर्णब्रह्मसाक्षात्काररूपमोक्षप्रापकम् । उपायोपेयोभयमपि ब्रह्मज्ञानमेव ॥

'अहहसिद्धमपि न मानान्तरवेद्यम् ; अथापि न शास्त्रवेद्यम् ; सा-

ध्यत्वाभावादिति साधारणजनपरिहासास्पदमपि हीदं भवति चोद्यम्' इति भवतामट्टहासरुचीनामुक्तिः । भवदुक्तेरर्थ एव न बुध्यते । सिद्धं परिनिष्ठितं भूतमिति सर्वसम्प्रतिपन्नोऽर्थः । सिद्धरूपं ब्रह्म न शास्त्रेतरवेद्यं शास्त्रैकवेद्यमिति सम्प्रतिपन्नम् । शास्त्रमपि न तत्र प्रमाणं भवेदिति पूर्वपक्ष्याक्षेपोऽर्थवादाधिकरणन्यायबलेन । शास्त्रयोनि ब्रह्मेति सूत्रकृन्मतविरोधेन ब्रह्मणः शास्त्राविषयत्वं भवदीयैरेवोच्यते समन्वयाधिकरणे । प्रपञ्चमिथ्यात्वं खलु शास्त्रस्य विषयो भवन्मते । वेदस्य मिथ्यात्वं खलु भवन्तो भाषन्ते । अस्मन्मते व्याघातप्रदर्शनमशक्यमेव ॥

'किं चोपास्यमेव भवतां प्रतिपाद्यम् । तच्चाक्रियात्वेऽपि भवति यूपाहवनीयादिवच्छास्त्रप्रतिपाद्यमिति नास्त्येवास्य चोद्यस्यावकाशः' इति भवदाक्षेपः । उपास्यत्वमात्रोपदेशात् ब्रह्मणः सत्यत्वं न समर्थयामः । ध्यानविधेः सर्वत्राविशेषापेक्षत्वेऽपि नाम ब्रह्मेत्यादिदृष्टिविधिवदसत्येनाप्यर्थविशेषेण ध्याननिर्वृत्त्युपपत्तेर्ध्येयसत्यत्वानपेक्षणात्' इति पूर्वपक्षोत्थानसमर्थकश्रीभाष्यवाक्यानवलोकनेन चोद्यानवकाशरूपभवच्चोद्यं । सिद्धपरवादैरेव ब्रह्मस्वरूपसिद्धिं वयं वदामः । ब्रह्मणोऽपि फलत्वोपपादनेन,कार्याधिकृतफलतया स्वर्गादेरिव ब्रह्मणः सत्यत्वसिद्ध्या वेदान्तानां कार्यपरत्वान्वारोहेणापि ब्रह्मसत्यत्वे प्रामाण्यं सिद्धान्ते समर्थयामः' ।

ईक्षत्यधिकरणम् ॥

श्रुतप्रकाशिकोक्तान्भवदीयग्रन्थेष्वनुक्तांश्च विषयानेतदधिकरणे भवत्कारणवाक्यं विषयः तत्र सद्विद्यावाक्यमेवास्य साक्षाद्विषयः । सद्विद्यावन्तो भूयो लिखन्ति 'प्रतिज्ञादृष्टान्तोपेतं सङ्कल्पप्रतिपादकं सामान्यशब्द-

त्कारणवाक्यं विषयः । तत्र सद्विद्यावाक्यमेवास्य साक्षाद्विषयः । सद्विद्याद्वारेणेतरकारणवाक्यानां विषयत्वम् । न तु साक्षादेव' इति श्रुतप्रकाशिका । तदुक्तिमनुगच्छन्ति भवन्तः 'इयञ्च सप्तसूत्री कारणसामान्यविषयिण्यपि प्रधानतः सद्विद्याविषयिणी ; ईक्षत्यादेस्तदन्तर्गतस्य विस्पष्टमुपन्यासात्' इति । 'अप्राप्ते हि शास्त्रमर्थवत्' इति मीमांसकानां मतम् । न तु सांख्यानामिति पूर्वपक्षिणोऽभिप्रायः'' इत्यत्र श्रुतप्रकाशिका । तदनुगच्छन्ति भवन्तः 'अप्राप्ते हि शास्त्रस्यार्थवत्ता । .... एवं निगृहीतेऽपि तस्मिन्नाहमिमं न्यायमुपैमि । किन्तु प्राप्तमेव संवदते शास्त्रमुपैमि' इति । भवदुक्तस्य श्रुतप्रकाशिकामूलत्वं भवदीयानां विदितं भवत्वितीदं प्रकाशयामः ॥

'आनुमानिकं' 'आनुमानम्' 'स्मार्तम्' इति भूयः पक्षनिर्देशः क्रियते सूत्रेषु । अनुमानसिद्धं कारणं त्रिगुणमनूद्यते श्रुतिभिरिति सांख्याः । अशब्दशब्दोऽवधारणगर्भः । यस्मिञ्छब्द एव प्रमाणं न भवति तदशब्दम् । ब्रह्मणि शब्द एव प्रमाणं भवतीति शास्त्रयोन्यधिकरणे ब्रह्मणः शब्दप्रतिपाद्यत्वमुक्तम् । यादृशं ब्रह्मणः शब्दप्रतिपाद्यत्वमुक्तं वेदान्तिना ; तादृशं शब्दप्रतिपाद्यत्वं नास्ति प्रधानस्येति सांख्येनाप्यभ्युपगम्यते । मुख्यतोऽनुमानसिद्धं प्रधानम् । अनुमानप्रथितं तदानुमानिकं शब्देनाप्यनूद्यत इति तदभिमानः । 'अप्राप्ते हि शास्त्रमर्थवत्' इति न्यायोऽनभिमतस्तस्य । शब्दैकसमधिगम्यत्वाभावे शब्दगम्यत्वमेव नास्तीति वेदान्तिनः । सद्विद्याप्रतिपादितजगत्कारणं सत् नाशब्दं न प्रधानम् ; तस्मिन्नीक्षितृत्वश्रवणात् । ईक्षतेरिति हेतुः ।

'नानुमानमतच्छब्दात्' 'आनुमानिकमप्येकेषाम्' इत्यादिसूत्रेष्वानुमानिकादिशब्दवदशब्देशब्दस्याप्यवयवार्थमुखेन धर्म्युपस्थापनक्षमतयाऽध्याहारनिरपेक्षत्वादवयवशक्त्यैवानुमानकारावगमरूपपूर्वपक्षबीजस्य सू-

तेनैव द्योतमानत्वसिद्धेश्च भाष्यकाराभिमता योजना साधीयसी"
इति श्रुतप्रकाशिकोक्तमवधेयम् । 'अशब्दं हि तदित्युक्तेऽपि हेत्वन्तरसाकांक्षत्वाच्च' इति तत्रोक्तम् । बहुल पराक्रान्तं चन्द्रिकायाम् । तृतीयापञ्चम्यादिलक्षणहेतुविभक्त्यभावेनाशब्दशब्दस्य हेतुपरत्ववर्णनास्वारस्यमुक्तं चन्द्रिकायाम् ; प्रकाशे च । नैकमपि दूषणं भवद्भिरुद्धृतम् । पूर्वपक्षस्य सूत्राक्षरयोत्यत्वस्वारस्यं परित्यक्तमेव । सौत्रहेतोर्मुख्यसाध्यसाधनत्वपरित्यागश्च भवति ॥

द्वितीयसूत्रस्थात्मशब्दस्यान्तर्यामिपरत्वमत्र स्वरसम् । प्रकरणे सर्वस्य ब्रह्मात्मकत्वं नियम्यते 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' इति । भगवत्पादानामपि सौत्रात्मशब्दस्य निगमनवाक्यगतात्मशब्दपरामर्शकत्वं नासम्मतम् ।

> "तथा 'स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इति चेतनस्य श्वेतकेतोरात्मत्वेनोपदिशति । अप्तेजसोरपि सदधिष्ठितत्वापेक्षमेवेक्षितृत्वम्"

इति भाषमाणा भगवत्पादा अस्मद्व्याख्यानरीतिमिच्छन्ति । सदधिष्ठितत्वमेव सदात्मकत्वम् ।

> "आत्मशब्दादिति सौत्रपदेनाविशेषेण 'ऐतदात्म्यम्' 'स आत्मा' इति वाक्यद्वयगतात्मशब्दो विवक्षितः ।"

इति श्रुतप्रकाशिका । एतद्वाक्यद्वयगतात्मशब्दपरामार्शकसौत्रहेतुना पूर्वपक्ष्युक्तस्य गौणेक्षणप्रायपाठहेतोर्निरस्तत्वात्तेजोऽबादिशब्दानां तदधिष्ठातृसत्परत्वप्रदर्शनेन प्रायपाठस्य सत्कर्तृकमुख्येक्षणपरत्वसाधनाच्चेक्षणस्य गौणत्वशङ्का समूलकाषं काषिता भवति । तच्छङ्काया अपुनरङ्कुरं निरस्तत्वात्; अनन्तरसूत्रम् , तदनन्तरसूत्रं च परमसाध्यसाधनपरतयैव योजनीयं भवति ॥

तृतीयसूत्रस्य स्वातन्त्र्येण प्रधानकारणवादनिराकरणपरत्वं भगवत्पा-

दानां सम्मतमेव । गौणत्वशङ्कानिराकरणपरत्वेन प्रथमं व्याख्याय तत्रा-रुच्या

" अथ वा—पूर्वसूत्र एवात्मशब्दं निरस्तसमस्तगौणत्वसाधारणत्वशङ्कतया व्याख्याय ततः स्वतन्त्र एव प्रधानकारणनिराकरणहेतुर्व्याख्येयः 'तन्निष्ठस्य मोक्षोपदेशात्' इति "

इत्यभाषि । 'तस्मान्नाचेतनं प्रधानं सच्छब्दवाच्यम्' इति भाष्यनिगमनवाक्यमपि प्रधानहेतुपरत्व एव तेषां हार्दं स्पष्टयति । 'शङ्कोत्तरत्वेन स्वातन्त्र्येण वा प्रधाननिराकरणार्थं सूत्रम्' इति भामती । सूत्रस्थात्मशब्दस्य 'स आत्मेत्यात्मशब्दादित्यन्योऽर्थः' इति न्यायरक्षामणिः । 'तन्निष्ठस्य मोक्षोपदेशात्' इति सूत्रम् 'सदात्मत्वसाक्षात्कारवतो मोक्षोपदेशादपि न सच्छब्दं प्रधानम्' इति स्वतन्त्रहेतुपरत्वेनैव मुख्यं व्याख्यानं न्यायरक्षामणौ । स्पष्टस्य भगवत्पादभाष्यस्यान्यथाऽर्थं वर्णयितुं वृथा परिश्रान्तं भवद्भिः । भवदुक्तिरत्रात्यन्तमनवबोधा । तस्या बोधकत्वमेव नास्तीति भवतामेव तत्पठनमात्रेण स्फुटं भवेत् । प्रतिपाद्यार्थविशेषाभावप्रयुक्तैव तस्या अनवबोधता । अस्मदुदाहृतभाष्यस्य स्वतन्त्रहेतुपरतामेव श्रीमन्मिश्रा मन्यन्ते । भवदपेक्षया तेषामेव भगवत्पादभाष्यहृदयव्याख्याने श्रद्धेयतरत्वं वयमाद्रियामहे । श्रीभाष्यसंवादिनी भवतीति भवन्तो भगवत्पादस्पष्टोक्तिमन्यथयितुमिच्छन्ति ; यतन्ते च । भवद्यत्नस्तु व्यर्थ एव । प्रथमसूत्रद्वयस्य सूत्रत्रिकत्वं रोचयन्त इव भवन्तः । 'आत्मशब्दो न गौणः, 'ईक्षतेः' इति सूत्रान्तरं सूत्रद्वयसम्मेळनेन सूत्रकृद्विवक्षितत्वेन प्रदिदर्शयिषन्तीव । 'अदान्ताश्व इव पुरा पश्चाच्च धावति सूत्रम्' इति भवतां विचित्रा कल्पना । ईदृशी दुष्टाश्वगतिर्न दृष्टचरी केषु चित् सूत्रेषु । मण्डूकप्लुतिवद्व्यवहितानुवृत्तिं क्वचित्प्रदर्शयति भगवान् पतञ्जलिः । महाभाष्यकाराणां प्रतिष्ठां लिप्सन्त इव भवन्त ईदृशविचि-

त्रदुष्टाश्वगतिप्रदर्शनेन । भवदीयाः सर्वेऽपि न्यायविदोऽत्र भवदुक्तं नानुमन्येरन्निति निःसंशयत्वादत्र भवदुक्तं नाधिकं परीक्षामहे ॥

ईक्षणस्य गौणत्वशङ्का आधिकरणान्तं प्रतिसूत्रं नानुवर्तेत इति भवत्सम्मतम् । तृतीयचतुर्थसूत्रयोरपि सा शङ्काऽनुवर्तेत इति भवन्तः । सा शङ्का द्वितीयसूत्र एव निरस्तेति वयम् । भगवत्पादानां, भवन्तमेकं विहायान्येषां तद्व्याख्यातॄणां चास्मद्व्याख्यारीतिः संमतैव । स्वनिष्ठया मोक्षलम्भकत्वं कारणस्य चेतनब्रह्मत्वसाधनमिति को वा संशयीत ; प्रकृतिनिष्ठस्य मोक्षो नेष्टः सांख्यस्यापि ॥

'हेयत्वावचनाच्च' इति सूत्रस्थचकारेण 'प्रतिज्ञाविरोधात्' इति सूत्रकाद्विवक्षितहेतोः सूचनमिति भवदीयानां व्याख्या । सूत्रपाठसंप्रदाये भेदोऽस्ति । यथासंप्रदायं पाठो भवतु । 'प्रतिज्ञाविरोधात्' इति हेतोर्वाचनिकत्वं वा भवतु, चशब्दसिद्धत्वं वा भवतु । उभयथाऽपि नार्थभेदोऽधिकरणप्रतिपाद्यविषये ॥

प्रथमसूत्रद्विके सूत्रत्रिकं पठित्वा द्वितीयद्विके च सूत्रत्रिकं पठित्वा, त्रिकद्वयपठनेन दर्शपूर्णमाससाम्यं दिदृक्षन्ते भवन्तः । भवत्कल्पनस्यात्यन्तमनुपयुक्तैव प्रकृते । नात्र किमपि नैपुण्यं वा साङ्गत्यं वा पश्यामः ॥

अधिकरणे सूत्रक्रमस्वारस्यं श्रुतप्रकाशिकायां सम्यङ्निरूपितम् । 'प्रक्रियाभङ्गप्रसङ्गात्प्रधानस्य सत्पदावाच्यत्वमेकमेव साध्यीकृत्य प्रवर्तमानं नोपादेयमेव श्रीभाष्यम्' इति भवदुक्तिः । कारणत्वेन श्रुतस्य सतोऽचेतनत्वाभावोऽत्र साध्यः तस्यैवात्र प्रकृतत्वम् । द्वितीयसूत्रस्य प्रथमसूत्रोदाहृतेक्षणस्य गौणत्वशङ्कानिरासकत्वमेव श्रीभाष्यकारा वर्णयन्ति । प्रतिसूत्रमेकमेव प्रधानसाध्यसाधनमभिप्रयन्ति श्रीभाष्यकारा इति भवदनुवादोऽयथार्थः । 'स्वयमेव सूत्रं ग्रथयति, चकारार्थं च श्लथयति ; प्रक्रियां च भञ्जयति स्वारसिकां सूत्रकारीयां श्रीभाष्यकारः' इति भवदुक्तिः ।

'प्रतिज्ञाविरोधात्' इति वृत्तिकारसंप्रदायसिद्धपाठमेवाद्रियन्ते श्रीभाष्यकाराः । यत्र तमेव हेतुं चशब्दाभिप्रतत्वेन पठन्ति भगवत्पादास्तत्रैव स एव हेतुस्तच्छब्देनैव सूत्रकृत्पाठितत्वेन पठ्यते श्रीभाष्यकारैः प्राचीनवृत्तिकारसंप्रदायानुसारेण । नात्र भाष्ययोर्मनागप्यर्थभेदः । अधिकमेकं सूत्रं पठन्तीति श्रीभाष्यकारान् गर्हमाणा भवन्तोऽत्रैव सूत्रद्वयमधिकं पठन्ति । नव सूत्राणि खलु भवद्भिर्वर्ण्यन्ते नवनवोन्मेषशालिन्या प्रतिभया । त्रिकत्रयघटितं खल्विदमधिकरणं भवद्ग्रन्थरीत्या ॥

ईक्षतिशब्दस्येक्षितृत्वनिरासकत्वम् , चिन्मात्रपरत्वञ्च भवन्तो वर्णयन्ति । निरङ्कुशाः स्वतन्त्रा भवन्तः । 'ईक्षतेः' ईक्षितृत्वश्रवणात्कारणस्य' 'सच्छब्दवाच्यस्येक्षणपूर्वकं तेजःप्रभृतेः स्रष्टृत्वं दर्शयति' इति च भगवत्पादीयं व्याख्यानं सौत्रेक्षतेः । ईक्षतेश्चैतन्यमात्रपरत्वे सूत्रकृद्विवक्षिते कथमीक्षणस्य गौणत्वशङ्काया अवकाशः ? ॥

'तन्निष्ठस्यैव मुक्तिर्न त्वतन्निष्ठस्य' इति वदन्तो भवन्तस्तच्छब्दस्य सत्परत्वमभ्युपगच्छन्ति । तस्य प्रथमोक्तां पूर्वसूत्रस्थात्मशब्दपरतां च निघ्नन्ति । तृतीयसूत्रस्यास्मद्व्याख्यारीतिम् , स्वतन्त्रहेतुतां चात्राभ्युपगच्छन्ति । अदान्ताश्वत्वं न सूत्रस्य तस्य, तद्वक्तुरेव तद्भवेत् ॥

'प्रमाणलक्षणोऽयमध्यायः । न त्वयोगाद्यध्यायः' इति भवदुक्तिः । समन्वयाध्याय इत्यध्यायनाम । अयोगान्ययोगव्यवच्छेदभेदेनास्मिन्नध्याये विभागो भवदीयानां संमत एव । अन्ययोगव्यवच्छेदस्तुरीयपादे क्रियत इति भवदीयानां स्थितम् । त्रिपाद्यां तत्करणमिति वयम् । अयोगान्ययोगव्यवच्छेदभेदेन प्रथमाध्यायपादानां विभाग उभयसंमतः । तुरीयपादारम्भे ,

'पूर्वत्र हि प्रधानाद्येव सर्ववेदान्तार्थ इति प्रत्यवस्थिते तन्निषेधेन सर्ववेदान्तेषु ब्रह्मावगतिः साधिता । इह तु तामुपेत्य प्रधानाद्यपि कार-

णत्वेन समन्वयविषय इति प्रत्यवस्थीयते'

इति कल्पतरुः ।

'प्रथमत्रिपाद्यां ब्रह्मणि कारणत्वानन्वय इति पूर्वः पक्षः । चतुर्थपादे ब्रह्मण्येव कारणत्वसमन्वय इति वेदान्तपक्षो न सिद्ध्यतीति पूर्वपक्षः,

इति च कल्पतरुः । तद्विरोधेनास्मिन्नध्याये श्रीभाष्योक्तायोगान्ययोगव्यवच्छेदरूपविभाजकोपाधिरेव नास्तीति भवदुक्तिः साहसिकी । 'प्रधानादि कारणत्वेन समन्वयविषयः' इति प्रधानादेः समन्वयं व्यपदिशन्ति श्रीमदमलानन्दमुनयः । 'ब्रह्मणः समन्वयः' इति श्रीभाष्यकारोक्तिः शाब्दमर्यादाविरुद्धेति भवन्तः क्रुध्यन्ति । प्रथमं प्रधानादेरेव कारणत्वेन समन्वय इति पूर्वपक्षोत्थानम् । अनन्तरं प्रधानादेरपीति । ब्रह्मलक्षणत्वेनोक्तस्य जन्मादिकारणत्वस्य समन्वयः परीक्ष्यतेऽस्मिन्नध्याये वेदान्तवाक्यतात्पर्यविचारेण । लक्षणसमन्वयोऽपि निरूप्यते । कारणत्वायोगो नामोक्तलक्षणासम्भवः । असम्भवनिराकरणं क्रियते प्रथमे पादे । अचेतनस्य प्रधानस्य कारणत्वे ब्रह्मणः कारणत्वायोग एव स्यात् । जगत्कारणत्वेन श्रुतस्यानन्दस्य, आकाशस्य; प्राणस्य, ज्योतिषो वाऽन्यपरत्वप्रतिपादनेन ब्रह्मणः कारणत्वायोग एव भवेत् ।

"जन्मादिसूत्रे ब्रह्म कारणमेव, ब्रह्मैव कारणम्' इत्यवधारणद्वयमपि विवक्षितम् । जन्मादिकारणत्वस्य ब्रह्मलक्षणत्वात्, लक्षणस्याव्याप्त्यतिव्याप्त्यसम्भवपरिहारावश्यंभावात्; तत्र व्यक्त्यैक्यान्नाव्याप्तिः । असम्भवपरिहाररूपायोगव्यवच्छेदः प्रथमपादे उक्तः । अतिव्याप्तिपरिहाररूपान्ययोगव्यवच्छेदस्त्रिपाद्या क्रियत इति विभागः'

इति श्रुतप्रकाशिका । उपहितविषयोऽयं पाद इति भवन्तः । सद्विद्या, आनन्दमयविद्या वा नोपहितविषया भवन्मते । अनुपहिते निर्विशेषे समन्वयस्य समन्वयसूत्रेण प्रतिज्ञातत्वे कथं प्रथमं पादमेव उपहितप्रचुरतया

निबध्नीयात् सूत्रकारः ॥

'गतिसामान्यं च विशिष्य समर्थनीयम् । तच्च ब्रह्ममीमांसायां स्पष्टास्पष्टतालिङ्गकमेव वाक्यमुदाहृत्य, न तु जीवादिलिङ्गकम्; अतन्मीमांसात्वात् ।' इति भवदुक्तिः । स्पष्टब्रह्मलिङ्गपादः प्रथमः, अस्पष्टब्रह्मलिङ्गपादौ द्वितीयतृतीयौ; अस्पष्टतरब्रह्मलिङ्गपादस्तुरीय इति भवदीयाभिमतो विभागः । कारणत्वायोगनिराकरणपरः प्रथमः, अस्पष्टस्पष्टजीवादिलिङ्गवाक्यविचारकौ द्वितीयतृतीयौ । प्रधानादिलिङ्गिप्रतिपादकवाक्यसमन्वयपरस्तुरीय इति वयम् । अत्यन्तास्पष्टास्पष्टस्पष्टस्पष्टतरप्रधानजीवादिलिङ्गान्वितवाक्यविषयत्वेन वा पादानां भेदः । पूर्वपक्षोत्थानमपेक्ष्यास्मन्निर्देशः । सिद्धान्तनिर्णयापेक्षो भवदीयानां निर्देशः । शङ्काप्रयोज्या मीमांसा । मीमांसाप्रयोजकशङ्कामनुरुध्यास्मन्निर्देशः । निर्णयफला मीमांसा । फलमनुरुध्य भवन्निर्देशः । 'जीवो वा प्रधानं वा; ब्रह्म वा' इत्यनेकशिरस्का मीमांसा प्रायेणेत्युभयसंमतम् । 'क्षरं प्रधानममृताक्षरं हरः' इति श्रुतेरर्थं विचारयन्ति भवन्तः । तस्य सूत्रार्थानुगुण्यविचारानुपयुक्तत्वात्तत्र वयमुदास्महे । एतदधिकरणोक्तकारणस्य सतः पुरुषोत्तमत्वं वर्णितमेतदधिकरणमङ्गलश्लोकेन कल्पतरौ ॥

परमा परमानन्दबोधसल्लक्षणान्वितम् ।
यमाश्लिष्यति सर्वज्ञं तं वन्दे पुरुषोत्तमम् ॥

इति कल्पतरुः । 'परा उत्कृष्टा या श्रीर्महालक्ष्मीर्यमालिङ्गतीत्यर्थान्तरमप्यनेन क्रोडीकृतम् ।' इति शिवोत्कर्षपक्षपातिनां श्रीमद्दीक्षितानां व्याख्यानम् । 'हरिर्यथैकः पुरुषोत्तमः स्मृतः' इति कविसार्वभौमप्रदर्शितरूढ्यनुसारेण पुरुषोत्तमशब्दस्य हरिपरत्वमेव कल्पतरुकृतां संमतम् । 'हेतुत्वलक्ष्यः पुंसूक्तादिप्रसिद्धो गुणनिधिरघजिद्ब्रह्मशब्दार्थ उक्तः' इत्यस्मदीयोक्तं श्रियःपतेर्जगत्कारणत्वं श्रीमदमलानन्दमुनीनां संमतम् ॥

अत्र भवदीयया विचित्रया विक्षेपशक्त्या भाष्यभामतीकल्पतरुपरिमल-
विरुद्धं 'प्रधानमेव कारणम्; ब्रह्म कारणम्, प्रधानमपि कारणमिति द्वेधा
प्रत्यवतिष्ठते पूर्वपक्षी । सिद्धान्ती च कारणत्वायोगान्ययोगव्यवच्छेदा-
वुभावपि साधयतीति'

कल्पयित्वाऽस्मान् दूषयन्ति । भाष्यभामत्यादिग्रन्थानां भवदुक्तापार्थान् भवदीयाः केऽपि नानुमन्येरन् । प्रधानप्रतिपाद्यभेदेऽधिकरणभेदापत्तिर्दुर्वारा । अयोगव्यवच्छेदपरोऽयं पाद आवयोरुभयोरपि । ग्रन्थप्रणेतॄणां भवतामिदमविदितमिति महद्विस्मयस्थानमस्माकम् । अस्मिन् पादे ब्रह्मानभ्युपगमेनैव पूर्वपक्ष इति निर्बन्धः ॥

भाष्ये उपक्रमे 'साङ्ख्यादयस्तु प्रमाणान्तरगम्यमेवेति मन्यमानाः प्रधानादीनि कारणान्तराण्यनुमिमानास्तत्परतयैव वेदान्तवाक्यानि योजयन्ति' इति भाषितम् । अस्य प्रधानकारणत्वावधारणपरता न शक्यापह्नवा । मध्ये भाषितम् 'तत्र साङ्ख्याः प्रधानं त्रिगुणमचेतनं जगतः कारणमिति मन्यमाना आहुः —

यानि वेदान्तवाक्यानि सर्वज्ञस्य सर्वशक्तेर्ब्रह्मणो जगत्कारणत्वं दर्शयन्तीत्यवोचम्तानि प्रधानकारणपक्षेऽपि योजयितुं शक्यन्ते । सर्वज्ञत्वं तावत्प्रधानस्यापि स्वविकारविषयमुपपद्यते ।

इति । अत्र 'अपिकारावेवकारार्थौ' इति सुस्पष्टमुक्तं भामत्याम् । 'त्रिगुणमचेतनं जगतः कारणं मन्यमानाः' इति पूर्ववाक्ये साङ्ख्यस्य प्रधानकारणत्वमेवेष्टमिति स्पष्टमुच्यते । तदनुसारेण एवकारार्थवर्णनमेव न्याय्यम् । उत्तरवाक्यैश्च प्रधानस्य कारणत्वं, ब्रह्मणस्तदसंभवश्च स्पष्टं समर्थ्येते । 'न केवलस्याकार्यकारणस्य पुरुषस्योपलब्धिमात्रस्य सर्वज्ञत्वम्, किञ्चिज्ज्ञत्वं वा कल्पयितुं शक्यम्' इति ब्रह्मणि कारणत्वापेक्षितसर्वज्ञत्वस्य स्पष्टनिषेधनं दृश्यते । 'अपि च प्रधानस्यानेकात्मकस्य परिणामसंभवात्कारण-

त्वोपपत्तिर्मृदादिवत्, नासंहतस्यैकात्मकस्य ब्रह्मण इत्येवं प्राप्ते—'इति पूर्व पक्षनिगमनमपि भवद्व्याख्यां दूरत उत्सारयति । 'अपिभ्यामवधारणस्य व्यवच्छेद्यमाह' इति भामत्यवतारिका ' न केवलस्य' इत्यादिवाक्यस्य । 'इह हि 'गौणश्चेत्' इतीक्षणे गौणत्वशङ्का मुख्येक्षणवतो ब्रह्मणः कारणत्वासम्भवनिश्चयवत एव । तथा च नानवधारणम्' इति कल्पतरुरपि भवद्विरोधी । 'अपिभ्याम्' इति भामत्यवतारिकापदस्य 'एवकारार्थत्वेन व्याख्याताभ्याम्' इति कल्पतरुव्याख्या । निरीश्वर एक एवात्र पूर्वपक्षी । भवद्भ्रान्तिकल्पितापार्थमाश्रित्य श्रीभाष्यदूषणं न केवलं सूत्राक्षरैः, किन्तु भवदीयभाष्यभामत्यादिभिश्च स्पष्टं विरुध्यते । भवद्ग्रन्थस्य स्वभाष्यादिपूर्वग्रन्थानुगुण्यस्यैवाभावे का वार्ता तस्य सूत्रानुगुण्यस्य । सद्विद्यावाक्यार्थे विचारोऽत्र । सच्छब्दवाच्यं प्रधानं वा, चेतनब्रह्म वेति विचारे — प्रधानमित्येव सांख्यपूर्वपक्षः । अत्र ब्रह्माभ्युपगम्य पूर्वपक्षप्रवृत्तिरत्यन्तदुर्वचा । केषांचित् सूत्राणामयोगपूर्वपक्षव्यवच्छेदकत्वम्, अन्येषामन्ययोगव्यवच्छेदकत्वमिति भवदभिमतो विभागः सूत्राक्षरैर्नैव प्रत्याख्यते । 'वयं तु प्रतिबन्दीत्वादयमपि कश्चित् पक्ष इति मन्यामहे' इत्यारभ्योक्तं भवन्नूतनमतं न कथञ्चिदपि युक्तियुक्तम् ॥

अत्र द्वेधा सूत्राभिमतः प्रयोगः प्रदर्श्यते भवद्भिः । 'प्रधानं न वेदान्तवेद्यम्; वेदावेद्यत्वात्; घटवत्' 'कर्मान्यच्छास्त्रप्रतिपाद्यं न प्रधानम्; ईक्षितृत्वेन श्रूयमाणत्वात्' इति । द्वितीयः प्रयोगोऽस्मन्मार्गानुसारी; भवद्भाष्यव्याख्याविरुद्धः । 'न प्रधानम्' इति साध्यवर्णनेन 'नाशब्दम्' इति सूत्रखण्डस्य साध्यसमर्पकत्वमभ्युपगम्यते । अशब्दमिति पदस्य भवद्भाष्यवर्णितं हेतुत्वञ्च परित्यज्यते भवद्भिः । 'ईक्षतेः' इत्येक एव हेतुवाचकः शब्दः सूत्र इति चाभ्युपगम्यते । अयं स्वरसः पन्थाः । प्रथमप्रयोगे वेदावेद्यत्वस्येक्षतिहेतूपपाद्यत्वं दुःसाधम् ॥

'ननु चाद्वचनं सह प्रयुक्तम् , यत आह श्रीमाल्लक्ष्मणाचार्यः चकारेण तत्त्वमसीत्युपादेयत्ववचनं समुच्चीयते । ....युक्तं चावचनस्य वचनेन समुच्चय इति चेत् । अहह कथमेवमधिकरणमाकुलयितुं प्रवर्तते श्रीमान् स्वरसक्रमभङ्गप्रसङ्गेन । भज्यते हि स्वरसः क्रमो वचनावचनयोर्वैपरीत्येन ; उक्तार्थत्वप्रसङ्गाच्च । उक्तो ह्ययमर्थस्तन्निष्ठस्येति, न हि तन्निष्ठत्वव्यतिरेकेणास्त्युपादेयत्वम् वदरस्येव सतः' इति भवद्दूषणमस्मत्सिद्धान्तार्थस्य विपरीतग्रहणहेतुकम् । 'हेयत्वावचनाच्च' इति सूत्रकारेण पूर्वसूत्रोक्तमोक्षोपदेशरूपवचनहेतुसमुच्चयमेव वयं ब्रूमः । नानुक्तस्य वचनस्य समुच्चायकत्वम्, यथा भवन्तो भ्रमन्ति । 'उपादेयतोक्त्यनुपादेयतानुक्त्योः सूत्रद्वयप्रतिपादितयोरन्वयव्यतिरेकात्मना परस्परसङ्गतयोरेकीकारार्थ इह चशब्दः । 'अत एव हि प्रत्युतेत्यादिना (भाष्येण) पूर्वसूत्रार्थनिगमनं कृतम्' इति श्रुतप्रकाशिकायां भवदुदाहृतभाष्यव्याख्यामनवलोक्य भवद्दूषणमस्मन्मताज्ञानप्रयुक्तम् । 'तन्निष्ठस्य मोक्षोपदेशात्' इति पूर्वसूत्रे 'तत्त्वमसि' ....इति उपदिश्य तन्निष्ठस्य 'तस्य तावदेव चिरम्—अथ सम्पत्स्ये' इति मोक्ष उपदिश्यत इति भाषितम् । तत्सूत्रोक्तस्तन्निष्ठस्य मोक्षोपदेश एव परामृश्यते तैरेव शब्दैः "प्रत्युतोपादेयत्वेनैव 'तत्त्वमसि' तस्य तावदेव चिरमित्युपदिश्यते" इति भवदुदाहृतभाष्यवाक्येन । पूर्वसूत्रोक्तवचनहेतोरेव समुच्चयो वर्णितोऽस्माभिश्चशब्दार्थत्वेन । अतो वचनावचनहेत्वोर्वैपरीत्यं वा, पूर्वानुक्तवक्ष्यमाणसमुच्चयो वा नास्त्यस्मद्व्याख्यायाम् । भवतां ग्रहणवैपरीत्यमेवास्त्यत्र । भवद्भाष्यादिविरुद्धामत्यन्तासङ्गतां भवद्भ्रान्तिकल्पितां काञ्चित् प्रक्रियां सूत्रकाराभिप्रेतां कृत्वाऽस्मद्भाष्यदूषणं भवतामेव शोभेत । प्रथमं भवद्भाष्यमेव दूषयति भवद्दूषणम् । भवद्भाष्यं परित्यज्यास्मद्भाष्यं परिगृह्णन्ति भवन्तः प्रथमसूत्राभिप्रेतप्रयोगदर्शनेन इति पूर्वमेव प्रदर्शितम् । तत्सूत्रस्य, असद्भाष्यस्य चानुगुण्यमव-

शेन साधयन्ति भवन्तः ॥

आनन्दमयाधिकरणम् ॥

पूर्वाधिकरणेऽचिद्वैलक्षण्यमुक्तं कारणस्य । अत्र तस्य जीववैलक्षण्यमुच्यते । सद्विद्या पूर्वाधिकरणे प्रधानतो बुद्धिस्था । तत्रस्थेक्षत्यादिहेतुभिः प्रधानवैलक्षण्यं साधितं कारणस्य । चेतनकारणावगतिसामान्यं च प्रदर्शितम् 'गतिसामान्यात्' इति । गतिसामान्यं साधनीयं साध्येतऽनन्तरैरधिकरणैः । सद्विद्यायां या ईक्षणकर्तृत्वेनोपदिष्टा देवता 'अनेन जीवेनात्मना' इति तस्या जीवेन सामानाधिकरण्यनिर्देशेन जीवब्रह्माभेदसंशय उदेति । ब्रह्मणः पुरुषार्थत्वेन समन्वयः प्रतिज्ञातः समन्वयसूत्रे । अचिच्चेद्ब्रह्म न तस्य पुरुषार्थता भवेत् । प्रत्युत हेयत्वमेव भवेत् । प्रथममचिद्व्यावृत्तिरुपपादिताऽपुरुषार्थत्वनिरासाय । अत्र शास्त्रारम्भ एव जिज्ञास्यब्रह्मण आनन्दमयत्वम् , आनन्दहेतुत्वादिकं चोपपाद्यते । जीवाद्वैलक्षण्यं च समर्थ्यते ॥

अत्र 'शुद्धादशुद्धाच्च प्रत्यगात्मनोऽन्यन्निरतिशयानन्दं ब्रह्मेह प्रतिपाद्यते' इति श्रीभाष्यम् । 'जगत्कारणस्य निरूपणीयत्वे चतुःसूत्र्या सिद्धे प्रत्यक्षादिसिद्धतया प्रसिद्ध्यतिशयादचेतने प्रथममवतरन्ती बुद्धिरीक्षणादिभिस्ततो व्यावर्त्य चेतनवस्त्वभिमुखीकृता । इदानीमचेतनापेक्षया प्रसिद्धिमान्द्येऽपि परमात्मापेक्षया प्रसिद्धेरहंप्रत्ययसिद्धे प्रत्यगात्मन्यवतरन्ती बुद्धिर्व्यावर्त्यते' इति श्रुतप्रकाशिका । "पूर्वाधिकरणविचारितायां सद्विद्यायां 'जीवेनात्मनेति' सामानाधिकरण्यमप्यत्र पूर्वपक्षोत्थानबीजम्" इति च श्रुतप्रकाशिका । तथा च पूर्वाधिकरणानन्तर्यमस्य ॥

शास्त्रारम्भे ब्रह्मणो निरतिशयानन्दत्वम्, सर्वानन्दहेतुत्वं चावश्यमुपपादनीयम् । आनन्दस्यैव कारणत्वमित्यपि श्रावयति भृगुवल्ली । एवं च कारणमानन्दघनमिति सम्पद्यते । कारणमीमांसा आनन्दमीमांसा

भवति । एवं च शारीरकमीमांसा आनन्दमीमांसा भवति । अवश्यमेतदु-पपादनीयं ब्रह्ममीमांसाकृता । श्रुतिप्रवर्तितया आनन्दमीमांसयैव स्वमी-मांसाशास्त्रे विशेषवाक्यसमन्वयमुपक्रमते भगवान् सूत्रकारः ॥

माङ्गलिकः सूत्रकारः शास्त्रारम्भ एव विचारविषयस्य ब्रह्मण आ-नन्दमयत्वं कीर्तयति । माङ्गलिकं तदाशयं रसविधुरतया भञ्जयन्ति भवन्तो ब्रह्मण आनन्दमयत्वप्रतिषेधसंरम्भेण । समन्वयाध्यायोऽयम् ; आकाशाद्यधिकरणेष्वधिकरणप्रथमसूत्र एव प्रथमान्तपदैर्विषयवाक्यगतः पक्षः परिगृह्यते । 'श्रुतिस्थानन्दमयशब्दो ब्रह्मवाचको न जीववाचकः । अभ्यासात्' इति प्रथमसूत्रस्य स्वारसिकोऽर्थः ॥

आनन्दमयशब्द एतदधिकरणप्रथमसूत्रे पठ्यते । स च विषय-वाक्ये पठितः । तद्विषय एवात्र विचारः , तस्यैवात्र समन्वयः समर्थ्यत इति स्वरसा प्रतीतिः । आनन्दमयशब्दस्थमयडर्थ एवानन्तरसूत्रे विचा-र्यत इति स्पष्टमवगम्यते तत्सूत्राक्षरेभ्यः । 'विकारः , प्राचुर्यम्' इति द्वावपि मयडर्थाविति प्रसिद्धम् । विकारार्थकत्वं प्रतिक्षिप्य प्राचुर्यार्थत्वा-भ्युपगमः स्पष्टं सूच्यते । मयडर्थद्वयस्पष्टसंग्राहकस्य द्वितीयसूत्रस्य प्रथ-मसूत्रस्थमयडर्थविचारपरत्वं स्वारस्यशरणैर्न शक्यापह्नवम् । प्रथमसूत्रेऽ-भ्यासरूपहेतुना लिङ्गमुपन्यस्तमानन्दमयस्य ब्रह्मत्वनिश्चये । लिङ्गाच्छ्रु-तिर्बलीयसीति प्रत्यवस्थानं द्वितीयसूत्रे 'विकारशब्दान्न' इति । मयट्-छब्दरूपा श्रुतिः । तस्य विकारोऽर्थः । मयड्रूपश्रुतेरभ्यासरूपलिङ्गं दुर्बलम् । मयट् च विकारार्थक इति पूर्वपक्षः । नानार्थको मयट् । प्राचुर्यमपि मयडर्थः । तेन विकारार्थनिश्चायकत्वेन पूर्वपक्ष्युदाहृता मयट्-च्छ्रुतिरन्यथा सिद्धा । नानार्थकस्य तस्य प्रकरणात्प्राचुर्यार्थकत्वमवगम्यते । 'मुख्यत्वे तूभयोस्तुल्ये' इति भामतीकृद्भिरपीदमुक्तमर्थद्वयस्य मुख्यत्वम् । शब्दशब्दस्यात्र श्रुतिरूपप्रमाणपरामर्शकत्वम् । तच्च प्रथमसूत्रोक्तलिङ्गबा-

धकत्वेनोक्तं पूर्वपक्षिणा । सम्प्रतिपन्नं विषयवाक्ये आनन्दस्य प्राचुर्यं शतगुणितोत्तरक्रमेण भूयो गुणनेन, अन्ते वाङ्मनसातीतत्वकीर्तनेन च स्पष्टमुपपाद्यते । आनन्दभूयस्त्वनिरतिशयत्वप्रदर्शकं प्रकरणमपि प्राचीनसांप्रदायिकवृत्तिव्याख्यायाः साधुत्वे प्रमाणम् । प्रकरणे आनन्दप्राचुर्यं निरूप्यते । सूत्रमपि प्राचुर्यं हेतुत्वेन पठति । तृतीयसूत्रमप्यानन्दमयस्यानन्दप्राचुर्यमेवोपपादयति । 'एष ह्येवानन्दयाति' इति श्रुत्युक्तानन्दयितृत्वमेव 'तद्धेतुव्यपदेशाच्च' इति सूत्रस्य विषय इति रसिकः को वा न सम्मन्येत । 'प्राचुर्यात्' इत्यानन्दप्राचुर्यमेव विवक्षितम् । आनन्दस्य प्राचुर्यमेवानन्दमयशब्दघटकमयटोऽर्थ इति द्वितीयसूत्रार्थः । आनन्द एव प्रधानतया सूत्रकृद्बुद्धिस्थः । प्रधानतया बुद्धिस्थस्य तच्छब्देन परामर्शः । यः प्रचुरधनः स एवान्यान् धनवतः कुर्यात् । व्यपदेशशब्दश्चानन्दहेतुत्वबोधकश्रुतिपदं परामृशतीति केनापि नापह्नोतुं शक्यम् । 'एष ह्येवानन्दयाति' इति श्रुतिखण्ड एव परामृश्यते तेन सूत्रेण । हीति तत्र प्रसिद्धिः सूच्यते । आनन्दहेतुत्वं च तत्र स्पष्टमुच्यते । एवं सूत्रकृदाशयोऽत्यन्तं स्पष्टः सूत्राक्षरेभ्यः ॥

आनन्दाद्यधिकरणे सूत्रकृदेव 'प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे' इति सुस्पष्टमानन्दमयधर्मत्वेन पठितानां प्रियशिरस्त्वादीनां ब्रह्मधर्मत्वमभिप्रैति । आनन्दमयस्यैव ब्रह्मत्वं सूत्रकृन्मनुत इति तेनापि सुस्पष्टम् । 'ब्रह्मधर्मांस्त्वेतान् कृत्वा न्यायमात्रमिदमाचार्येण प्रदर्शितं प्रियशिरस्त्वाद्यप्राप्तिरिति' इति भगवत्पादोक्तिम्, 'प्रियशिरस्त्वादीनां तूपास्यत्वमारोप्य न्यायो दर्शितः' इति भामत्युक्तिं च स्वारस्यशरणः को वा सहेत ॥

आनन्दाद्यधिकरणद्वितीयसूत्रेणानन्दमयाधिकरणसूत्राणामानन्दमयस्य ब्रह्मत्वसाधने तात्पर्यमिति सुस्पष्टं व्याख्यायते । एवं सूत्राक्षराणां स्वा-

शये स्पष्टप्रातिकूल्यमभ्युपगम्यैव भवद्भाष्यकाराः 'सूत्राणि त्वेवं व्याख्येयानि' इति तुशब्दं पठन्ति । तुशब्देन सूत्राक्षराणां स्वाशयप्रतिकूलत्वं स्पष्टमभ्युपगम्यते स्वारस्यशरणैस्तैः । त्रीणि सूत्राण्यत्यन्तास्वरसं क्लिष्टं व्याख्यायैतद्दशपारमर्षवचनहठात्कारोद्विग्ना अनन्तरसूत्रव्याख्यानप्रयत्नादेवोपरम्य 'अपराण्यपि सूत्राणि यथासम्भवं पुच्छवाक्यनिर्दिष्टस्यैव ब्रह्मण उपपादकानि द्रष्टव्यानि' इति सूत्राक्षरानुगुण्यान्वेषणे नैराश्यमेव स्पष्टीचक्रुः । यथासम्भवमिति स्वानुकूलव्याख्याया असम्भावितत्वं स्पष्टमभ्युपगम्यते । स्वारस्यशरणाः सुप्रतिष्ठितयशसो भामतीकारा एवमेव भगवत्पादीयं तुशब्दं व्याचख्युः । वेदसूत्रयोर्विरोधे गुणे त्वन्याय्यकल्पनेति सूत्राण्यन्यथा नेतव्यानि' इति तेषां व्याख्यानं तुशब्दघटितस्योदाहृतभाष्यवाक्यस्य । अन्यथेति सूत्रकृत्स्पष्टाशयाद्भिन्नेन प्रकारेणेत्युक्तं भवति । नेयानीति पदेनापीदं विशदीक्रियते । 'वेदसूत्रयोर्विरोधे' इति सूत्रस्य स्वाभिप्रेतश्रुत्यर्थविरुद्धाभिधायकत्वमभ्युपगतम् । व्याख्यानभूतसूत्राणामन्याय्यत्वं च स्पष्टमुच्येत । एवमत्र न केवलं प्राचीनं वार्तिककारं प्रत्याचक्षते भाष्यकाराः, किन्तु सूत्रकारमपि स्पष्टं प्रत्याचक्षते । 'यथोत्तरं मुनीनां प्रामाण्यम्' इति न्यायः शब्दशास्त्र एव । वेदान्तशास्त्रे यथापूर्वं मुनीनां प्राबल्यम् । 'प्रधानश्रुतिविरोधे गुणभूतसूत्राण्यध्याहारादिभिर्नेयानि' इति कल्पतरुः । कल्पतरुवाक्यस्थादिशब्देन 'लक्षणानुषङ्गो योगवृत्तिश्च गृह्यते' इति परिमले । एतेषां क्लेशानामाश्रयणीयता प्रदर्श्यते परिमले —

'सौत्रानन्दमयशब्दस्यानन्दमयपर्यायाम्नाते पुच्छब्रह्मणि लक्षणा । स्वप्राधान्येन प्रतिपाद्यमित्यध्याहारः । असन्नेव स भवतीति निगमनश्लोकस्य ब्रह्मशब्दाभ्यासविषयत्वादिति हेतुः'

इति । शास्त्रारम्भ एव भवन्त आनन्दप्रकरणमित्थं क्लेशयन्ति । नानन्द-

मयाधिकरणमीदृशं हठात्कारक्लेशं सहेत । आनन्दप्रचुरे आनन्दहेतुकेऽस्मिन्नधिकरणे भवतां दुःसहक्लेशः शोच्य एव । नैराश्यमेव न्याय्यं भवतामत्र सूत्रानुगुण्यसिद्धिगवेषणे । तदेवावलम्बितमृजुभिर्भाष्यकारादिभिः ॥

एवं स्पष्टेऽत्र सूत्रप्रातिकूल्ये, भवद्भिरुच्यते 'नन्वेवं पुच्छवादानुगुणेषु सूत्रेषु कथं सूत्राणि त्विति भाष्यम्, गुणे त्वन्याय्यकल्पनेति भामती, ... इति न्यायेन तदुपपादककल्पतरुश्च सङ्गच्छतामिति चेन्न । यतः सैवाऽयं यत्नः स्वमते सूत्रानुगुण्याभावशङ्कया नोपात्तः । किन्तु सौत्रपदे लक्षणाश्रयणभीरुं वृत्तिकारं व्युत्पादयितुम्' इति । भवदीयां पदवाक्यप्रमाणन्यायाभीरुताम्, निरङ्कुशधृष्टतां च वयं भवद्भिरेव बोध्यामहे । प्रमाणशरणाः पारमर्षसूत्रस्वारस्यभञ्जनभीरवो वृत्तिकाराः । ईदृशं समीचीनन्यायभङ्गभीरुत्वमेव प्रामाणिकाग्रेसरत्वप्रख्यापकम् । भवन्तो न भीरवः । 'किमर्थमत्र भीरुत्वमाश्रयणीयम्, 'न बिभेति कुतश्चन' इत्यत्रैव श्राव्यामहे मात्रा भगवत्या श्रुत्या । ततो निर्भीका वयं सर्वशब्दमर्यादाभञ्जने । आनन्दमयप्रकरणात्तफलमभयत्वमस्माकं फलितम्' इति भवदाशय इव । 'अभयं वै कृष्ण प्राप्तोऽसि' इति भवन्तमुद्दिश्यात्र वक्तव्यं भवति । व्यवहारातीतपारमार्थिकावस्थारूढंमन्यैर्भवद्भिर्व्यावहारिकः पन्था अत्रात्यन्तं परित्यक्तः । 'संन्यस्य ब्रह्म विद्यात्' इति भवदीयाभिमतो विधिः । कृत्स्नां पदवाक्यप्रमाणमर्यादां संन्यस्य ब्रह्म मीमांसितव्यमिति भवत्स्थितिरिव । अव्युत्पन्नः खलु व्युत्पादनीयः । व्युत्पन्नसार्वभौमा वृत्तिकारा नैव व्युत्पादनीयाः । व्युत्पादकापेक्षायां भवादृशा नैव तद्व्युत्पादका भवितुमर्हन्ति । धाष्टर्योपदेश एव भवन्तो दीक्षागुरवो भवेयुः ॥'

यथा सूत्राक्षराणि क्लेश्यन्ते भवद्भिस्तथा भाष्यभामतीकल्पतर्वक्षराण्यपि नितरां क्लेश्यन्ते । आर्जवैकधनास्ते त्रयोऽपि ग्रन्थकर्तारः । "सूत्रं

श्रुतिव्याख्यातृ । व्याख्येया मूलश्रुतिः सूत्राणाम् । श्रुतिव्याख्यानभूतानि सूत्राण्यत्र स्पष्टश्रुत्याशयविरुद्धानीत्यस्मान्निर्णयः । सूत्राण्यत्र प्रत्याख्यातव्यान्येव । यदि सूत्रप्रामाण्यश्रद्धाजडा अस्मदुपपादितश्रुत्यर्थस्यार्षसूत्रानुगुण्यमभिलषेयुः, ते कथंचित्सूत्राक्षराणि क्लिष्टक्लिष्टमन्यथा नेतुमर्हन्ति । तदुपायं च वयं किञ्चित्किञ्चित् प्रदर्शयामः । अस्माकं तद्विषये न रुचिः" इति तेषां स्पष्टोक्तिः । त्रीणि सूत्राण्येव व्याख्यातानि भाष्यकारैः सूत्राक्षरहठात्कारव्यसनेऽधिकरुच्यभावात् । सत्यां तद्रुचौ, कथं सूत्रभाष्यकृता केषांचित्सूत्राणां भाष्यं नाकारि । नूनं सर्वाणि सूत्राणि व्याख्येयानि सूत्रभाष्यकारेण ॥

आनन्दमयस्याब्रह्मत्वे सूत्राणामनानुगुण्यस्य त्रिभिरपि तैरभ्युपगतत्वात् आनन्दाद्यधिकरणद्वितीयसूत्रे आनन्दमयविशेषणानां प्रियशिरस्त्वादीनां ब्रह्मधर्मत्वस्य स्पष्टं सूत्रकारेणैव सूत्रितत्वाच्च भवत्प्रदर्शितसूत्रव्याख्याया अपार्थता नास्माभिः प्रयत्नेन समर्थनीया । तत्र किञ्चिदेव विचारयामः ।

पुच्छस्य ब्रह्मत्वमस्माकमिष्टमेव । तस्य ब्रह्मत्वे न विवादः । सर्वे वयं पुच्छब्रह्मवादिन एव । आनन्दमयस्यापि ब्रह्मत्वमिति वयम् । 'अस्मिन्प्रकरणे स्वस्मादनतिरिक्तैः स्वावयवैः पुच्छप्रतिष्ठात्वरूपणदर्शनादत्रापि पुच्छप्रतिष्ठात्वेन रूपितं ब्रह्मानन्दमयादनतिरिक्तमित्यर्थः' इति श्रुतप्रकाशिका । आनन्दानन्दमययोरस्मिन्प्रकरणेऽभेदं ब्रूमः । भृगुवल्ल्युक्त आनन्दो ब्रह्मत्वेन भवद्भिरभ्युपगतः । तत्स्थानेऽत्रानन्दवल्ल्यामानन्दमयः पठितः । स्थानप्रमाणमप्युदाहृतं श्रुतप्रकाशिकायामुभयोरैक्यस्वारस्ये ॥

अत्र लक्षणाश्रयणदोषमभ्युपगम्योच्यते भवद्भिः 'अथ सूत्रकारेण वा किमर्थं लाक्षणिकं पदमुपात्तमानन्दमय इति चेत् — लक्षणयैव प्रतिपादयति श्रुतिः शुद्धं ब्रह्मेति द्योतयितुमिति गृहाण' इति वदद्भिः । केनोपादेशि भवते 'लक्षणयैव श्रुतिर्ब्रह्म प्रतिपादयति' इति । न सूत्रकारेण ।

नापि श्रुत्या । अप्रमाणं भवन्मनोरथमात्रविजृम्भितमिदम् । असिद्धेनासिद्धं सिषाधयिषन्ति भवन्तः ॥

सौत्रानन्दमयपदस्यानन्दमयवाक्यघटकपुच्छपरतां लक्षणयोपपाद्य, तस्य 'आनन्दमयावयवत्वप्रतिषेधेन स्वप्रधानतया प्रतिपाद्यत्वम्' इति साध्यमध्याहृत्य भवद्भाष्यकाराः प्रथमसूत्रं व्याचख्युः । सूत्रत्रयस्य सिद्धान्तसूत्रत्वं तैः स्पष्टमुक्तम् । तथैवोक्तं भामतीकल्पतर्वादिषु । भवन्तः 'आनन्दमयोऽभ्यासात्, विकारशब्दान्नेति चेन्न प्राचुर्यात्; तद्धेतुव्यपदेशाच्च' इति तान्त्रिकपक्षानुवाद इति वदन्ति सूत्राणामनेकार्थत्वस्यालङ्कारत्वमाश्रित्य । अवशैर्भवद्भिः सूत्रत्रयस्यासत्पक्षप्रतिपादकत्वमभ्युपगम्यते ।

'एवं च सूत्राणामनेकार्थत्वस्यालङ्कारत्वेनानन्दमयो ब्रह्म अभ्यासादित्यारभ्य तद्धेतुव्यपदेशाच्चेत्यन्तेन तान्त्रिकपक्षे प्राप्ते, मान्त्रवर्णिकमेव च गीयते; चस्त्वर्थः, पक्षं व्यावर्तयति । नेतरोऽभ्यस्यते । तत्र सत्त्वासत्त्वशङ्कानुपपत्तेः । अतो न ब्रह्म स इति कोऽपि प्रकार उन्नेयो भवति'

इति भवदुक्तिः । उच्छृंखलाऽत्र भूयसी व्याहतभाषणपरम्परा । आनन्दमयपदलक्ष्यं तद्वाक्यस्थं ब्रह्म पक्ष इति भाष्यकारादयः । न्यायरक्षामणिभवन्तश्च 'आनन्दमयो न ब्रह्म, अभ्यासात्' इति ईक्षतिसूत्रान्नञमाकृष्य सूत्रार्थं वर्णयन्ति । स्वोक्तिविरोधेन स्वकीयपूर्वोक्तिविरोधेन चान्यथाऽन्यथा परस्परविरुद्धं व्याख्यानस्वातन्त्र्यमवलंबन्ते भवन्तः । 'सूत्राण्यन्यथा नेयानि' इति भामती । अन्यथाऽन्यथेति तद्वाक्ये वीप्सां पठित्वा विरुद्धं क्लिष्टात्क्लिष्टतरं च सूत्राणि निनीषन्ति भवन्तः । अधो निनीषाप्रयत्न एवायं भवताम्, नोन्निनीषाप्रयत्नः । ध्रुवं व्यासो हासपदीक्रियते भवद्भिः । श्रीमच्चन्द्रिकापठितम्

'अनेकशाखातत्त्वार्थविदा सूत्रकृतेरितम् ।
कूपमण्डूकवत्स्वल्पवाक्यज्ञोऽन्यथयेत् कथम् ॥'

इति श्लोकमत्र स्मार्यामहे । वेदसूत्रविरोधे 'सूत्राणि त्वन्यथा नेयानि' इति भामतीकृत् । 'कथमन्यथयेत् स सर्वज्ञप्रणीतं सूत्रम्' इति चन्द्रिकाश्लोकाशयः । दन्त्याक्षररूपथकारद्वयं पठ्यते तत्र 'अन्यथयेत्कथम्' इति ।

प्रथमसूत्रोपन्यस्तो हेतुः 'अभ्यासात्' इति । प्रकरणे आनन्दमयगुणस्य आनन्दस्यैव गुणनरूपाभ्यासादिति वा. प्रकरणे 'यतो वाचो निवर्तन्ते' इति द्विर्निरतिशयानन्दस्य मुहुर्मुहुरुक्तिरूपाभ्यासादिति वाऽर्थः । प्रकरणे आनन्दावृत्तिरुत्तरोत्तरं तद्गुणनं च दृश्यते । द्व्यादिसङ्ख्याया उत्तरोत्तरं समानसङ्ख्याभिर्गुणनपरम्परया सङ्ख्याया महती वृद्धिर्लभ्येत । एकोत्तरबिन्दुद्वयघटितसङ्ख्याया* बहुकृत्वो गुणनमतिसुलभमिति तां रीतिमाद्रियते माता श्रुतिः । एवं प्रकरणदृष्टं शतसङ्ख्योत्तरोत्तरगुणनमानन्दस्याधिकमधिकं प्राचुर्यमेवोपपादयत्यानन्दिनि ब्रह्मणि । ब्रह्मण आनन्दस्य निरतिशयत्वं द्विः पठितमस्मिन्प्रकरणे । 'यतो वाचः—' इति श्लोको मनोमयपर्याये, आनन्दमयपर्याये च द्विरभ्यस्यते । एषोऽभ्यासोऽपि गृह्यते सौत्रहेतुना । मीमांसाशास्त्रे 'अविशेषपुनःश्रवणे' मुहुर्मुहुरुक्तावभ्यासशब्दस्य प्रसिद्धिः । तत्परतयापि योजितानि श्रीभाष्याक्षराणि श्रुतप्रकाशिकायाम् । 'यद्वा—मुहुर्मुहुरुक्तिरभ्यासः । तेन तात्पर्यलिङ्गवत्त्वं सूचितम् ।' इति । 'यतो वाचो निवर्तन्ते—' इति मनोमयानन्दमयपर्यायोक्तिद्वयस्यापि निरतिशयानन्दविषयतया निरतिशयानन्दस्य मुहुर्मुहुरुक्तिदर्शनात्' इति तद्व्याख्यातं भावप्रकाशिकायाम् ॥

मयड्बोधितस्य प्राचुर्यस्य दुःखाल्पत्वबोधननियमवर्णनं भाषास्वभावानभिज्ञतामूलम् । 'अन्तःशरीरे ज्योतिर्मयो हि शुभ्रः' इति मुण्डकश्रुतिः ; 'यश्चायमध्यात्मं शारीरः तेजोमयोऽमृतमयः' इति बृहदारण्यकश्रु-

* (बिन्दुः Cipher; 1 + 00)

तिश्च भवन्नियमभञ्जिका । 'तेजोमयश्चिन्मात्रप्रकाशमयः' इति भवदीय-भाष्यम् ।

'सन्त्यक्ताः स्वयमेव चेत् सुखमयं निःश्रेयसं तन्वते'

इति श्रीशङ्कराचार्यैर्गीयते ।

'चिद्रूपमानन्दमयं च वेदाः शैवं वपुः शाश्वतमामनन्ति'

इत्यानन्दमयस्य ब्रह्मपरत्वं कण्ठरवेण गीयते श्रीमन्नीलकण्ठदीक्षितैः शिवलीलार्णवे । 'मधुमयफणितीनां मार्गदर्शी महर्षिः' इति मधुरैकान्ते मयट्प्रयोगः ॥

विकारशब्दस्यावयवे लक्षणेत्युच्यते श्रीमद्दीक्षितैर्न्यायरक्षामणौ । अवयववाची पुच्छशब्दो विकारशब्द इति तैर्लक्षणैवाश्रीयते । विकारशब्दस्यानर्थकशब्द इत्यर्थवर्णनं ध्रुवं महद्गौरवमावहेद्व्याख्यातुः ।

कर्मणि घञन्तः कारशब्दः कार्यवाची । विगतकार्योऽनर्थकशब्दः । एवमर्थान्तरस्यापि गर्भीकरणाय अवयवशब्दादिति वक्तव्ये विकारशब्दादित्युक्तम् ।

इत्युक्तिरनर्थपरम्परायामेव वक्तारं मज्जयति । पूर्वसूत्रस्थमयटोऽर्थद्वयस्य कीर्तने स्पष्टे एवमुच्छृङ्खलकल्पनस्य कुतोऽवकाशः ? ।

'तद्धेतुव्यपदेशाच्च' इति तृतीयसूत्रस्थतत्पदस्य आनन्दमयपरामर्शकत्वमिष्यते । आनन्दमयो नानन्दमयः; किन्तु तादितरद्ब्रह्मेति खलु प्रथमसूत्रार्थः फलति । विधिरेव प्रतिषेधार्थको भवति भवतां तत्सूत्रे । मान्त्रवर्णिकसूत्रे भवद्भाष्यं प्रत्याख्यातं भामत्याम् । न्याय्यमिदं यदस्मिन्नेवाधिकरणे स्वव्याख्येयं सूत्रं प्रत्याचक्षाणा भाष्यकाराः स्वव्याख्याता प्रत्याख्यायन्त इति । भामत्या भाष्यकारप्रत्याख्यानं च स्पष्टीकृतं कल्पतरुकृद्भिः ।

'भामत्या सूत्रकारग्रहणं व्याख्येयभाष्यानपेक्षत्वसूचनार्थम्'

इति कल्पतरुकृतः । भवद्ग्रन्थस्य व्याख्याता यदि कोऽप्युत्पत्स्यते ध्रुवं भवां-

स्तेन प्रत्याख्यास्यते । अथ वा नास्ति प्रत्याख्यातन्तरापेक्षा । भवत्पूर्वोक्तीर्मुहुर्मुहुः प्रत्याचक्षाणा भवन्तः स्वोक्तीरपि भूयो विप्रतिषेधन्ति । न भवतां स्वः पर इति भेदः प्रतिषेधने ॥

'नेतरोऽनुपपत्तेः' । अत्रेतरशब्दप्रतियोग्यानन्दमय एव भवति । 'तद्धेतुव्यपदेशाच्च' इति तच्छब्देन स एव परामृष्टो भवद्भिः । आनन्दमयेतरो नात्र प्रतिपाद्य इत्येव स्पष्टोऽर्थः । अत्रानन्दमय एव स्वेतरो भवति भवताम् ॥

'कामाच्च नानुमानापेक्षा' इति सूत्रेऽपेक्षाशब्दस्य वैयर्थ्यमुक्तं श्रुतप्रकाशिकायां प्रथमवर्णकव्याख्याने । एतदधिकरणविषयवाक्ये प्रधानप्रापकशङ्काबीजमेव नास्ति । अत्र न मीमांसकः पूर्वपक्षी । निरीश्वरः, सेश्वरो वा सांख्यः ; अन्यो वा पूर्वपक्षी स्यात् । विशेषवाक्यसमन्वये प्रत्यधिकरणं सांख्यादितरः पूर्वपक्षीति न निर्बन्धः । न्यायरक्षामणौ वर्णित एतत्सूत्रार्थो न वर्णितो भामत्यां, कल्पतरौ वा । अतस्तदर्थो नानूदितः श्रुतप्रकाशिकायाम् । 'काम्यत इति कामो भृगुवल्ल्युक्त आनन्दः । तद्दृष्टान्तमवलम्ब्यानन्दमयस्य प्राधान्यानुमाने न प्रत्याशा कार्या' इति न्यायरक्षामण्युक्तोऽर्थः । सौत्रकामशब्देन, श्रुतिस्थस्य 'अकामयत' इति शब्दस्य प्रत्यभिज्ञापनं स्पष्टम् । भृगुवल्ल्युक्तानन्दवदानन्दमयोऽपि ब्रह्मेति पूर्वपक्षो निरस्यत इति भवदभिमानः । तस्य निरसने को हेतुः प्रदर्शितः सूत्रेणेति वक्तव्यम् । कामादिति सौत्रपञ्चम्यन्तहेतोः प्रतिपिपादयिषितार्थसाधनस्वरूपहेतुत्वमुज्झित्वा दीर्घपुच्छवद्दीर्घहेत्वध्याहारः क्रियते वाक्यत्रयेण श्रीमद्दीक्षितैः—

'तत्र श्रुत्यैवानन्दस्योपक्रान्तब्रह्मरूपतायाः 'आनन्दो ब्रह्मेति व्यजानात्' इति, साक्षात् 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इति लक्षणमुखेन च पर्यवसानप्रतिपादनात् । तदनन्तरमन्यस्य प्रतिपादना-

भावात्। इह त्वानन्दमयप्रतिपादनानन्तरं ब्रह्मप्रतिपादनात्तत्रैव पूर्वोत्तरसन्दर्भसमन्वय इति वैषम्यसद्भावात्'

इति। पुच्छप्रकरणेऽस्मिन्पुच्छवद्दीर्घहेत्वध्याहारपक्षपात इव तेषाम्। कामादिति पदस्यानन्दार्थत्ववर्णनस्यान्याय्यतां 'यद्यपि सूत्रे कामादिति स्थाने स्पष्टार्थमानन्दादिति वक्तुमुचितम्' इति स्वयमुद्भाव्य तद्व्याख्यां परित्यज्यान्ततो वृत्तिकारप्रदर्शिता प्रधाननिराकरणरीतिरेवादृता। एवमत्यन्तमव्यवस्थितत्वं, अप्रतिष्ठितत्वं चात्र भवदीयव्याख्यानानां सर्वेषाम्। अर्थादर्थान्तरं धावन्त एवासते कान्दिशीकीभूय किङ्कर्तव्यतामूढतयैव।

तित्तिरयः पक्षिण आत्मनः पक्षवत्त्वेन रूपणं रोचयन्ते। अस्मिन् प्रकरणे पञ्चस्वप्यात्मसु शिरःपक्षपुच्छादयः प्रायेण कल्पिता एव। पक्षिरूपणमात्रमेव भवति। न यथार्था अवयवा अत्र प्रदर्श्यन्त इति शिशोरपि स्फुटं प्रथमपर्यायमारभ्य। न पुरुषस्यान्नमयस्य शरीरस्य वा पक्षिण इव पक्षौ स्तः। कल्पनामात्रमेवात्रावयवानामिति प्रथमपर्यायप्रभृति आन्तं स्फुटत्वात्; मुख्यावयवप्रतीतिमवलम्ब्य भवदीयपूर्वपक्षवर्णनमेवात्यन्तममूलम्। 'प्राचुर्यात्' इति सूत्रपदस्य 'आधिक्यात्' इत्यर्थं वर्णयन्तीव भवन्तः। कल्पितपुच्छरूपावयवमात्रे प्रतिष्ठेत्यधिकं विशेषणं दत्तमिति तदर्थ इति भवन्तः। तच्च सर्वेषु पर्यायेषु पुच्छसामानाधिकरण्येन पठितम्। सर्वपर्यायसाधारणेन प्रतिष्ठापदेन न किमपि साधयितुं शक्यम्॥

'मान्त्रवर्णिकमेव च गीयते' इति सूत्रस्य भवद्वर्णितोऽर्थो भवत्पूर्वैरुक्तेनार्थेन विरुद्धः स्वयमस्वरसश्च। मान्त्रवर्णिकपदेन 'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णस्य ग्रहणम्, गीयत इति 'ब्रह्म पुच्छं प्रतिष्ठा' इति श्रुतिखण्डविषयमिति च श्रीमद्दीक्षितानां स्पष्टोक्तिर्न्यायरक्षामणौ। तद्विरोधेन 'अत्र क्लीबान्तमान्त्रवर्णिकपदेन तदन्तमन्त्रवर्णघटकपदघटितोऽर्थवादः सूचितः; स चासन्नेवेत्यादिब्रह्मपदघटितः' इति भवन्तो वदन्ति।

"'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णोदितं ब्रह्मैवानन्दमय इति गीयते" इति श्रीभाष्यकाराः । असन्नेवेति ब्रह्मपदद्वयघटितश्रुतिः प्रथमसूत्रस्थाभ्यासहेतुना परामृश्यत इति भवदीयानां व्याख्यानम् । तस्या एव श्रुतेरत्रार्थवादरूपाकारान्तरेण पुनः परामर्शं भवदीयोक्तविरोधेन नूतनतया भवन्तो वदन्ति । तत्र न किमपि स्वारस्यं पश्यामः । गीयत इति व्यवहारस्य श्लोकमात्रविषयत्वमिति भवदभिमान इव । 'ब्रह्म पुच्छं प्रतिष्ठा' इति वाक्यं गीयत इति परामृश्यत इति श्रीमद्दीक्षितानां स्पष्टोक्तिः । अत्र श्रीभाष्यार्थस्य दूषणं श्रीमद्दीक्षितानामर्थस्यापि दूषणं भवति । वस्तुतस्तु—तावुभावपि निर्दोषौ ; भवद्दूषणमेव दुष्टम् । भवच्चोद्यं सूत्रकृच्छैल्यनभिज्ञतामूलम् । 'योनिश्च हि गीयते' इति सूत्रस्थगायतिना 'यद्भूतयोनिं परिपश्यन्ति धीराः' इति मुण्डकवाक्यमपि परामृश्यते , यथा कर्तारमीशं पुरुषं ब्रह्म योनिम्' इति श्लोक इति भगवत्पादाः । नात्र सामप्रसक्तिः । गीतिबद्धम् , प्रगीतमन्त्ररूपमिति सामलक्षणम् । पादबद्धा ऋक् । अत्रासन्नेवेति ऋगेव । न मन्त्रस्य , ब्राह्मणवाक्यस्य वा मुख्यगानप्रसक्तिः ; यथा साम्नः । किमर्थं गीयत इत्युच्यत इति चेत्—अस्ति भाषातो वैजात्यम्, वेदस्य गीतिनिर्वर्तकस्वरैरध्ययननियमात् । यजुर्वाक्यानामध्ययनं गानमिव भवतीति सर्वलोकप्रसिद्धम् । अत्रान्ते मुक्तगीता गीयते श्रुत्या 'एतत्साम गायन्नास्ते हा वु हा वु हाविति' इति गीतनिर्देशानुश्रवणपूर्वकम् । तेन च साम्न एव मुख्यं गेयत्वमित्यवगम्यते । तित्तिरीणां पक्षिणां रावः सर्वोऽपि गीतिरेव ॥

मान्त्रवर्णिकपदं क्लीबं प्रायोजि सूत्रे । तावता भवदभिप्रेतं किमपि न सिद्ध्येत् । परामृष्टमन्त्रवर्णः 'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्र इति संप्रतिपन्नम् । तत्र क्लीबं ब्रह्मैव श्रूयते । तत्परामर्शकपदेन क्लीबेनैव भाव्यम् । बहुवाक्यव्यवधानानन्तरमव्यवहितपूर्वपुंलिङ्गात्मादिश-

ब्दान्विहाय क्लीबशब्दघटितवाक्यस्यैव गीयत इति परामर्शनिर्बन्धस्य नास्त्येवावकाशः ॥

अस्त्यत्र गायतिनिर्देशे महत्स्वारस्यम् । आदौ मन्त्रवर्णोदितं ब्रह्मैव प्रक्रान्ततयाऽस्यामुपनिषदि गीयत इति सूत्रार्थः । आनन्दमयवाक्ये तत्पूर्वं, तदनन्तरं च मान्त्रवर्णिकब्रह्मैव प्रकरणितया गीयत इति भावः । मान्त्रवर्णिकब्रह्मप्रकरणादिति फलितो हेतुः । इदमेवानूद्यते पुच्छभाष्ये भवद्भाष्यकारैः 'मान्त्रवर्णिकब्रह्माविकारादिति चेन्न । अन्नमयादीनामपि तर्हि ब्रह्मत्वप्रसङ्गः' इति । अधिकारः प्रकरणम् । यद्यपि श्रीमन्मध्वमुनयोऽन्नमयादीनामपि ब्रह्मत्वं भाषन्ते पञ्चात्मनां व्यूहपञ्चकपरत्वरुच्या, आवयोरुभयोः पूर्वेषां चतुर्णामब्रह्मत्वमिष्टम् । गाने स्तोभाक्षराणि भवेयुः । तेषां गीत्युपयोगित्वम् ; न गीतिसंस्कार्यत्वम् । गीत्यभिव्यञ्जकतया तेषां गीतिमध्यपतितत्वम् । गाने स्तोभाक्षरवदन्नमयादयः स्वयमब्रह्मत्वेऽप्यानन्दमयं ब्रह्म स्थूलारुन्धतीन्यायेन व्यञ्जयन्ति । तस्यैवानन्दमयस्य कृत्स्नेऽस्मिन् प्रकरणे मुख्यं गेयत्वम् । इतरेषां स्तोभत्वमेवेति दर्शयितुं गीयत इत्युक्तं सूत्रकृता । इदं स्वारस्यमस्मदीयै रसिकाग्रेसरैः सुरपुर—श्रीनिवासाचार्यैः प्रदर्शितम् ॥

गीयत इति प्रयुञ्जानः सूत्रकृदानन्दमयपरत्वमेव गानस्याभिप्रेयात् । आनन्दमयत्वमेव गानस्येष्येत । तद्विषयं गानमानन्दमयगानं भवेत् । अनानन्दमयस्य गानविषयत्वकथनं न स्वरसम् । 'अत्राह्मणस्यैव ब्राह्मणत्वं कल्पितं सूत्रकृतेति वृत्तिकारो बभ्रामेति, भवदभिमानः । वृत्तिग्रन्थो नोपलभ्यत इदानीम् । प्रथमवर्णकभाष्यात्तदभिप्राय उन्नेयो भवति । वृत्तिकारे भवदुक्तं भ्रममुन्नेतुम् नास्त्यल्पोऽप्यवकाशो मान्त्रवर्णिकसूत्रभाष्ये । अस्मिन्विषये भगवत्पादभाष्योपरि भामत्या व्यञ्जितो दोषो नैव लगति । मन्त्रब्राह्मणयोः परस्परं व्याख्यानव्याख्येयभावे भवन्तोऽस्मदीयग्रन्थपठनेन

व्युत्पादनीया एव । नाद्यापि तद्विषये व्युत्पन्ना भवन्तः । क्वचिन्मन्त्रो ब्राह्मणेन व्याख्यायते । 'ब्रह्मविदाप्नोति परम्' इति सूत्रभूतं ब्राह्मणवाक्यम् । 'तदेषाभ्युक्ता'इति तदर्थप्रकाशनविषये मन्त्रभूता ऋगभिधीयते 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादि । 'तद्ब्रह्माभिमुखीकृत्य प्रतिपाद्यतया परिगृह्य ऋगेषाऽध्येतृभिरुक्ता । ब्राह्मणोक्तस्यार्थस्य वैशद्यमेनेन मन्त्रेण क्रियत इत्यर्थः' इति श्रीभाष्यम् । 'संग्रहेणोक्तस्य विस्तरेण कथनं; विस्तृतस्य प्रतिपत्तिसौकर्याय संग्रहेण कथनमपि वैशद्यावहम् ।' इति श्रुतप्रकाशिका । 'उपक्रमत्वप्राप्तप्रकाशत्वादिकं प्रयोजकम् ; मन्त्रत्वब्राह्मणत्वादिकं प्राबल्यदौर्बल्यादावप्रयोजकमिति भावः' इति भावप्रकाशिका । 'मन्त्रब्राह्मणयोश्चैकार्थत्वं युक्तम् ; अविरोधात्' इति भवद्भाष्योक्तं साध्वेव । वृत्तिवचनानुवाद एव भवतु सः । न तत्र मन्त्रे ब्राह्मणव्यवहारं वा , ब्राह्मणे मन्त्रव्यवहारं वा पश्यामः । "ब्रह्मविदाप्नोति परम्' इति ब्राह्मणस्यानुव्याख्यानरूपः सत्यं ज्ञानमित्यादिमन्त्र आम्नातः । 'आनन्त्यवाचकतन्मन्त्रव्याख्यानरूपोऽनुवाकशेषः' इति परिमले उक्तम् । यथासम्भवं मन्त्रब्राह्मणयोर्व्याख्यानव्याख्येयभावो भवेत् । नात्र वृत्तिकारोक्तौ , भवद्भाष्योक्तौ वा किमपि दूषणीयमस्ति । 'तथा च वृत्तिर्न सूत्रानुगुणेति सिद्ध्यति' इति भवन्निगमनस्यासिद्धिरेव । मान्त्रवर्णिकब्रह्मणः प्रकरणमेव हेतुतयोपन्यस्तं वृत्तिकृता ।

वृत्तिकारो मत्तो मतङ्गज इति भवदुक्तिर्मत्तैव । सत्त्वोत्तरं पारमर्षं सूत्राक्षरानुसारि तद्व्याख्यानम् । सूत्राक्षरस्वारस्यभञ्जनभीरुः स इति भवानिदानीमेवावोचत् । तद्विरोधेन स मत्तो मतङ्गज इतीह कथ्यते । भवदुक्तेषु भीरुमशकमत्तमतङ्गजमहामारुतेषु को भवानिति भवानेवात्मानं पृच्छतु । मशको नाम कृष्णः कश्चित् संशोकजो यः कर्णान्तिके कटु स्वनन्नाक्षिणी पीडयन् क्षेत्रिणो व्यथयति इति जन्तुतत्त्वज्ञाः ।

'न चायमवैयाकरणः पूर्वपक्षीति शप्तुं शक्यम् ; येन प्राचुर्येऽपि

स्मरणस्मारणार्थमुत्तरसूत्रमिति समाधातुं शक्येत' इति भवदुक्तिः । नानुशासनस्मारणमात्रं क्रियते द्वितीयसूत्रेण ; किन्त्वनुशिष्टार्थद्वयमध्ये प्राचुर्ये प्रयुज्यते आनन्दमयशब्दगतमयडित्यपि कथ्यते । 'मुख्यत्वे तूभयोस्तुल्ये' इति भामत्युक्तं विस्मृतं भवद्भिः । अर्थद्वयस्याप्यनुशिष्टत्वादर्थविशेष-ग्रहणनियमे युक्तिः प्रदर्शनीयैव । अन्नमये विकारार्थकत्वे प्रयोगात्तदनुसारेणानन्दमयोऽप्यानन्दविकारो भवत्विति पूर्वपक्ष्याक्षेपः । आनन्दमयात् पूर्वमपि मयट् प्राचुर्ये प्रयुक्तः । प्राचुर्य एवास्मिन्प्रकरणे मयटः प्रचुरप्रयोग इत्यपि सूच्यते प्राचुर्यादिति । न प्राचुर्यार्थेऽपि मयटोऽनुशासनमात्रमत्रोच्यते ; किन्तु तदर्थ एवात्र मयडित्यपि कथ्यते । तस्मिन्नर्थेऽत्र प्रयोगप्राचुर्यमपि सूच्यते । 'उपदेशभेदान्नेति चेन्न उभयस्मिन्नप्यविरोधात्' इति सूत्रस्य विवक्षितार्थे कारकप्रयोगसाधुत्वमेव पूर्वपक्षी शिक्ष्यते ॥

'तृतीयसूत्रमपि नात्यन्तमुपयोगाय स्यात्' इति भवदुक्तिर्मुधैव । आनन्दयातीति श्रुत्या आनन्दहेतुत्वमेव व्यपदिश्यते 'एषः' इति परामृष्टस्य प्रकरणिनः । आनन्दमय एवानन्दयेत् । आढ्यो भिक्षां दद्यात् । 'एष ह्येवानन्दयाति' इति श्रुतिर्ब्रह्मविषयेति भवत्सम्मतम् । आनन्दमय एवानन्दयेदित्यानन्दमयस्य ब्रह्मत्वं साध्यतैव । द्वितीयसूत्रान्तोक्तं प्राचुर्यं मयडर्थः । प्राचुर्यञ्चानन्दस्य । द्वितीयसूत्रान्तोक्तं प्राचुर्यमप्युपपाद्यते आनन्दहेतुत्वकथनेन । 'इति च विकारार्थे मयट्प्रवाहे सत्यानन्दमय एवाकस्मादर्धजरतीन्यायेन कथमिव मयटः प्राचुर्यार्थत्वम् ; ब्रह्मविषयत्वं चाश्रीयते' इति भवद्व्याख्याकाराः पृच्छन्ति । एवंवादी पूर्वपक्ष्यानन्दमयशब्दे मयटः प्राचुर्यार्थत्वम् , प्रकरणे तदर्थस्य प्रचुरप्रयोगं च व्युत्पादनीय एव ॥

शारीरत्वश्रवणेन जीवत्वं शङ्कितमानन्दमयस्य । 'तस्माद्वा एतस्मा-

द्विज्ञानमयादन्योन्तर आत्माऽऽनन्दमयः' इति विज्ञानमयादानन्दमयस्यान्तरत्वमन्यत्वं च व्यपदिश्यते । विज्ञानमयस्य जीवत्वं सुनिश्चितम् । भूयः प्रयुज्यते श्रुत्या स शब्दः शारीरे । विज्ञानमय एव विज्ञानशब्देन व्यवह्रियते, 'विज्ञानं यज्ञं तनुते' इति तद्विषयश्लोके । तद्वदानन्दमयोऽप्यत्रानन्द इति व्यवह्रियते । 'भेदव्यपदेशाच्च' इति सूत्रेण श्रुतिगतान्य-शब्द एव परामृश्येत । अन्यशब्दो भेदव्यपदेशः । भेदश्च शारीराद्विज्ञानमयात् । विज्ञानमयस्य शारीरत्वमुक्तं तैत्तिरीयवार्तिके श्रीमत्सुरेश्वराचार्यैः । विज्ञानमन्तरो यमयन्नमृतोऽन्तर्याम्येव भवेत् ॥

मयटा, अभ्यासेन च बोधित आनन्दप्राचुर्यरूपहेतुरुपपादितः सूत्रत्रयेण । आनन्दमयस्य ब्रह्मत्वसाधने आनन्दमयपदगतमयड्विषये विचारः प्रवृत्तः । 'आनन्दमयस्य जीवादन्यत्वं स्ववाक्यैकदेशमयडन्तपदवाच्यनिरतिशयानन्दयोगेन प्रथमसूत्रेणोपपादितम्' इति श्रुतप्रकाशिका । 'तुरीयपञ्चमसूत्राभ्यामुपक्रमस्थो हेतुरनुसंहितः । षष्ठसूत्रे मध्यगतः स्फुटो हेतुरनुसन्धीयते' इति च तत्र प्रदर्शितम् ॥

'कामाच्च नानुमानापेक्षा' इति सूत्रस्य भवद्व्याख्याया अस्वरसता पूर्वमेवोक्ता । प्रथमवर्णकव्याख्यायामपेक्षाशब्दवैयर्थ्यम्, प्रधानस्यात्र शङ्काबीजाभावश्चोक्ते । 'प्रधानशङ्काहेतुश्चास्मिन्ननुवाके नास्ति । अपेक्षाशब्दवैयर्थ्यं च स्यात्' इति श्रुतप्रकाशिका । प्रधानशङ्काया बीजं भवता न किमप्युक्तम् । अतस्तदभावो भवताऽभ्युपगत इत्येव मन्तव्यम् । 'कामाच्च' इति सूत्रखण्डस्य 'अकामयत' इति श्रुतिखण्डप्रत्यभिज्ञापनं स्वरसम् । आनुमानशब्दस्य प्रधानतद्विकारार्थकत्वं स्वरसम् । अत्रापेक्षा च करणकलेबरावस्थाचित्संसर्गस्य । 'सङ्कल्पहेतुभूतकरणकलेबरावस्थाचित्संसर्गापेक्षा नास्तीत्यर्थः' इति श्रुतप्रकाशिका । कामः सङ्कल्पः । तादृशापेक्षा नियताऽनीश्वराणां शारीराणाम् । अनेन हेतुनाऽपि शारीरत्वशङ्का व्यावर्त्यते ।

कामभात्रेण सृष्टिश्रवणान्नानुमानप्रधानादिपदाभिधेयाचित्संसर्गापेक्ष आनन्दमयस्य सर्ग इति प्रतीयते । जीवस्य तु हिरण्यगर्भादेरस्ति तदपेक्षा सर्ग इति नानन्दमयो जीव इति श्रीमान् । इदं तु प्रथमतः क्लिष्टम्, प्रकृतेः स्वरूपतो वियदादिना अन्यथाभाव उत्पत्तिः जीवस्य तु धर्मभूतज्ञानविकासः । तदुभयविशिष्टत्वमेव परस्य स्रष्टृत्वमिति स्वाभ्युपगमविरोधश्चेत्यसमञ्जसम्'

इति भवदुक्तमसमञ्जसमेव । सङ्कल्पहेतुभूतशरीरसंसर्गापेक्षाया एव निषेधात् ।

'त्वदभिमतं त्वशब्दमेव , मदभिमतं त्वीक्षितृ' इति भवदुक्तिः । अशब्दत्वस्य कथमीक्षितृत्वप्रतिकोटित्वमिति न ज्ञायते । अहंप्रत्ययविषयो जीवोऽप्यशब्दः । सोऽपि न शब्दैकसमाधिगम्यः । अशब्दोऽपि स ईक्षिता । ईक्षातिना केवलचैतन्यमभिधीयत इति पूर्वं भवतोक्तमत्र भवता विस्मृतम् । हठात्कारोक्तिरेव सा तत्क्षणोक्तेति निश्चीयते ॥

अत्र विषयवाक्ये प्रधानविषयत्वसंशयप्रापकं किमपि बीजं नास्तीति स्पष्टम् । तत्संशायकबीजाभावादत्र पूर्वपक्षोपन्यासे शारीरो वा, ब्रह्म वेति द्विकोटिक एव संशयः प्रदर्शितो भाष्यद्वयेऽपि । आनन्दमयः शारीर इति भवदभिमानः । एवमेवानेकत्र द्विकोटिकः संशयो भाष्यते भाष्यद्वयेऽपि । क्वचित्त्रिकोटिकस्तदधिककोटिकश्च । विषयवाक्याधीना संशयकोटिसङ्ख्या । 'परं तु जीवाशङ्कानिराकरणपरतया विवृण्वन्श्रीभाष्यकार एवात्रासङ्गतो दृश्यते' इति भवदुक्तिरसङ्गतैव । संशयबीजस्यात्यन्ताभावे संशयोत्थितिवर्णनमेवासङ्गतं भवेत् । 'तत्र तावदानन्दवल्ल्या जीवपरत्वनिरासेन ब्रह्मपरत्वमस्मिन्नधिकरणे समर्थ्यते' इति न्यायरक्षामणिर्जीवनिरासमेवाधिकरणकृत्यं वदति । सैवासङ्गतिः ॥

अत्र मीमांसकः पूर्वपक्षीति भवदभिमानः । ब्रह्मणो जीवस्य पुच्छत्वं केनापि मीमांसकेन नोच्यते । ब्रह्मणो जीवपुच्छत्वमवलम्ब्य पूर्व-

पक्षवर्णनमेव न साधु । न कोऽपि वादी तथा प्रत्यवतिष्ठते । 'तस्यैष एव शारीर आत्मा' इत्यानन्दमयस्य शारीरत्वश्रवणादानन्दमयः शारीरो जीव इति संशयोत्थानम् । पूर्वाधिकरणविषयभूतसद्विद्यायां कारणस्य जीवसामानाधिकरण्यं श्रुतम् । तत्र जीवब्रह्मणोरैक्यव्यपदेशोऽपि पूर्वपक्षवजिम् । पूर्वपक्ष्यभिमत ऐक्यव्यपदेशहेतुः 'भेदव्यपदेशाच्च' इति सूत्रकृता निरस्यते ॥

'आद्रावमानः साङ्ख्यः पृष्ठतो निलीनः' इति भवदुक्तिर्भवत्कल्पनामात्रमूला । पुनः पुनः साङ्ख्यः पूर्वपक्षितया बहुष्वधिकरणेष्वसहायः स्वबलेनैव पुरतः प्रत्यवतिष्ठत इति संप्रतिपन्नम् । 'कामाच्च नानुमानापेक्षा' इति सूत्रमेकमेवात्र साङ्ख्यनिराकरणपरतया वृत्तिकारेण व्याख्यातम् । तच्च भवत्कल्पनां समूलकाषं कषति । पूर्वसूत्राणि सर्वाणि जीवनिरासपराणि । अनन्तरसूत्रमपि जीवनिरासपरम् । इदमेकमेव सूत्रं प्रधाननिरासपरमिति पूर्वं पश्चाच्चानुस्यूततया प्रक्रान्तं जीवनिरासं परित्यज्यार्थवर्णनं न स्वरसम् ॥

अस्मदर्थस्य क्लिष्टत्वोपपादनायोच्यते भवद्भिः 'न क्वाप्यनुमानपदेन प्रधानप्रतिपादनं पश्यामो वेद इति च' इति । ध्रुवं विस्मरणसागरे मग्ना यूयम् । 'नानुमानमतच्छब्दात्' इति सूत्रप्रयोगो विस्मृतो भवद्भिः । 'आनुमानिकमप्येकेषाम्' इति सूत्रमपि विस्मृतम् । अत्र अनुमानशब्दो वा, आनुमानशब्दो वा स्यात् । कठवल्ल्याम् 'अव्यक्तशब्देन शरीरं बोध्यते' इत्यानुमानिकाधिकरणप्रथमसूत्रेणोक्तम् । अत्राप्यनुमानशब्देन प्रधानविकारभूतशरीरं गृह्यते । स्रष्टुः शरीरापेक्षाशङ्का सहजा । तथा च शारीरत्वं सिषाधयिषति पूर्वपक्षी । 'शारीर आनन्दमयः सशरीर एव स्यात्, स्रष्टुः शरीरापेक्षानैयत्यात्' इति पूर्वपक्षी । एवमतिस्वरसोऽस्मदर्थः ॥

'प्रत्येकं पराकृतयोरनुक्षणमेव युगपत्पराकृतिरप्यावश्यकीत्येतदपि त्यक्तं भवति' इति भवन्तः शपन्ते । भवदुक्तनियमस्य न कमपि कल्पक-

हेतुं पश्यामः । भवच्छपथमात्रं भवति । एतादृशनियमो न कुत्रापि दृष्टचरोऽत्र वाऽन्यत्र वा । प्रतिज्ञामात्रेण न कोऽप्यर्थः साधितो भवेत् । उत्तरत्रानेकेष्वधिकरणेषु 'असहायः सांख्यः पूर्वपक्षयन्प्रत्यवतिष्ठते' इति भवद्भाष्यसम्मतम् ।

'अस्मिन्नस्य च तद्योगं शास्ति' 'अस्य जीवस्य तस्यानन्दस्य योगं तद्योगं शास्ति रसमेवायं लब्ध्वा आनन्दी भवति इतीति श्रीमान् । अत्र किन्नामास्ति शासनम् । अत्र हि पुच्छत्वेनावतारितं मान्त्रवर्णिकं ब्रह्म सत्त्वासत्त्ववेदनस्तुतिनिन्दापूर्वकं सकलजगत्स्रष्टृत्वेन प्रसाध्याध्यात्मं सर्वप्राणिप्राणनहेतुतया आनन्दपदेन प्रतिनिर्दिश्य रसतया साक्षात्क्रियते सर्वैरप्यन्वहमिदमिति साधयति । अस्माभिरुदाहृतं तु 'यदा ह्येवैष एतस्मिन् अभयं प्रतिष्ठां विन्दते अथ तदा सोऽभयं गतो भवति, तस्मादवश्यं विन्देतेति शास्ति'

इति भवदीयो विचित्रविचित्रोपन्यासः । " 'रसो वै सः' 'रसं ह्येवायं लब्ध्वा आनन्दी भवति' इति वाक्यं न किमपि शास्ति । तस्य शास्त्रत्वं नास्तीति" भवानेक एव भाषेत । वक्तीति शास्तिशब्दार्थः । शास्त्रत्वाच्छास्तीति व्यवहारः । उपदेशकत्वं शास्त्रस्य । विधिरेव नाङ्गीक्रियते भवद्भिः । ज्ञापकत्वमेव शास्त्रस्य भवन्मते । 'शास्ति प्रतिपादयतीत्यर्थः' इति श्रीमद्ब्रह्मानन्दमुनयः शास्त्रमुक्तावल्यामेतत्सूत्रार्थवर्णने । अत्र आनन्दी भवतीत्युच्यते । भवदुदाहृतवाक्ये 'अभयं गतो भवति' इत्युच्यते । आनन्दवेदनेनाभयत्वप्राप्तिरित्यत्रैवोच्यते । वाक्यद्वयमपि प्रायेण समानार्थकम् । परं त्वत्रानन्दमयत्वस्य ब्रह्मत्वसाधने 'आनन्दी भवति' इति वाक्यस्य यथा साक्षात्साधकत्वम्; न तथा अभयवाक्यस्य । वाक्यद्वयमप्युदाह्रियताम् ; का वा हानिः । वृत्तिकारः खलु भवदुदाहृतवाक्यमस्मिन्सूत्रे उदाजहार । भाष्यकारो न किमपि वाक्यमुदाहरत् । न्या-

यरक्षामणौ भवदभिमतपुच्छपरत्वार्थे 'रसं ह्येव—इति श्रुतिरस्मिन्सूत्रे उदाहृता । भवदभिमता 'अभयं प्रतिष्ठां विन्दते' इति श्रुतिर्नैवोदाहृता ॥

'पुच्छत्वेनावतारितं मान्त्रवर्णिकं ब्रह्म' इति भवदुक्तिः । मान्त्रवर्णिकमिति सौत्रं पदम् 'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णस्य परामर्शकमिति भवदीयसर्वव्याख्यातृसंप्रतिपन्नम् । तन्मन्त्रे पुच्छस्य गन्धोऽपि नास्ति । पुच्छमेव पश्यन्तीव भवन्तः सर्वत्र ॥

'मुख्यया तात्पर्यवृत्त्या' इति भवदुक्तिर्न चतुरा । अभिधावृत्तितो भिन्नापि भवति तात्पर्यवृत्तिः । मुख्यशब्देन बलीयस्त्वं विवक्ष्यत इव भवद्भिः । बलीयस्येत्येव प्रयोक्तव्यम् । सर्वपदलक्षणया खलु समन्वयो वर्ण्यते भवद्भिः । विवक्षितावाचकस्य विपरीतार्थबोधनसमर्थस्य पारिभाषिकमुख्यशब्दस्यात्र प्रयोगो न सुश्लिष्टः ॥

'वेदानामेकवाक्यत्वाय कर्मैकपरत्वमुपयतः सर्वात्मनो विपरीतं संवृत्तम्' इति मीमांसकमधिकृत्योक्तं भवद्भिः । कर्मैकपरत्वेन वेदानामेकवाक्यत्वं नैव वर्ण्यते मीमांसकेन । वाक्यैकवाक्यत्वाभ्युपगमेऽप्येकप्रकरणस्थवाक्यानामेवैकवाक्यत्वमिष्टं तस्य । सर्वशाखाप्रत्ययस्यैकत्ववर्णनमपि संयोगरूपचोदनाख्यानामविशेषत्व एव ; न कृत्स्ने वेदे । भवदुक्तस्य साधुत्वे भेदलक्षणभूयोभागो दत्तजलाञ्जलिः स्यात् । वेदान्तप्रतिपाद्यात्मज्ञानस्य कर्तृसंस्कारत्वमुपपाद्य वेदान्तानां कर्मशेषत्वमुपपाद्यते कैश्चित् । भवदुक्तिरचतुरैव । अकाण्ड एव श्रीभाष्यकाराणां समीचीनप्रयोगानपि व्यसनितया भवन्तो दूषयन्तीति भवदुक्तव्यचातुर्यं किंचिदेव प्रदर्शितमत्र ॥

योनिशब्दविषये भवदीयविजृम्भणमसभ्यम् ; विरसं च । योनेः प्रकाशकत्वं कुत्रापि कैरपि नोक्तं शास्त्रेषु ; काव्येषु वा । ब्रह्मणः, शास्त्रस्य वा भवद्विवक्षितयोनित्ववर्णनं जुगुप्सितम्; उद्वेगकरं च । भवदुक्तानुवादादपि वयं त्रस्यामः ॥

'यतोऽधीतयजुरादिसर्ववेदस्य तन्मयतामापन्नस्य तत्संस्कृतमनोमयस्य' इति भवदुक्तमनोमयस्य जीवत्वं भवानभिमन्यत इवेति भाति । 'कार्यात्मानो हि भौतिकाः इहाधिकृताः' 'तस्य च बाह्याकारविशेषेष्वनात्मस्वात्मभाविताबुद्धिर्विना आलम्बनविशेषं कञ्चित्सहसाऽन्तरतमप्रत्यगात्मविषया निरालम्बना च कर्तुमशक्येति दृष्टशरीरात्मसामान्यकल्पनया शाखाचन्द्रनिदर्शनवदन्तःप्रवेशयन्नाह' इति च भवदीयतैत्तिरीयभाष्यान्मनोमयस्य भवन्मतरीत्या आत्मत्वमस्ति किमिति संशेमहे । अन्नमयादीनां पञ्चकोशत्वं आत्मनः पञ्चकोशातिगत्वं चोच्यते । 'मनोमयादिभिः पूर्वपूर्वव्यापिभिरुत्तरोत्तरैः सूक्ष्मैरानन्दमयान्तैः' इति भाष्योक्तिः पूर्वपूर्वस्योत्तरोत्तरव्याप्यत्वमभ्युपगम्यते । मनोमयस्यापि चैतन्यत्वे तस्य तदुत्तरव्याप्यत्वात्स्वस्य स्वेनैव व्याप्यत्वप्रसङ्गः । स्थूलारुन्धतीन्यायेनान्नमयादारभ्य क्रमेण परित्याज्यपरित्याज्यान्तरन्तः प्रवेश्य विज्ञानमयं जीवं प्रदर्श्य तदन्तरं परमात्मानं दर्शयति श्रुतिः । अत्र तन्न्याय एवोपन्यस्यते । पञ्चानामात्मत्वं नोच्यतेऽस्माभिः । आनन्दमयमात्रस्य परमात्मत्वमुच्यते ॥

'नन्वभ्यासो नाम समानेन पदेन पुनः पुनः परामर्शः । स चात्रानन्दपदेन । आनन्दश्च ब्रह्म । अतः स एवानन्दमय इत्यर्थः' इत्यारभ्य भवदुक्तिभिरस्मन्मतानुवादोऽभिप्रेयत इव । भवदनुवादो मिथ्यैकान्तः । एवमयथार्थानुवादी ध्रुवं मिथ्यावादी भवेत् । व्यवहारस्य मिथ्यात्वमिष्टं खलु भवताम् । आनन्दमयः शारीरजीवादतिरिक्तः शारीरासंभावितस्यानन्दस्य निरतिशयदशाशिरस्कतया तद्विषयेऽभ्यासात् । गुणनमभ्यासः । आनन्दगुणस्य निरतिशयदशाशिरस्कतयाभ्यासाद्गुणनादित्येका रीतिः । यद्यपि 'स एको ब्रह्मण आनन्दः' इत्युक्तस्य ब्रह्मानन्दस्य तदनन्तरं गुणनं न दृश्यते ; किन्तु तस्य वाङ्मनसातीतत्वमात्रं श्राव्यते, तथापि मानुषानन्दादारभ्य शतगुणितोत्तरक्रमेण गुणितानां सर्वेषामानन्दानाम् 'व्रीहिशतं गुञ्जा' इति-

वत्कथञ्चिद्ब्रह्मानन्दैकदेशत्वेन कथञ्चिदभेदाद्ब्रह्मानन्दस्यैव गुणनं कृतमित्यभिप्रेयते । अभ्यासशब्देन प्रकरणदृष्ट आनन्दगुणाभ्यासो गृह्यते । अभ्यासशब्दे प्रयुक्ते कस्याभ्यास इत्याकांक्षा भवति । प्रकरणे आनन्दस्य भूयोऽभ्यासो दृश्यते । गुणनरूपाभ्यासः, मुहुर्मुहुरुक्तिरूपाभ्यासश्चानन्दविषये दृश्यते । स चाभ्यासो यद्वस्तुविषये दृष्टस्तस्यानन्दमयत्वोपपादक इति केनापि नापह्नोतुं शक्यम् । आनन्दमयः क इति विशयः । तस्य शारीरत्वं श्राव्येत ; तद्विषये शतगुणितोत्तरक्रमेण निरतिशयानन्दवत्त्वं चाभ्यस्यते । जगच्छरीरे परमात्मनि ; जीवे च शारीरत्वं योजयितुं शक्यम् । शारीरत्वश्रवणप्रापितजीवत्वसंशयः, आनन्दमयत्वोपपादकानन्दाभ्यासप्रदर्शनहेतुना निरतिशयानन्दबोधने तात्पर्यप्रदर्शनेन तदसंभविपरिमितसुखलवप्रभूतदुःखभागिजीवव्यावर्तनेन निवर्त्यते । निरतिशयानन्दबोधकस्य 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' इति श्रुतिखण्डस्यानन्दमयविषये द्विरभ्यासाद्विरुक्तेरानन्दमयस्य निरतिशयानन्दबोधने तात्पर्यमवधार्यत इत्यपरा रीतिः । आनन्दमयपठनानन्तरमानन्दमीमांसां प्रक्रम्य शतगुणितोत्तरक्रमेण ब्रह्मानन्दस्यानन्दकाष्ठात्वं प्रदर्शयन्ती, तत्रापि परिगणनविषयत्वप्रतीतिसंभवात्संत्रस्य तस्य वाङ्मनसातीततां वर्णयन्ती श्रुतिरानन्दमयस्य मयड्बोधितानन्दप्राचुर्यस्यैवोपपादनं वष्टीति स्वारस्यं रसिकः कोऽपि नापह्नुवीत । आनन्दमयस्य जीवत्ववादी पूर्वपक्षी तद्विषये श्राव्यमाणस्यानन्दप्रचुरताबोधकवाक्यस्य स्तुतिमात्रत्वम्, तत्र श्रुतेरतात्पर्यं चाभिमन्यते । शारीरस्य जीवस्य निरतिशयानन्दत्वं नेष्टं तस्य, दृष्टबाधात् । अभ्यासरूपलिङ्गोपन्यासेन निरतिशयानन्दबोधने श्रुतेस्तात्पर्यं निर्णीयते सिद्धान्तिना । आनन्दपदेन नात्र ब्रह्मपरामर्शो वर्ण्यतेऽस्माभिः । निरतिशयस्यानन्दधर्मस्य पुनः पुनर्गुणनेन निरतिशयानन्दवद्वस्तुनि तात्पर्यं निर्णयामः ॥

'आनन्दपदाभ्यासो दृश्यते । आनन्दो ब्रह्म । अत आनन्दमयो ब्रह्म' इति भवदनुवादो भ्रान्तिमूलो भवद्बुद्धिमात्रकल्पितः ॥

'अभ्यस्यतां नाम ब्रह्म । अथापि कथमानन्दमयो ब्रह्मेति चेदधिकृतस्यैवाभ्यस्यत्वादन्यथाप्रसक्तप्रसङ्गात्' इति भवदनुयोगोऽपि मिथ्या । वयं ब्रह्मशब्दाभ्यासम् ; आनन्दशब्दाभ्यासं वा हेतूकुर्मः । अयोगव्यवच्छेदपरोऽयं पाद आवयोरुभयोरपि । नाद्यापि ब्रह्मणि प्रसिद्धिः सिद्धा । वैदिको निरीश्वरवाद्यत्र पूर्वपक्षी । ब्रह्मणः, तत्प्रसिद्धेर्वा पूर्वपक्ष्यसंप्रतिपन्नत्वात्तं प्रति ब्रह्मशब्दाभ्यासस्य हेतुत्वोपन्यासोऽकिञ्चित्करः । पूर्वपक्ष्याभिमतजीवाकाशज्योतिःप्राणेन्द्रियाद्यतिरेकसाधनमुखेन ब्रह्मणः प्रसिद्धिमनेन पादेन प्रसाध्यानन्तरपादारम्भे 'प्रसिद्धोपदेशात्' इति ब्रह्मणस्तत्कारणत्वस्य च प्रसिद्धत्वमुपन्यसिष्यते । 'नाशब्दं' इत्यनुवृत्त्या प्रधानजीवनिषेधं 'भेदव्यपदेशाच्चान्यः' इति सूत्रादन्यशब्दस्यानुवृत्त्या प्रधानजीवाद्यन्यत्वञ्च वर्णयामो वयं प्रत्यधिकरणम् । अस्मद्रीतिरुभयाभ्युपगतपादोपाधेरत्यन्तानुरूपा । अशब्दत्वं ; शब्दैकगम्यत्वाभावः । तादृशमशब्दत्वं स्वयंप्रकाशजीवस्यापि समानम् । अस्मिन्पादे ब्रह्मशब्दाभ्यासबलाद्ब्रह्मत्वसाधनस्येदं दुष्परिहरं दूषणम् । अनन्तरायां त्रिपाद्याम् 'प्रसिद्धोपदेशात्' 'साधारणशब्दविशेषात्' 'स्वशब्दात्' 'प्रसिद्धेश्च' इत्यादिहेतव उपन्यासार्हाः । तत्र च साध्यपदानुवृत्तिः 'सः' 'सः' 'प्राज्ञः' इति व्यक्तिविशेषसमर्पणायेष्यते क्रमेण पादत्रये । 'अधिकृतस्यैवाभ्यस्यत्वात्' इति नोक्तमस्माभिः । आनन्दमयस्यासकृदुक्तिरूपाभ्यासं वयं न हेतूकुर्मः । 'अथैवं निर्बन्धे' 'नियमस्यैव ततो बलीयस्त्वे' इत्यादिका भवदुक्तिरपि भवद्भ्रमकल्पितभवदीयासमीचीनयुक्तिविषया । स्वाप्निको मायिकश्च भवद्वादः । कामं निन्दन्तु भवन्तो भवद्बुद्धिकल्पितास्मदनुयुक्तीः । का हानिस्ततोऽस्माकम् ? ॥

'कथं मयटो विकारार्थत्वशङ्का ? सति च प्राचुर्येऽपि स्मरणे । प्रा-

यपाठबलेन स्यात् । न स्यात् । नियमस्य ततो बलीयस्त्वात्' इति भवदुक्तिः । आनन्दमयस्य जीवत्ववादिनं प्रति आनन्दमयस्याविकृतत्वोपन्यासः कथं जीवत्वपूर्वपक्षं निरस्येत्? मान्त्रवर्णिकब्रह्माधिकारोपन्यासस्तन्निरसनसमर्थो भवेत् । अतस्तदुपन्यसनं सूत्रकृता मान्त्रवर्णिकसूत्रेण । भामतीकारिकोक्तप्रकारेण विकारप्राचुर्ययोरुभयोर्मुख्यत्वे तुल्येऽपि ; विकारार्थप्रायपाठबलमभिमन्यते पूर्वपक्षी । पञ्चस्वपि पर्यायेषु विकारार्थत्वं सिद्धान्तयन्तो भवन्तो विकारार्थत्वप्रायपाठपूर्वपक्षस्यानुत्थितिं वर्णयितुं कथं शक्नुयुः ? यदि पूर्वपक्षस्यैवानुत्थितिः कथं तस्यैव सिद्धान्तनं शक्येत? 'विकारशब्दात्' इति प्रयुञ्जानः पूर्वपक्षी मयटो विकारश्रुतित्वौचित्यमुपन्यस्यत्युपक्रमेऽन्नमये विकारार्थत्वसंप्रतिपत्तिमवलम्ब्य । नायं पूर्वपक्षी मयटः प्राचुर्यार्थत्वं न जानाति ; जानात्येवायं तदर्थद्वयम् । प्रथमपर्यायश्रुतमयटो विकारार्थत्वसंप्रतिपत्तेः, प्राणमयादिषु तत्परित्यागानभिमतेः ; स्वाभिप्रेतप्रायपाठबलेन च विकारार्थत्वं निर्बध्नाति सः । सत्यप्युभयार्थकत्वे विकारार्थत्वे प्रयोगप्राचुर्यमपि तेनाभिमन्यत इति प्रदर्शितं श्रीभाष्यकारैः । इदं सर्वं प्रत्युच्यते 'प्राचुर्यात्' इति । अत्र प्राचुर्यार्थ एव विवक्षितो मयटः । प्राणमयादारभ्य मयट् प्राचुर्यवाची । प्रायपाठः प्राचुर्यानुकूलः । प्राचुर्य एव प्रचुरप्रयोगो मयटः । अस्मिन्प्रकरणे आनन्दस्य प्राचुर्यं विस्तरेणोपपाद्यते श्रुत्या । तच्चानन्दमयपदे मयटः प्राचुर्यार्थत्वनिश्चायकम् । 'प्राचुर्यात्' इति हेतुपदस्यावृत्त्या प्राचुर्यरूपार्थस्याप्यत्र प्रायपाठरूपप्राचुर्यमपि हेतूक्रियत इत्यर्थवर्णनमप्यस्माकमिष्टम् । पूर्वाधिकरणे गौणेक्षणप्रायपाठ उपन्यस्तः पूर्वपक्षिणा । आत्मशब्दबलेन तेजोऽबन्नानां ब्रह्मात्मकत्वात्तेजआदिकानां श्रुतमीक्षणं सच्छब्दवाच्यदेवतेक्षणमेवेति मुख्येक्षणप्रायपाठः प्रदर्शितः सिद्धान्तिना स्वपक्षानुकूलतया । सैव रीतिरत्राप्यभिप्रेयते सूत्रकृता ।

'अथानन्दमयस्यैवोत्तरत्रानन्दपदेन निर्देशो लक्षणया जीवस्य ;

यथा ज्योतिष्टोमस्य ज्योतिष्पदेनेत्येवं मन्वानस्य प्रायपाठबलात्प्रत्यवस्थानमिति चेन्न, यतो निर्णीतार्थस्यैकदेशेन निर्देश इति निर्णय इति दृष्टान्ते, इह तु संदिग्धस्य कथमर्थांशनिर्देश इति निश्चेतुं शक्यम्' इति भवदुक्तिर्वैपरीत्यैकान्ता । बहुभिर्हेतुभिरत्नानन्दमयस्य ब्रह्मत्वं निर्णयति सूत्रकारः । न तदर्थमानन्दानन्दमययोरैक्यं हेतुत्वेनोपन्यस्यति सूत्रकारः, श्रीभाष्यकारो वा । बहुभिर्हेतुभिरानन्दमयस्य शारीरजीवातिरेके, ब्रह्मत्वे च प्रसाधिते, श्रुतिव्याख्याने तयोः शब्दयोरैक्यं सूपपादं ज्योतिर्ज्योतिष्टोमयोरिव 'नामैकदेशे नामग्रहणम्' इति न्यायेन । तयोरैक्ये स्थानप्रमाणमप्यस्ति । तच्च समाख्यातो बलवत्तरम् । 'आनन्दो ब्रह्मेति व्यजानात्' इत्युक्त्वा तत्स्थाने 'एतमानन्दमयमात्मानमुपसङ्क्रम्य' इत्युच्यते भृगुवल्ल्याम् । आनन्दवान्, आनन्दघनः; आनन्दमयः, आनन्द इति समानार्थकाः । आनन्दशब्दे अर्श आद्यच् । अत्रैव प्रकरणे एतत्पूर्ववाक्ये विज्ञानविज्ञानमयावभेदेन पठितौ । इदं चोभाभ्यामावाभ्यां संप्रतिपन्नम् । पूर्ववाक्ये दृष्टा प्रयोगशैल्युत्तरभागेऽप्यनुरुध्यत इत्यवगतिः स्वारसिकी । 'अभ्यासात्' इति तात्पर्यलिङ्गोपन्यासः कृतो नाधिकृतत्वोपन्यासः । 'अभ्यासात्' इति सिद्धान्तिना निरतिशयानन्दे तात्पर्यलिङ्गे उपन्यस्ते, तद्बाधकत्वेन प्रचुरप्रयोगप्रायपाठसहकृतविकारार्थबोधकमयट्च्छ्रुतिबलमुपन्यस्यति पूर्वपक्षी द्वितीयसूत्रप्रथमखण्डेन । तं प्रति भवदुक्तनियमोपन्यासोऽकिञ्चित्करः । अधिकृतत्वहेतुश्चतुर्थसूत्रे खलूपन्यसिष्यते । आनन्दमयस्याधिकृतत्वमिष्टमेव पूर्वपक्षिणः । तस्याधिकृतत्वं न तस्य जीवत्वनिरासकम् । 'ननूभयथा स्मरणेऽपि प्रथमं प्रायपाठबलादाक्षेपः । तस्य ब्रह्मप्रतिपादकानन्दपदाभ्यासेन समाधिः । ततः प्रायपाठस्य का गतिरित्याक्षेपे प्राचुर्येऽपि ,स्मरणात्पर्यायान्तरगतावलम्बनापेक्षया प्रकृतपर्यायगतार्थानुसरणस्यैव युक्तत्वाच्चेति प्रतिक्षेपस्य काऽनुपपत्तिरिति चेन्न'

इति भवदनुवादः शाखायाःशाखान्तरधावनपटूव्या भवन्मत्या परिकल्पितः । प्रतिमतं याथार्थ्येनानूद्य खलु दूषणं प्रयोक्तव्यम् । ध्रुवं सुषुप्साद्भिर्वा, स्वप्नायमानैर्वा भवद्भिर्लिखितोऽयमानन्दमयाधिकरणवादः । सौषुप्तप्राज्ञ आनन्दमय इति भवदीयवर्णनम् । प्रतिपाद्यतन्मयता सम्पादितेव भवद्भिः । अथ वा जाग्रत्स्वप्नयोरुभयोरपि प्रातिभासिकत्वरूपसाम्यमनुभवदशापन्नमिव भवताम् । प्रायपाठहेतुना पूर्वपक्षो न समाहितः प्रथमसूत्रेण । नापि ब्रह्मप्रतिपादकानन्दपदाभ्यासेन । आनन्दरूपगुणस्य गुणनं वा ; अवाङ्मनसगोचरनिरतिशयानन्दप्रतिपादकश्लोकाभ्यासो वाऽभ्यासपदार्थोऽस्माकम् । द्वितीयसूत्रे पूर्वपक्षी अन्नमयादिषु विकारार्थत्वप्रायपाठबलमवलम्बते । 'पर्यायान्तरगतावलम्बनापेक्षया प्रकृतपर्यायगतार्थानुसरणस्यैव युक्तत्वाच्चेति प्रतिक्षेपस्य काऽनुपपत्तिः ?' इति कदापि नोक्तमस्माभिः । अस्मत्पक्षस्थापनाय भवन्तं वावदूकत्वेन न वृणीमहे । प्राणमयादारभ्य प्रतिपर्यायं मयटः प्राचुर्यार्थता वर्णिता श्रीभाष्ये द्वितीयसूत्रे । सम्यगभ्यस्ता भवद्भिर्भवन्मताभिमता मायाया विक्षेपशक्तिर्यया भवानित्थममूलमेवोपर्युपर्यसदनुक्तानर्थानस्मदुक्तत्वेन कल्पयति ॥

'एवं सति वाक्यशेषवशादर्थनिर्णय इति भवति । तत्राभ्यासः क्वोपयुज्यते ? उत्तरादित्येव हि वक्तव्यम्' इति भवदुक्तिर्न सुबोधा । निरूपणविधुरा च भवदुक्तिः शपथमात्रं भवति । प्रकरणस्थवाक्यदृष्टान्येव भूयो हेतुत्वेनोपन्यस्यन्ते सूत्रकृता । क्वचित् 'दहर उत्तरेभ्यः' इति वाक्यशेषगतहेतुभ्य इति विवक्षंस्तथा सूत्रं निबध्नाति । क्वचित् 'तल्लिङ्गात्' 'तद्धर्मोपदेशात्' 'अम्बरान्तधृतेः' 'उपपत्तेः' इति हेतुविन्यासं करोति । 'दहर उत्तरेभ्यः' इति दहराधिकरणे आकाशपदघटितदहराकाशवाक्यादनन्तरं कृत्स्नमचेतनभूताकाशपरत्वविरोधि । भूताकाशेनोपमेयत्ववर्णनम्; ब्रह्मलिङ्गानि च तत्र भूयो दृश्यन्ते । 'उत्तरेभ्यः' इति सामान्यत उक्त्वाऽ-

नन्तरसूत्रैरुत्तरवाक्यगतानि लिङ्गानि विशिष्य निबध्नाति । अत्र वाक्यशेषस्य जीवाविरोधित्वम्, तस्य च स्तुतिमात्रत्वं; जीवव्यावर्तकधर्मभूतनिरतिशयानन्दे तात्पर्याभावं चाभिमन्यते पूर्वपक्षी । तस्य मुक्तविषयत्वम्, हिरण्यगर्भविषयत्वं वा वर्णयितुं शक्यमिति तदभिमानः । वाक्यशेषदृष्टा-...सस्य हेतूकरणेन खलु निरतिशयानन्दधर्मे तात्पर्यमुपपादनीयम् ॥

किं चात्र श्रुतप्रकाशिकाविरचितमतिसुन्दरं क्रमप्रदर्शनं भवता नावलोकितम् । आनन्दमयशब्दे त्व आनन्दरूपप्रकृतिः, मयड्रूपप्रत्ययश्च; यः प्राचुर्येऽप्यनुशिष्टः । प्रथमसूत्रे पक्षपदप्रकृतिभूतानन्दवाच्यस्याभ्यासो हेतुत्वेनोपन्यस्तः । तृतीयसूत्रमपि आनन्दहेतुत्वेनानन्दमयस्य जीवातिरेकसाधकम् । 'अथानन्दवल्लीमादिमध्यान्ततो निष्कृष्टुकामः प्रथममुपक्रमस्थहेतुमवतारयति 'मान्त्रवर्णिकमेव च गीयते' इति'' इति चतुर्थसूत्रावतारिका श्रुतप्रकाशिकायाम् । पञ्चमसूत्रमुपक्रमस्थविपश्चित्त्वाद्यनुसन्धातृ । एवं चतुर्थपञ्चमसूत्राभ्यामुपक्रमस्थहेतुरनुसंहितः । अथ मध्यगतं स्फुटतरं हेतुमनुसन्धत्तेऽनन्तरेण षष्ठसूत्रेणेत्यादिक्रमस्तत्र प्रादर्शि । 'नैष स्थाणोरपराधो यदेनमन्धो न पश्यति' इति भगवद्यास्कपठितो न्यायोऽत्र स्मर्तव्यो भवति ॥

'किञ्च चतुर्वारं हृदयारूढे विकारार्थे मयटि सकलशाखाध्ययननिखिलकर्मानुष्ठानावस्थोपस्थितिनिरन्तरप्रियमोदादि फलावस्थोपस्थितिसहकृते च कथं नामार्धनिर्देशतयाऽपि नेतुं युक्तेनोत्तरेणानन्दपदेनाधिकृतमयडन्तपदनिर्णयश्च' इति भवदुक्तिर्दुर्बोधा । मयटश्चतुर्वारं हृदयारूढत्वं नैवाभ्युपगतमस्माभिः । उत्तरेणानन्दपदेन मयडन्तपदार्थनिर्णयं नैव वयं कुर्मः । 'पञ्चापि विकाराः' इति भवतां शपथनम् । स्वारस्यापहृता भवद्भाष्यकारास्तु तैत्तिरीयभाष्ये 'प्राणमयः; प्राणो वायुस्तत्प्रायः' इति मयटः प्राचुर्यार्थत्वमभाषिषत । तच्च भवदाडम्बरं कृत्स्नमुन्मूलयति । 'यत्रैतत्सुप्तोऽ

भूय एष विज्ञानमयः पुरुषः' इति बृहदारण्यकश्रुतिव्याख्याने 'विज्ञानं विज्ञायतेऽनेनेत्यन्तःकरणं बुद्धिरुच्यते । तन्मयस्तत्प्रायो विज्ञानमयः । किं पुनस्तत्प्रायत्वम् ? कथं पुनर्मयटोऽनेकार्थत्वे प्रायार्थतैवावगम्यते ।' इति भाषणमत्र स्मर्तव्यम् । तत्र विज्ञानमयगतमयटोऽपि प्राचुर्यार्थत्वमुक्तम् । 'याज्ञवल्क्यस्य द्वे भार्ये' इति महर्षेर्भार्याद्वित्वोपन्यासो वा, रामरावण... थोपन्यासो वा नात्र सङ्गतः ॥

'ब्रह्मपुच्छं प्रतिष्ठा' इति पुच्छविषये प्रतिष्ठारूपाधिकविशेषदानेन ब्रह्मणि तात्पर्यमस्तीति कथनं कथमस्मन्मतेन विरुध्येत ? पुच्छस्य ब्रह्मत्वं वयमपि वदामः । 'प्राचुर्यात्' इति हेतुखण्डस्य 'आधिक्यात्, 'यतोऽत्र प्रतिष्ठेत्यधिकं दृश्यत इत्यर्थः' इति भवद्व्याख्यानं क्लिष्टम् । भवद्भिरेवेदंप्रथमतयेदं प्रदर्श्यते । आनन्दगिरिटीका, न्यायरक्षामणिश्च तदन्यथा व्याख्याति । ब्रह्मणि तात्पर्यवर्णनं कस्य वाऽनिष्टम् ? भवता नूतनतया क्लिष्टक्लिष्टं कल्पितमप्रामाणिकमर्थं सिद्धवत्कृत्य भवानस्मान् दूषयति ॥

तृतीयसूत्रमानन्दमयस्य ब्रह्मत्वसाधने स्वतन्त्रहेतुरस्मन्मते । आनन्दहेतुत्वमानन्दमयस्य न्याय्यम् । आनन्दमय एवान्यानन्दहेतुर्भवेत् । चशब्देन पक्षपदस्थहेतुपरत्वं सूत्रत्रिकस्य समुच्चयेन बोध्यते । चतुर्थपञ्चमसूत्रे एकं द्विकमिति द्योतयितुं पञ्चमसूत्रे चशब्दः । तथैवानन्तरसूत्रत्रयमेकं त्रिकम् । अन्त्यसूत्रे चशब्दः ।

"'मान्त्रवर्णिकमेव च गीयते' इति सूत्रम्; इदं तु गीयत इति स्तूयत इत्यर्थवादप्रदर्शनपरम्" इति भवदुक्तिरसमीचीना । गीयत इति द्विरेव प्रयुज्यते सूत्रकारेण; अत्र 'योनिश्च हि गीयते' इति सूत्रे च । तत्र सूत्रपरामृष्टमुण्डकश्रुतेर्नार्थवादत्वमिति भवत्संप्रतिपन्नम् । संप्रतिपन्नसूत्रकारशैली भवद्व्याख्यानविरुद्धा । भवत्पूर्वेषां व्याख्यानमपि भवद्व्याख्याविरुद्धम् । 'अग्निः ब्रवीति—' इति श्लोको मन्त्रः; नार्थवादः । विधि-

मन्त्रार्थवादरूपविभागोऽपि विस्मृतो भवद्भिरस्मद्दूषणसंरम्भेण। गीयत इत्यस्य स्तूयत इत्यर्थो नाभिधावृत्त्या लभ्यते । "'तदेव ब्रह्म,' 'ब्रह्म पुच्छं प्रतिष्ठा' इति ब्रह्मपदेन गीयते" इति न्यायरक्षामणिः, 'तद्ब्रह्म पुच्छं प्रतिष्ठेति ब्राह्मणवाक्येन प्राधान्येन गीयते' इति ब्रह्मामृतवर्षिणी, 'इतश्च ...न्दमयः परमात्मा । यतः सत्यमित्यादिमन्त्रवर्णेन यद्ब्रह्मोक्तम्.... पुच्छवाक्येन तत्त्वमसीतिवद्गीयते' इत्यानन्दगिरिटीका च भवदुक्तिं गलहस्तयन्ति ॥

'यदि प्रचुरस्तदा विज्ञानमयोऽपि कुतो न ब्रह्म स्यात् । वर्ततेऽपि हि तत्रापि प्रकृतिमात्रस्याभ्यासः' इति वृथा भवदनुयोगः । आनन्दमयपदप्रकृतिमात्रभूतानन्दपदाभ्यासादस्मन्निर्णय इति भवद्भ्रान्त्या प्रयुक्तोऽयं पर्यनुयोगो भवद्भ्रान्ततानिरूपणेनैव विलीनो भवति । विज्ञानमयादानन्दमयस्यान्यत्वम्, अन्तरत्वं च वदन्ती श्रुतिः, तद्बलेन 'भेदव्यपदेशाच्च' इति सूत्रयन्सूत्रकृच्च भवच्चोद्यमुत्सारयतः ॥

किं बहुना । सूत्राणां भवदभिमतिपरिपन्थित्वं स्पष्टमभ्युपगतमार्जवशीलाभ्यां भामतीकल्पतरुकृद्भ्याम् । भवद्भाष्यकारैश्च स्वाभिप्रेतार्थस्य सूत्राक्षरानानुगुण्यमभ्युपगतम् । वृत्तिकारवर्णितसांप्रदायिकार्थविरुद्धा भवव्द्याख्येति संप्रतिपन्नम् । सूत्राक्षरस्वारस्यापह्नवभीरुतया भवद्भिरपि प्रथमसूत्रलिकस्य आनन्दमयस्य ब्रह्मत्वसाधनपरत्वं स्पष्टमभ्युपगम्येत । तेषां सूत्राणां पूर्वपक्षवर्णनपरत्वं भवदीयसर्वग्रन्थविरुद्धम् ; सूत्रशैलीविरुद्धं च । चतुर्थसूत्रस्थचकारस्य त्वर्थत्ववर्णनमन्याय्यम् । प्रियशिरस्त्वादिसूत्रविरुद्धा भवव्द्याख्येति नापह्नोतुं शक्यम् । अस्ति श्रुतिगीता श्रीभागवते सूत्रकारप्रणीते यत्र 'पुरुषविधोऽन्वयोक्तचरमोऽन्नमयादिषु यः सदसतः परं त्वमथ यदेष्ववशेषमृतम्' इति श्रुतिभिरेव पुरुषविधस्यानन्दमयस्य परमात्मत्वं गीयते। अन्नमयादिष्विति मयडन्तानां पञ्चानां ग्रहणं न्याय्यम् । तेषु चरम

आनन्दमय एव । तस्य पुरुषविधत्वस्यापि गानात् ; तस्यानन्दमयविषयत्वं निश्चितम् ॥

अन्तरधिकरणम् ।

अस्मिन्नधिकरणे सूत्रार्थवर्णने न कोऽपि भेदो मतद्वयेऽपि । सङ्गतिकथनमात्रेऽस्ति भेदः । पूर्वाधिकरणविषयवाक्ये 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः' इति निगमने पुरुषान्तर्वर्तिनः आदित्यान्तर्वर्तिनश्चैक्यमुक्तम् । पुरुषश्च विज्ञानमयः । तस्मादन्यस्तदन्तर आत्मा आनन्दमयः । स एवादित्यान्तर्वर्तते । पूर्वसूत्रे शारीरत्वश्रवणाज्जीवत्वशङ्कोद्भाविता आनन्दमयस्य । सा परिहृता पूर्वम् । न तत्रोपकरणोपकरणिभावः शरीरब्रह्मणोः । अत्र शरीरमेव वर्ण्यते आदित्यान्तर्वर्तिपुरुषस्य । तस्य सशरीरत्वे जीवत्वम् । यद्ययं जीवः, एतस्मादभिन्न आनन्दमयोऽपि जीवः स्यादिति पूर्वाधिकरणाक्षेपेणास्याधिकरणस्योत्थितिः । आनन्दमयविषयवाक्ये उक्तमुभयोरैक्यमत्र समर्थ्यते । एवं बहुधाऽस्याधिकरणस्य पूर्वाधिकरणशेषत्वम् । कारणवाक्यानां समन्वयः प्रायेण प्रस्तुतः । नेदं कारणवाक्यम् । अधिकरणद्वये विषययोर्निर्गुणसगुणभेदेन भिन्नत्वाभिमत्या सदपि वास्तवं शेषत्वं भवद्भिरपह्नोतव्यं भवति । वयं तु सगुणनिर्गुणभेदं नाभ्युपगच्छामः । अतो वस्तुसच्छेषत्वमस्माभिर्नापह्नूयते । अधिकरणभेदोऽभ्युपगम्यत एवास्माभिः । आर्थिकमुत्तराधिकरणस्य पूर्वाधिकरणशेषत्वम् । 'कारणवादिवाक्यानां परमात्मपरत्वं हि निरूप्येत । कारणवाक्यत्वाभावेऽपि कथमन्तरादित्यविद्याऽत्र निरूप्यत इति चेत्—उच्यते । आनन्दमयाधिकरणशेषतया' इति श्रुतप्रकाशिका । जन्मादिलक्षणकथने 'ब्रह्म कारणमेव ; ब्रह्मैव कारणम्' इति द्वेधाऽर्थोऽभिप्रेतः । कारणत्वायोगव्यवच्छेदोऽत्र क्रियत इति भवदीयानां संमतम् । गतिसामान्यसूत्रोक्तमुपपाद्यतेऽध्यायशेषेणेति च भवत्संमतम् । अकारणवाक्यस्यास्यात्र विचारः पूर्वाधिकरणशेषतयेत्युक्तिः समीचीनैव ॥

सगुणब्रह्मपरत्वेनाभ्युपगतेऽस्मिन्नधिकरणे आदित्यादिजीवभेदः परमात्मनः स्पष्टं सूच्यते— 'भेदव्यपदेशाच्चान्यः' इति। 'य आदित्ये तिष्ठन्नादित्यमन्तरो यमयति यमादित्यो न वेद' इत्यन्तर्यामिश्रुतिः परामृश्यतेऽनेन सूत्रेणेति भाष्यद्वयसंमतम् । तत्रैव श्रुतौ जीवात्मभेदोऽपि व्यपदिश्यते । 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते' इत्यन्तर्याम्यधिकरणसूत्रमपि जीवब्रह्मभेदमभेद्यतया दृढीकरोति । जिज्ञासाधिकरणेन प्रत्यग्ब्रह्मैक्यस्य शास्त्रप्रतिपाद्यतया प्रतिज्ञाने जीवब्रह्मभेदमेवंरूपर्येण कथं सिद्धान्तसूत्रैः सूत्रकृन्निरस्येत् । निर्गुणपरत्वेनाभिमते पूर्वाधिकरणेऽपि 'भेदव्यपदेशाच्च' इति सूच्यते । वर्णकद्वयेऽपि जीवब्रह्मभेददृढीकरणमेव वर्णितं भवद्ग्रन्थेषु ॥

'अन्यः' इत्यत्रोक्तमुत्तरत्रापि साध्यतयाऽनुवर्तते । 'आकाशोऽन्यः' 'प्राणोऽन्यः' ज्योतिरन्यत्' इत्यनुवृत्तिरिष्यते । कारणस्य आकाशाद्यतिरिक्तत्वसाधनमुखेन ब्रह्मणि प्रसिद्धिः क्रमेण संपाद्यते ॥

आकाशाधिकरणम् ।

आकाशाधिकरणे भवदुक्तयः प्रायेणाकाशमुष्टिहननायन्ते । अस्मिन्नधिकरणे भाष्यत्रयमपि प्रायेणैककण्ठम् । व्युत्पाद्यमानश्च न्यायः सर्वत्रैकरूपः । सावकाशश्रुतेरनन्यथासिद्धलिङ्गेन, तादृशलिङ्गैर्वा बाध इति न्यायस्य विषयता प्रदर्श्यतेऽत्राकाशवाक्यस्य । अन्तवत्त्वदोषेण शालावत्यस्य पक्षं निन्दित्वाऽनन्तं कञ्चिद्विवक्षुः स्वोपदेशमुपक्रमते प्रवाहणः । उपसंहरति च 'स एष परोऽवरीयानुद्गीथः स एषोऽनन्तः' इति ॥

उपक्रमोपसंहारयोरनन्तवस्तुविषयत्वम् । सर्वलोकगतिविषयः प्रश्नः । 'अस्य लोकस्य का गतिः' ? इति प्रश्नेऽस्येतीदमा असङ्कोचात्सर्वप्रपञ्चग्रहणम् । गतिश्च प्राप्यं कारणं वा । "तस्मात्सर्वेषां लोकानामिति प्रश्नोपक्रमात्, उत्तरे च तत्तदसाधारणगुणपरामर्शात् पृष्टायाश्च गतेः परायणमित्य-

साधारणब्रह्मगुणोपसंहारात् भूयसीनां श्रुतीनामनुग्रहाय 'त्यजेदेकं कुलस्यार्थे' इतिवद्वरमाकाशपदमात्रमसमञ्जसमस्तु" इति भामत्यां ब्रह्मासाधारणैर्बहुलिङ्गैराकाशश्रुतिभञ्जनकथनम् । इदं च समानं मतत्रयेऽपि । लिङ्गाद्ब्रह्मनिर्णयस्य पूर्वाधिकरणेऽपि कृतत्वात्पुनरुक्तिमाशङ्क्योक्तं कल्पतरौ 'श्रुतिप्राप्तनभसो लिङ्गेन बाधार्थो न्यायोऽधिकोऽत्र' इति । तार्तीयश्रुतिलिङ्गबलाबलविषयन्यायैरत्र श्रुत्यर्थो निर्णीयते । लिङ्गानामन्यथासिद्धत्वानन्यथासिद्धत्वविषयेऽपि विचारः । 'कृष्णलं श्रपयेत्' इत्यादयोऽत्र वैदिकदृष्टान्ताः । श्रपणस्य विक्लेदनफलकव्यापारे रूढत्वेऽपि वस्तुसामर्थ्यविशेषरूपलिङ्गादत्तोष्णीकरणे लक्षणा समाश्रीयते । 'अग्निरधीतेऽनुवाकम्' गङ्गायां घोषः' इत्यादयो लौकिकदृष्टान्ताः ॥

'वाक्योपक्रमगतोऽप्यग्निशब्दो माणवकविषयो दृश्यते' इति भवद्भाष्ये । 'वाक्यशेषगतानन्यथासिद्धब्रह्मलिङ्गादाकाशपदं गौणमिति भाष्यार्थः' इति कल्पतरुः । आकाशशब्दस्य भूताकाशे प्रसिद्धिः सर्वसंमता । प्रसिद्धिर्नामात्र रूढिः । 'भूतविशेषे तावत् सुप्रसिद्धो लोकवेदयोराकाशशब्दः' इति पूर्वपक्षोपन्यासभाष्यम् । सिद्धान्तभाष्ये च 'यत्पुनरुक्तं भूताकाशः प्रसिद्धिबलेन प्रथमतरं प्रतीयत इति—अत्र ब्रूमः । प्रथमतरं प्रतीतमपि सद्वाक्यशेषगतान्ब्रह्मगुणान्दृष्ट्वा न परिगृह्यते' इति भाषितम् । नायमाकाशशब्दो नानार्थकः । 'न च ब्रह्मण्यप्याकाशशब्दो मुख्यः ; अनेकार्थत्वस्यान्याय्यत्वात् । भक्त्या च ब्रह्मणि प्रयोगदर्शनोपपत्तेः ; लोके चास्य नभसि निरूढतरत्वात् , तत्पूर्वकत्वाच्च वैदिकार्थप्रतीतेर्वैपरीत्यानुपपत्तेः' इति पूर्वपक्षभामती । सिद्धान्ते च—'न चाकाशशब्दो गौणोऽपि विलम्बितप्रतिपत्तिः' इति ब्रह्मण्याकाशपदस्यामुख्यत्वमभ्युपगतमेव । "आकाशेपदं ब्रह्मणि गौणम्' इति भाष्यार्थः" इति कल्पतरुकृतां स्पष्टवचनम् । 'आकाशश्रुतिब्रह्मलिङ्गाभ्यां संशये पूर्वः पक्षः' इति न्यायरक्षामणौ संशयबीजप्रद-

र्शनम् । 'अनन्यथासिद्धलिङ्गविरोधेऽन्यथासिद्धायाः श्रुतेरेव बाधः' 'ननु श्रुत्यन्यथाकरणभारं कथमेकमेवानन्तत्वलिङ्गं वहति । अनन्यथासिद्धिमहिम्ना वक्ष्यतीति ब्रूमः । आकाशपदं हि श्रुतित्वेऽपि , प्रथमपाठितत्वेऽपि अभ्यस्तत्वेऽपि लक्षणया ब्रह्मपरत्वं सहते ।' इति तत्राकाशपदस्य ब्रह्मणि लाक्षणिकत्वसिद्धान्तनमेव दृश्यते । 'भूताकाशे प्रसिद्ध्यतिशयपरायणत्वाद्यनुपपत्तिभ्यां संशयः' इति श्रीसुदर्शनसूरिभिस्संशयबीजप्रदर्शनमत्यन्तसरूपं भामतीकल्पतरुन्यायरक्षामणिप्रदर्शनस्येति स्पष्टम् । 'एवं योग्यार्थश्रुतिमूललिङ्गापेक्षया आकाशश्रुतिः श्रुत्याभासः' इति योगाद्रूढेः प्राबल्यात्प्रसिद्धार्थपरत्वे सति श्रुतिविरोधाद्दुर्बलं लिङ्गादि तदनुरोधेन नेयमिति पूर्वपक्षयुक्तिः । योग्यार्थश्रुतिमूललिङ्गादयोग्यार्थस्य पदस्य श्रुत्याभासत्वाद्योग्यार्थः स्वीकार्य इति राद्धान्तयुक्तिः ।' इति च सौदर्शनमधिकरणव्युत्पाद्यन्यायप्रदर्शनम् । द्वैतिनोऽप्यत्रैवमेव प्रदर्शयन्ति । आकाशश्रुतेरनन्यथासिद्धब्रह्मलिङ्गेन भञ्जनं वर्णितं तैरपि । ब्रह्मण्याकाशशब्दस्य लाक्षणिकत्वकथनमात्रं ते न सहन्ते, ब्रह्मणि सर्वशब्दानां परममुख्यवृत्तेस्तन्मतत्वात् । मतत्रयस्याप्यस्मिन्नधिकरणेऽद्वैतमेव । अत्रापि भवन्तो बलवद्विजृम्भन्तेऽकाण्ड एव । आकाशं प्रत्येव भवदायोधनसंरम्भः । आकाशाधिकरणमत्र भवद्विजृम्भणम् । आकाशवन्निर्मलं श्रीभाष्यम् ॥

भवतां न केवलमत्र मतत्रयस्याद्वैताप्रतिपत्तिः; भवन्मतविषय एव भवतां विपरीतप्रतिपत्तिरपि भूयसी दृश्यते । प्रथमः पादोऽयोगव्यवच्छेदपरः । शिष्टा त्रिपादी अन्ययोगव्यवच्छेदपरेति वयम् । प्रथमा त्रिपादी अयोगव्यवच्छेदपरा; तुरीयः पादोऽन्ययोगव्यवच्छेदपर इति भवन्मतम् । प्रथमः पादोऽयोगव्यवच्छेदपर इति मतद्वयेऽपि समानम् । आनुमानिकाधिकरणभामतीकल्पतरुपरिमला अत्र प्रमाणम् ।

"पूर्वत्र हि प्रधानाद्येव सर्ववेदान्तार्थ इति प्रत्यवस्थिते तन्निषेधेन सर्व-

वेदान्तेषु ब्रह्मावगतिः साधिता । इह तु तामुपेत्य प्रधानाद्यपि कारणत्वेन समन्वयविषयः । न चानेककारणवैयर्थ्यम् , कल्पभेदेन व्यवस्थोपपत्तेः इति प्रत्यवस्थीयते । सूत्रकारोऽप्यपिशब्दम् , एकशब्दं च प्रयुञ्जानो ब्रह्माङ्गीकारेण पूर्वः पक्षः, कांचित्कथ्यायं विचार इति सूचयांबभूव ।'

इत्यानुमानिकाधिकरणारम्भे कल्पतरुः । पूर्वत्रेति वृत्तत्रिपादीपरामर्शः ।

जन्मादिलक्षणं न प्रधानादौ गतम्; येन व्यभिचारदलक्षणं स्यात् ; किन्तु ब्रह्मण्येवेति 'ईक्षतेर्नाशब्दम्' इति प्रतिपादितम् । गतिसामान्यं च वेदान्तवाक्यानां ब्रह्मकारणवादं प्रति विद्यते ; न प्रधानकारणवादं प्रतीती प्रपञ्चितमधस्तनेन सूत्रसन्दर्भेण"

इति तत्र भामत्युपक्रमः । व्यभिचारशब्दस्यात्र दोषमात्रपरत्वमिति प्रदर्शितं परिमले । 'पूर्वत्र हीति । एवं च टीकायां व्यभिचारशब्दो दोषमात्रपर इतीक्षत्यधिकरणार्थानुवादकवाक्यश्रुतस्य तस्यासंभवे पर्यवसानम् ; प्रवर्तयिष्यमाणार्थानुवादकवाक्यश्रुतस्यातिव्याप्तेरित्याशयः' इति तत्र परिमलः।

एवं प्रथमपादो जन्मादिलक्षणासंभवं व्यवच्छिनत्ति ; ब्रह्मणः कारणत्वायोगव्यवच्छेदपरत्वं तत्पादस्येति भवन्मतमिति स्पष्टम् । आनुमानिकाधिकरणोपक्रमन्यायरक्षामणिश्चात्रानुकूलः । स्वमतमिदमित्यबुद्ध्वा

'कथमयोगान्ययोगव्यवच्छेदाभ्यां फलभेदः' 'तत्रैवं सति किमत्र परावर्त्यते ब्रह्मवादो नास्ति कारणं ब्रह्मेति ; उताहो भूतमप्यवान्तरकारणमिहोपदिश्यते इति पूर्वः पक्षः....। ननु परावर्तनमेव, यत आह श्रीमाल्लक्ष्मणाचार्यः ; अत आकाशादनतिरिक्तं ब्रह्म....' 'किं चैवं परावर्तने सर्वत्राप्येवं कर्तुं शक्येत। परिहारोऽप्येवमेव युज्यत इति कथमयोगान्ययोगव्यवच्छेदाभ्यां फलभेदः ? न चोदाहरणधोरणीभेदेन पादभेदफलभेदाविति वाच्यम्' 'ततो विहाय मतिकर्दमं स्पष्टब्रह्मलिङ्गक एवायं पाद

इत्येवाभ्युपेत्यं तेन'

इत्यादीन्यत्यन्तमबोधकानि वाक्यान्युच्चावचं भवद्भिरसंबद्धं निबद्धानि । भवदुक्तीनामनवबोधकत्वं भवदीयानां प्रसिद्धम् । भवतामपि प्रसिद्धम् । कः परपक्षः? कश्च भवदभिमतः पक्ष इति बोद्धुं नैव शक्यते भवद्ग्रन्थात् । ...प्यद्वैतमिष्यत इव ॥

स्पष्टब्रह्मलिङ्गवाक्यसमन्वयोऽस्मिन्पादे क्रियत इति संमतमेवास्माकमिति पूर्वमेव प्रदर्शितम् । "अस्पष्टतरमस्पष्टं स्पष्टं छायानुसारि च' इत्युक्तोत्थानद्वारभेदान्क्रमेणोत्थितान्मृदूपक्रमान्, क्रूरनिष्ठानस्मिन्नध्याये निरुन्धन् सन् शिष्टैरधिकरणैर्भगवद्गुणानपि विशेषतः प्रकाशयतीति शब्दार्थः । अयमत्र भावः—यथा युद्धेषु पदात्यश्वगजरथानां पूर्वपूर्वदुर्बलानां दुर्बलभङ्गे प्रबलयोधनम् ; एवमस्पष्टतरजीवादिलिङ्गादीनां पूर्वपूर्वभङ्गे पुनरुत्तरोत्तरपरिग्रहेण पूर्वपक्षः प्रवर्तते" इत्युक्तमधिकरणचिन्तामणौ

'इत्थं विद्यात्रयेण स्थिरचरचिदचिद्देहिनः सर्वहेतो-
रव्यक्ताज्जीववर्गादपि समधिकता यद्यपि स्यात्तथापि ।
उत्थानद्वारभेदात्क्रमत इह मृदूपक्रमान्क्रूरनिष्ठा-
नध्यायेऽस्मिन्निरुन्धन्नधिकरणगणैस्तद्गुणानुद्गृणाति ॥'

इत्यधिकरणसारावलिश्लोकस्य व्याख्याने । अस्पष्टतरजीवादिलिङ्गत्वं च स्पष्टब्रह्मलिङ्गत्वपर्याय एव । एवं चास्य पादस्य स्पष्टब्रह्मलिङ्गवाक्यविषयत्वम्, अयोगव्यवच्छेदेन लक्षणासंभवनिराकरणपरत्वं च भाष्यद्वयेऽपि समानम् ॥

अस्मिन् पादे नामात्मकानां शब्दानां समन्वयः प्रायेणेति द्वैतिनः । आनन्दमयाधिकरणेऽन्नमयादिनाम्नां ; आकाशाद्यधिकरणेष्वाकाशादिनाम्नां च ब्रह्मणि समन्वयस्तन्मते । नामेति च रूढः शब्दः । अनन्यथासिद्धब्रह्मलिङ्गैः रूढिर्भज्यते । "इदानीमाकाशादिविशेषशब्दैर्निर्दिश्य जगत्कारणत्वजगदैश्वर्यादिवादेऽप्याकाशादिशब्दाभिधेयतया प्रसिद्धचिदचिद्वस्तुनोऽ

र्थान्तरमुक्तलक्षणमेव ब्रह्मेति प्रतिपाद्यते'आकाशस्तल्लिङ्गात्' इति पादशेषेण" इति श्रीभाष्ये । भवन्मतेऽपीदं समानम् ॥

'सर्वेष्वप्यधिकरणेषु तत्तदधिकरणप्रतिनियता भगवद्गुणा विशेषतः प्रकाश्यन्ते । तेषां गुणानां कार्त्स्न्येनानुसन्धानमध्यात्मशास्त्रप्रयोजनमित्यास्माकीनो मार्गः । निर्विशेषवादिनां त्वेकेनैवाधिकरणेन निर्विशेष प्रतिपन्नमिति प्रतिपाद्यगुणविशेषाभावादुत्तरेषामधिकरणानां नैष्फल्यमेवेति हृदयम्' इत्यत्र चिन्तामणिः ॥

अत्राकाशश्रुतिलिङ्गाभ्यां संशय इति भवदीयसर्वग्रन्थेभ्यः स्पष्टम् । सुस्पष्टमिदं सूत्राक्षरेभ्यः । आकाश इति पक्षनिर्देश आकाशरूपश्रुतिबलमुद्घाटयति । तेन च पूर्वपक्षयुक्तिद्योतनम् । एकपदसामर्थ्यं श्रुतिः । निरपेक्षकण्ठरवः श्रुतिः । सद्ब्रह्मादिशब्दा न निरपेक्षाः । आकाशशब्दो निरपेक्षो विशेषशब्दः । नामात्मकः शब्दः सः । 'तल्लिङ्गात्' इति ब्रह्ममात्रसंभावितलिङ्गानां प्रकरणगतानां हेतूकरणम् । सा च सिद्धान्तयुक्तिः । एवं श्रुत्या पूर्वपक्षः । निरवकाशानन्यथासिद्धब्रह्मलिङ्गेन सिद्धान्त इति स्पष्टं सूत्राक्षरेभ्यः । तच्छब्दस्य ब्रह्मपरामार्शित्वं सुस्पष्टम् , सर्वसंप्रतिपन्नं च । अन्य इति पूर्वसूत्रादनुवर्तत इति वयम् । अनुवृत्त्यर्थमेव तस्य तत्सूत्रे ग्रहणम् । इतरथा तस्य वैयर्थ्यमेव स्यात् । आकाशोऽन्यो ब्रह्म; तल्लिङ्गात् । लिङ्गबहुत्वं हेतुतयोपन्यस्यत स्पष्टं भामत्याम् ; कल्पतरौ च । आनन्त्यलिङ्गेनैकेन निर्वाहः शक्य इति सौत्रहेतुगतैकवचनस्यैकमात्रवाचकत्वमिति न्यायरक्षामणिः । सर्वथा लिङ्गेन सावकाशश्रुतिबाधनं भवदीयसर्वसंप्रतिपन्नम् ॥

'कुतः संशयः? उभयत्र प्रयोगदर्शनात्' इति भवद्भाष्योक्तेरौचित्यमाक्षिप्तं भवदुदाहृतश्रुतप्रकाशिकावाक्येषु । 'भूताकाशमात्रे रूढ आकाशशब्दः, नास्य नानार्थकत्वम्' इति स्पष्टं पूर्वोदाहृतभवदीयग्रन्थोक्तिभ्यः । श्रुति-

लिङ्गयोरत्र कलहः ; न श्रुतिद्वयस्येति संप्रतिपन्नम् । भवद्भाष्यस्यापि तथैवाशय इति स्पष्टं कृत्स्नभाष्यवाक्यालोडनेन । तथैव व्याख्यातं भवदीयैः सर्वैः । अस्मदुक्तरीत्यैव संशयबीजप्रदर्शनं कृतं भाष्यव्याख्याग्रन्थेषु । अयोगव्यवच्छेदपरेऽस्मिन् पादे ब्रह्म न प्रसिद्धं पूर्वपक्षिणः । तस्य आकाशशब्दस्य ब्रह्मणि प्रसिद्धिस्ततो दुर्बला

'यत्पुनरुक्तं भूताकाशं प्रसिद्धिबलेन प्रतीयत इति , अत्र ब्रूमः--प्रथमतरं प्रतीतमपि सद्वाक्यशेषगतान्ब्रह्मगुणान्दृष्ट्वा न परिगृह्यते' इति भाषमाणा भवद्भाष्यकारा अनन्यथासिद्धब्रह्मलिङ्गैरेव आकाशश्रुतिबाधमत्र मन्वते । आकाशशब्दस्य ब्रह्मण्यपि प्रसिद्धिः साधनीया ; न तु सिद्धा । प्रदर्श्यते चोत्तरत्र दहराधिकरणे सूत्रकृता 'प्रसिद्धेश्च' इति बहुविचारानन्तरम् "इतश्च परमेश्वर एव 'दहरोऽस्मिन्नन्तराकाशः' इत्युच्यते । यत्कारणमाकाशशब्दः परमेश्वरे प्रसिद्धः । 'आकाशो वै नाम नामरूपयोर्निर्वहिता, 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' इत्यादिप्रयोगदर्शनात् ।" इति तत्सूत्रभाष्यम् । अत्राकाशशब्दस्य ब्रह्मणि प्रयोगं प्रसाध्यानन्तरं तत्र ब्रह्मण्यपि प्रसिद्धिर्व्युत्पाद्यते सूत्रकृता ; भाष्यकृता च । तत्र पञ्चपाद्यामुक्ता रूढिशक्तिर्निराकृता भामत्याम् । वैदिकप्रसिद्धिः क्रमेण व्युत्पाद्यते ॥

यदुच्यते भवद्भिः--आकाशादिशब्दानां ब्रह्मण्यपि प्रसिद्धिः साध्यते सूत्रकृतेति , तत् कस्य वाऽनभिमतम् ; सर्वत्र ब्रह्मणः प्रसिद्धिसंपादनमेवाध्यात्मशास्त्रकृत्यम् । ब्रह्मणस्तद्गुणानां च सुप्रसिद्धिरेव क्रियते सर्वत्रात्र शास्त्रे ।

'एवं वाक्यशेषावधारितानन्यसाधारणानेकापूर्वार्थविशिष्टं निखिलजगदेककारणं सदेवेत्यादिवाक्यसिद्धं ब्रह्मैवाकाशशब्देन प्रसिद्धवत्सर्वाणि ह वा इमानि भूतानीत्यादिवाक्येन निर्दिश्यत इति सिद्धम् ।'

इति श्रीभाष्यनिगमनमाकाशाधिकरणे ॥

'सर्वत्र प्रसिद्धोपदेशात्' इति सूत्रे ब्रह्मशब्दस्य ब्रह्मणि सर्ववेदान्त-

प्रसिद्धिः खलूपन्यस्यते भवद्भाष्यरीत्या । 'यत्सर्वेषु वेदान्तेषु प्रसिद्धं ब्रह्मशब्दस्याऽभ्यनं जगत्कारणम्' इति तत्सूत्रभाष्यम् । आकाशादिशब्दानां ब्रह्मणि प्रसिद्धिर्न तत्रोपन्यस्ता ; यथा भवन्तो मन्यन्ते । 'प्रसिद्धेश्च' इति दहराधिकरणसूत्रे आकाशशब्दविषये प्रसिद्धिः प्रदर्श्यते सूत्रकृता, भाष्यकृता च । श्रुतप्रकाशिकायाम् श्रुतवेदान्ताश्रुतवेदान्तशब्दयोः श्रुतपदं वेदान्तप्रसिद्धश्रवणार्थकम् । गुरुमुखाद्विचारितवेदान्त इत्यर्थः । विचारितवेदान्तस्य ब्रह्मणि प्रसिद्धिः सिद्धैव । इतरस्यासिद्धिः । पूर्वस्य न संशयप्रसक्तिः । यस्य संशयस्तस्य न सिद्धिः ॥

पूर्वतराधिकरणविषयानन्दमयश्रुत्या आकाशशब्दस्य ब्रह्मणि प्रयोगो न साधितः । 'आत्मन आकाशः संभूतः' 'आकाशाद्वायुः' इति तत्र भूताकाशे सम्प्रतिपन्नतया प्रयुक्त आकाशशब्द आत्मव्यतिरिक्त एव व्युत्पन्नः । 'यदेष आकाश आनन्दो न स्यात्' इत्यत्राकाशशब्दो नात्मशब्दसमानाधिकरणो भवन्मते । 'यदेष आकाश आनन्दो न स्यात्' इति श्रुतिः 'तदाह—यत् यद्येष आकाशे परमे व्योम्नि गुहायां निहित आनन्दो न स्यान्न भवेत्' इति व्याख्याता शाङ्करे तैत्तिरीयभाष्ये । परमं व्योम गुहा च बुद्धिः । अस्मन्मते आकाशपदस्यानन्दसमानाधिकरणत्वेनान्वयेऽपि तस्य यौगिकोऽर्थ एव गृह्यते । आकाशशब्दस्य वैपुल्यमपरिच्छिन्नत्वमर्थः । समानाधिकरणान्वये स एव स्वारसिकोऽर्थः । आनन्दशब्दश्चात्र तैत्तिरीयश्रुतौ ब्रह्मण्यभ्यस्त इति भवत्सम्प्रतिपन्नम् ; प्रसिद्धं च । ब्रह्मवाचकानन्दशब्दात्पूर्वपठितस्याकाशशब्दस्यानन्दविशेषणत्वं स्वरसम् । 'विषयवाक्ये विशेष्यपदं चेद्ब्रह्मवाचि तदा श्रुतिः । विशेषणपदं चेत्, तदा ब्रह्मपरत्वेन निर्णिनीषितस्य विशेष्यपदस्य च समभिव्याहाररूपं वाक्यं प्रमाणमिति व्यवस्था ।' इति प्राणाधिकरणे परिमलः ॥

इत्थं चोदाहृततैत्तिरीयश्रुत्या ब्रह्मण्याकाशशब्दप्रयोगो दुर्वचः ।

एवं च 'अश्रुतवेदान्तस्य वा, सुश्रुतवेदान्तस्य वा नात्र संशयः किं त्वन्तरधिकरणान्तमवधृतवेदान्तस्य, भवताप्युक्तन्यायापवादार्थमेवमेव वक्तव्यत्वाद्भाष्येऽप्यानन्दमयाधिकरणावलम्बनेन 'यदेष आकाश आनन्दः' इति, अन्तराधिकरणावलम्बेन 'आकाशो वै नामरूपयोर्निर्वाहितेति च भाषणात्' इति भवदुक्तं समाधानं निरस्तं भवति । अत्र 'यदेष आकाश आनन्दो न स्यात्' इति वाक्यस्य ब्रह्मणि प्रसिद्ध्युपोद्बलकतया भाषणं तैत्तिरीयभाष्ये व्यधिकरणान्वयभाषणविरुद्धम् । श्रीभाष्ये चाधिकरणान्ते एतद्वाक्यं नोदाहियते । अस्मिन्नधिकरणे आकाशवाक्ये आकाशपदस्य ब्रह्मपरत्वस्थापनेन तस्य ब्रह्मणि प्रयोगः साध्यते । क्रमेण दहराद्यधिकरणेषु भूयस्तादृशप्रयोगप्रदर्शनेन तस्यापि ब्रह्मणि वैदिकप्रसिद्धिर्व्युत्पाद्यते । ब्रह्मण्याकाशशब्दस्य प्रयोगसाधनद्वारा तत्र तच्छब्दस्य काचित्प्रसिद्धिः साध्यत इति न कोऽपि विवदते । वृथैव भवतां महान्संरम्भस्तन्निरूपणाय । ब्रह्मण्याकाशशब्दस्य कथंचित्प्रयोगप्रसिद्धिव्युत्पादनं फलतयोपन्यस्यतेऽधिकरणान्ते श्रीभाष्यकारैः । प्रसिद्धेः पूर्वसिद्धत्वमेवाक्षिप्यते । पूर्वसिद्धस्यैव संशायकत्वं वर्णयितुमुचितम् । अन्तरधिकरणावलम्बेनाकाशो वै नामेति वाक्यभाषणं कृतमिति भवदुक्तिः प्रामादिकी । तत्र तत्प्रस्तावगन्धस्याप्यभावात् । अत्राकाशशब्दस्य ब्रह्मणि प्रसिद्धिभाषणं नूनं प्रामादिकं वा अहृदयं वा भवेत् । इतरथा द्वितीयपादारंभे 'अर्थान्तरप्रसिद्धानां च केषां चिच्छब्दानां ब्रह्मविषयत्वहेतुप्रतिपादनेन कानिचिद्वाक्यानि स्पष्टब्रह्मलिङ्गानि सान्दिह्यमानानि ब्रह्मपरतया निर्णीतानि' इत्याकाशाद्यधिकरणानामाकाशादिभूतप्रसिद्धिरूपश्रुतेर्ब्रह्माव्यभिचरितलिङ्गबाध्यत्वभाषणं ध्रुवं व्याहन्येत । 'यत्रार्थान्तरप्रसिद्धा एवाकाशप्राणज्योतिरादयो ब्रह्मणि व्याख्यायन्ते तदव्यभिचारिलिङ्गश्रवणात्' इति तत्र भामती । 'यद्यर्थान्तररूढा अपि शब्दा ब्रह्मलिङ्गाद्ब्रह्मपरतया व्याख्याताः' इति कल्पतरुः, 'श्रुतिबाधकस्य लिङ्गबाधनक्षमत्वं

कैमुतिकन्यायसिद्धमित्यर्थः' इति परिमलश्च, आकाशादिशब्दानां आकाशादिषु प्रसिद्धत्वं रूढत्वं ब्रह्मणि तदभावश्च भवद्भाष्यकाराभिप्रेते इति निश्चाययतः । अत आकाशाद्यधिकरणे आकाशशब्दस्य ब्रह्मण्यपि प्रसिद्धिभाषणमचतुरं द्वितीयपादारंभभाष्यतद्व्याख्यानैर्विप्रतिषिद्धं चेति सुनिश्चितं भवति । अतः श्रुतप्रकाशिकोक्तं साध्वेव ।

'न ह्याकाशादनतिरिक्तं वा ब्रह्म अतिरिक्तं वेति कश्चित्सन्दिग्धे । किं त्वाकाशो ब्रह्म वाऽस्य विषय इति सर्वः सन्दिग्धे'

इति भवदुक्तिर्विचित्रा । श्रीभाष्ये विकल्पशिरःप्रदर्शकवाक्ययोरनवलोकनं भवतां चक्षुष्मत्ताराहित्यमेव गमयति । 'क्रोधान्ध्यम्' इति प्रसिद्धं क्रोधस्यान्ध्यकरत्वम् ।

'किं प्रसिद्धाकाश एवात्राकाशशब्देनाभिधीयते ? उतोक्तलक्षणमेव ब्रह्म' इति श्रीभाष्ये विकल्पशिरःप्रदर्शकान्यक्षराणि । आकाशशब्दाभिधेयं किं भूताकाशो वा वेदान्त्यभिमतचेतनब्रह्म वेत्येव भवताऽपि विशयवर्णनम् । आकाशशब्देनाकाशशब्दाभिधेयमभिप्रेयते । तदेव पक्षपदार्थः । तस्य पूर्वपक्ष्यभिमताचेतनादन्यत्वं साध्यते । कारणस्याचित्त्वं सिषाधयिषति पूर्वपक्षी । तस्याचिद्वैलक्षण्यं साध्यते सिद्धान्तिना । सच्छब्दः साधारणशब्दः ; न विशेषशब्दः । विशेषशब्दभूताकाशशब्दलाभात् 'आकाशादेव समुत्पद्यन्ते' इत्यवधारणनिर्देशलाभाच्च पूर्वपक्षी प्रत्यवतिष्ठते । 'जगत्कारणवादिवाक्यप्रतिपाद्यं किमाकाशः ? उत परमात्मेति विचारः' इति विशयप्रदर्शनं श्रुतप्रकाशिकायाम् । भाष्यद्वयस्यात्राद्वैतमेवेति पूर्वमभ्यधाम । 'आकाशशब्दं ब्रह्म' इति भवद्भाष्यनिगमनम् । आकाशशब्दप्रतिपाद्यं ब्रह्मेति तदर्थः । 'तस्मादाकाशादिशब्दवाच्यं ब्रह्म' इति चन्द्रिकाप्रयोगः । 'अतः परमेव ब्रह्म ज्योतिःशब्दमिति सिद्धम्' इति भवद्भाष्यं ज्योतिरधिकरणान्ते । उद्देश्यविधेययोर्व्यत्यस्तक्रमेण तत्र निर्देशो भवति । भवद्भाष्यप्रयोगो ना-

तिचतुर इति वयं कदापि नाधिक्षिपेम ।

श्रीभाष्ये पूर्वपक्षनिगमने 'यत एवं प्रसिद्धाकाशादनतिरिक्तं ब्रह्म.... अतः प्रसिद्धाकाशादनतिरिक्तं ब्रह्म' इति भाषितम् । तामुक्तिमवलम्ब्य भवतामज्ञानेर्ष्यासमुच्चयविलसितं भवद्दूषणम् । श्रीभाष्यवाक्यस्यार्थो नैव ऋजुतयावगम्यते भवद्भिः । जन्मादिसूत्रविषयवाक्ये जगज्जन्मप्रलयकारणत्वं ब्रह्मलक्षणत्वेनोक्तम् । जगत्कारणत्वेन लक्षितं ब्रह्म न चेतनम् ; किं त्वचेतनमिति पूर्वपक्षी । आकाशमेव लक्षणवाक्योक्तं ब्रह्मेति तत्पक्षः । कारणत्वलक्षणस्य चेतनब्रह्मण्ययोगव्यवच्छेदः क्रियतेऽत्र सिद्धान्तिना । प्रसिद्धाकाश एव लक्षणवाक्यलक्षितं ब्रह्मेति पूर्वपक्ष्याशयः । तदेवानूदितं श्रीभाष्यकारैः 'अतः प्रसिद्धाकाशादनतिरिक्तं ब्रह्म' इति ॥

अत्र सिद्धान्तयुक्तयः श्रुतिपूर्वपक्षस्यानिरासिका इति भवान्मन्यत इव ।

तत्र कथं भोक्तृलिङ्गादिति वचनमात्रेण पराणुद्येत भूतवादी । अहह मत्तेभकुम्भमर्दनं मालतीकुसुमेन, मत्कुणमर्दनं तु महामहीध्रप्रयोगेणेति केयं विषमा दृष्टिर्लक्ष्मणाचार्यस्य'

इति भवदुक्तिरर्थशून्या । आकाशाधिकरणे भवानाकाशकुसुमभूतदूषणान्येव महता संरम्भेण ग्रथ्नाति । मतद्वयेऽप्यनन्यथासिद्धलिङ्गेन श्रुतिबाधनमेव क्रियत इति सम्यङ्निरूपितमस्माभिः । अतो ब्रह्मलिङ्गानामनन्यथासिद्धिभञ्जनसंरम्भ उपहास्य एव । स्वप्नावस्थायामेव भवतां ग्रन्थरचनमित्यनुमेयं भवति ।

'विषयवाक्यगताकाशशब्दवाच्यमचेतनात् प्रसिद्धादाकाशादन्यत् । अचेतनाकाशान्युलिङ्गात्' इत्यस्माकं सूत्रार्थः । आकाशान्यश्च ब्रह्मेति पर्यवस्यति । अयोगव्यवच्छेदपरेऽस्मिन् पादे इत्थमेव भवताऽपि निरूपणीयम् । आकाशस्य लोकगतित्वं विदधाना श्रुतिः तदुपपादकतयाऽन्यत्र प्रसिद्धं अचेतनान्यकारणत्वमनूद्य हेतूकरोति 'सर्वाणि ह वा'

इत्यादिना । 'आकाश इति होवाच' इति वाक्यं गतित्वविधायकम् । तदुत्तरं प्रसिद्धवन्निर्देशवाक्यं सदेवेत्यादिवाक्यान्तरप्रसिद्ध्यनुवादेन हेतुसमर्पणपरम् । सदेवेत्यादिवाक्यं चेतनकारणपरत्वेन निर्णीतत्वात् चेतनकारणप्रसिद्धिसमर्पणक्षमम् । श्रुतिप्रदर्शितहेतुरेव परामृश्यते सूत्रेण तल्लिङ्गादिति । 'वाक्यान्तरप्रसिद्धार्थस्यानूदितस्य हेतुतया विवक्षितत्वात् तल्लिङ्गादित्युक्तम् । न तु तद्धर्मव्यपदेशादिति' इति निरूपितं सिद्धान्तश्रुतप्रकाशिकायाम् ।

आत्मशब्दः साधारणशब्दः; नाकाशशब्दवद्विशेषशब्दः । तस्य स्वरूपपरत्वमुच्यते पूर्वपक्षिणा । तथा चाकाशः स्वस्यैव सूक्ष्मरूपान्तरात्संभूत इत्यर्थः सम्पद्यते पूर्वपक्षे ।

"यद्यपि चेतनादन्यत्रापि क्वचिदात्मशब्दः प्रयुज्यते, तथापि शरीरप्रतिसंबन्धिन्यात्मशब्दस्य प्रयोगप्राचुर्यात् 'आत्मा वा इदमेक एवाग्र आसीत्' 'आत्मन आकाशः संभूतः' इत्यादिषु शरीरप्रतिसंबन्धिचेतन एव प्रतीयते । यथा गोशब्दस्यानेकार्थवाचित्वेऽपि प्रयोगप्राचुर्यात्सास्नादिमानेव स्वतः प्रतीयते"

इत्यादि भाषितं श्रीभाष्ये पूर्वपक्षयुक्तिनिरासाय । प्रसिद्धिमवलम्ब्य खलु पूर्वपक्षः । प्रसिद्धिर्नाम झटित्यविलम्बेनार्थप्रतीतिहेतुत्वम् । आकाशशब्दविषये पूर्वपक्ष्युक्तहेतोराविलम्बप्रतीतेरात्मशब्दविषये तदभिमताचेतनपरत्वभञ्जकत्वान्न युक्त्यन्तरापेक्षा । स्वव्याघातकेहेतौ पूर्वपक्षिणैवावलम्बिते कः प्रयासः सिद्धान्तिनस्तन्निरसने ॥

"किं चात्मन आकाशः संभूतः' इत्यत्रात्मशब्दस्याकाशादनतिरिक्तार्थत्वनिश्चये सर्वभूतकारणत्वरूपलिङ्गस्याकाशे उपपन्नत्वनिश्चयः, सत्यस्मिन्निश्चये शब्दाद्ब्रह्मण्याकाशादनतिरिक्तत्वनिश्चय इत्यहो महदिदं पाण्डित्यं प्रदर्शितं भवद्भाष्याचार्यान्तेवासिभ्यां परस्पराश्रयदुष्टं पूर्वपक्षं प्रणय-

न्त्र्यामित्यलमधिकेन" इति भवदुक्तिरत्यन्तममूला । आत्मशब्दो नानार्थेषु शक्तः । स्वरूपार्थेऽपि शक्तः । अनेकार्थसाधारणः स शब्दः स्वार्थविशेषनिर्णयाय स्वत एव विशेषनिर्णायकशब्दान्तरमपेक्षते । आकाशशब्दस्तु विशेषबोधने नात्मशब्दार्थमपेक्षते । साधारणानिर्णीतार्थात्मशब्दवद्वाक्यस्य रूढिप्रतिपन्नाकाशबाधकत्वासंभवमात्रमुपजीव्यते आकाशवाक्यार्थनिर्णये पूर्वपक्षिणा । बाधकत्वाभावश्च आत्मशब्दस्य साधारण्यमात्रेणाप्युपपद्यमानो न तस्य स्वरूपपरत्वनिर्णयमाकांक्षतीति नान्योन्याश्रयः ।

"आत्मशब्दस्य कारणाकाशपरतया ज्यायस्त्वादिगुणानामपि कथंचिन्नेयत्वेन रूढिशक्तेः स्थितत्वाद्विषयवाक्यस्थाकाशशब्दः प्रसिद्धाकाशपर इति वेदान्तवेद्यं वस्तु प्रसिद्धाकाश इति पूर्वपक्षे फलफलिभावः" इति श्रुतप्रकाशिकायां ज्यायस्त्वादिगुणानां पूर्वपक्षे कथंचिन्नेयत्वमुक्तम् । सर्वभूतकारणत्वमसंकुचितं नोपपद्येत भूताकाशे । भूतशब्देन प्राणिन उच्यन्ते । कथं चेतनानामचेतनादुत्पत्तिः, अचेतने च लयः? ज्यायस्त्वपरोवरीयस्त्वपरायणत्वादिकं च ब्रह्मासाधारणम् । इदं सर्वं स्फुटं भवद्भाष्येऽपि । नात्रान्योन्याश्रयस्य मनागप्यवकाशः ॥

एतदधिकरणम्, अनन्तराधिकरणत्रयम्; एतत्पूर्वाधिकरणं चोपासनाविषयमिति भवद्भिरभ्युपगतम् । 'उपासात्रैविध्याभ्युपगमादित्युपास्यप्रधानः पादः प्रवर्तिष्यत इति सूच्यते' इति भवतोच्यते पादान्त्याधिकरणे । किमेष पादो नोपास्यप्रधानः? आनन्दमयाधिकरणस्यापि प्रथमवर्णके उपास्यपरत्वमेवोक्तम् । 'तत्तु समन्वयात्' इति निर्विशेषे समन्वयप्रतिज्ञानमुपासनविधायकवाक्यानां ब्रह्मण्यतात्पर्यं च ब्रुवतां भवतामभिमतविरोधेन सूत्रकारोऽस्मिन्पादे उपास्यप्रधानान्यधिकरणानि भूरि निबध्नाति । तच्च समन्वयसूत्रस्यास्मदुक्तार्थ एव सूत्रकृदभिमत इत्यत्र निश्चितं लिङ्गम् ॥

॥ प्राणाधिकरणम् ॥

अतिदेशाधिकरणस्यास्याधिकाशङ्का वक्तव्या । उक्ता च भाष्यद्वयेऽपि । यद्यपि श्रीभाष्ये भवद्भाष्योक्तम् 'यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति, प्राणं चक्षुः, प्राणं श्रोत्रम्; प्राणं मनः, स यदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्ते' इति श्रुतिप्रसिद्धं मुख्यप्राणे भूतसंवेशनोद्यमनमधिकाशङ्काहेतुतया स्पष्टवचनेन नोपात्तम्, तथापि 'अधिकाशङ्का तु कृत्स्नस्य भूतजातस्य प्राणाधीनस्थितिप्रवृत्त्यादिदर्शनात्प्रसिद्ध एव प्राणो जगत्कारणतया निर्देशमर्हतीति' इति भगवद्रामानुजवाक्यगतेनादिशब्देन तदप्यभिप्रेतमित्युक्तं श्रुतप्रकाशिकाभावप्रकाशिकयोः । "यदा वै पुरुषः स्वपिति' इति प्रसिद्धवन्निर्देशरहितया श्रुत्या प्राणस्याप्ययनोद्गमहेतुत्वावगमश्चादिशब्देन विवक्षितः" इति श्रुतप्रकाशिका ॥

'अस्मिन्प्रकरणे उद्गीथप्रतिहारयोरन्नादित्यावब्रह्मणी देवतात्वेनोक्तौ, तद्वत्प्राणोऽप्यब्रह्मैव ग्राह्य इतीदं भाष्ये अनादृतम् । प्रकरणोक्तानामन्नमयादीनामब्रह्मत्वेऽपि कारणस्य परब्रह्मत्वमानन्दवल्ल्यां समर्थितमिति प्रकरणमात्रस्य पूर्वपक्षावलम्बनत्वेन बुद्धावनारोहात्' इति श्रुतप्रकाशिकोक्तस्य भावानवबोधेन वृथा भवतां तद्दूषणसंरम्भः । तस्य च भावो विवृतो भावप्रकाशिकायाम् 'सन्निधिलक्षणाब्रह्मप्रायपाठमात्रेणेत्यर्थः । ततश्च भाष्योक्तरीत्या ब्रह्मलिङ्गान्यथासिद्धिरेव पूर्वपक्षहेतुः तत्र परोक्तः प्रायपाठोऽप्यनुग्राहकोऽस्त्विति भावः' इति । एवं भाववर्णने भवद्विजृम्भणस्यानवकाश एव ॥

॥ ज्योतिरधिकरणम् ॥

अस्मिन्नधिकरणे सूत्रव्याख्यानरीतिर्भाष्यद्वयेऽपि प्रायेणैकरूपा । अधिकरणव्युत्पाद्यन्यायश्चैकरूपः । आकाशवाक्ये, प्राणवाक्ये चानन्यथासिद्धब्रह्मलिङ्गैः श्रुतिबाध उक्तः । अत्र स्ववाक्येऽनन्यथासिद्धब्रह्मलिङ्गा-

भावादादित्यज्योतिरनुकूललिङ्गसद्भावाच्च प्रत्यवसीयते । सर्वनामशब्दभूत-यच्छब्देन पूर्वप्रकृतवस्तुपरामर्शात् 'तावानस्य महिमा । ततो ज्यायांश्च पूरुषः, पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि' इति पूर्वमन्त्रे प्राकृ-ताप्राकृतविभूतिद्वयस्य पुरुषशब्दवाच्यब्रह्मचरणत्वाभिधानात्, यच्छब्दस्य चोपक्रमस्थत्वात्; ज्योतिःशब्दस्य च प्रकाशकत्वरूपप्रवृत्तिनिमित्तमाश्रित्य लोकवेदयोरितरभासके प्रयोगदर्शनात्, उपक्रमस्थद्युसंबन्धलिङ्गेन ब्रह्मण उपासनान्वयाकांक्षालक्षणेन प्रकरणेन चात्र ज्योतिःशब्दवाच्यं परं ब्रह्मेति वर्णनमुभयत्र समानम् । कौक्षेयज्योतिषि ज्योतिःशब्दवाच्यं ब्रह्म संपाद्यो-पास्यमिति भवन्मतेऽध्यासमूलो दृष्टिविधिः । नात्रातस्मिंस्तद्बुद्धिरूपाध्यासाश्र-यणस्यावश्यकतेति वयम् कौक्षेयज्योतिषो ब्रह्मात्मकत्वं भगवता स्वयमेवोक्तम्—

'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः'

इति श्रीभाष्यम् । 'वेदनस्य यथार्थविषयत्वे संभवत्यतस्मिंस्तद्दृष्टिरूपताश्रय-णमयुक्तम्' इति श्रुतप्रकाशिका । दृष्टिविधिर्भवन्मत इत्ययमेक एव भेदः । उपनिषद्वाक्यार्थे स भेदोऽस्ति; न सूत्रार्थे ॥

अस्मन्मते, चन्द्रिकायां च प्रदर्शितमधिकरणक्रमस्वारस्यं भवन्त उप-हसन्तीव । हासमेव व्यसनितयाभ्यस्यन्ति भवन्तः । अस्थान एव भूयो भवद्धसनम् । अस्थानहसनं मोघं भूत्वाऽऽत्मानमेव प्रतिनिवर्तत इति निपुण-प्रसिद्धिः । भूतादेराकाशस्य जगत्कारणत्वं प्रत्याययतो वाक्यस्य प्रथमं विचारः । तदनन्तरं वायुविशेषभूतप्राणवाक्यस्य । तदनन्तरं भूततृतीयज्योतिर्वा-क्यस्य । अस्ति चापरं स्वारस्यमधिकरणक्रमे । अन्तरादित्यविद्याया अनन्तरं छान्दोग्ये एतासां तिसृणां विद्यानामेष एव क्रमः । काऽत्रानुपपत्तिः? एष एव भूतक्रम आश्रीयते वियत्पादाधिकरणेषु भवन्मतरीत्या । 'अथाप्युत्त-राधिकरणे गत्यभावान्नेयं कल्पना युक्तेति विभावनीयम्' इति भवद्भिरुच्यते । कृत्स्ने शास्त्रे भूतक्रम एवानुसरणीय इति नास्ति नियमः । दृष्टानुरोधेन

स्वारस्यं प्रदर्श्यतेऽस्माभिः । श्रुतिक्रमं वस्तुक्रमं चाद्रियते स्वतन्त्रः सूत्रकृत् । क्रमसाङ्गत्ये बुद्धिस्थतया प्रसङ्गोऽपि हेतुरेव ॥

कारणवाक्यानां ब्रह्मणि समन्वयप्रदर्शने जन्मादिलक्षणस्यासंभवातिव्याप्ती वार्येते सूत्रकृतास्मिन्नध्याये । यत्र किंचिद्वाक्यं साक्षात्कारणवाक्यं न भवति, तस्य कारणत्वसमनियतगुणविशेषप्रतिपादकत्वादस्मिन्नध्याये सङ्गतिः । 'कारणत्वमबाध्यत्वम्' इति प्रथमद्विकस्य विषयप्रदर्शनम् । जन्माद्यधिकरणोक्तकारणत्वेनोपक्रमः । प्रकृतिश्चेति कारणत्वेनैवोपसंहारः । कारणवाक्यसमन्वयपरेऽस्मिन्समन्वयाध्यायेऽकारणवाक्यानां कतिपुचिदधिकरणेषु विचारम्य सङ्गतत्वमेवमेव चेतनकारणनिर्णयशेषतया भवद्भिरप्युपपादनीयम् । 'गतिसामान्यात्' इतीक्षत्यधिकरणे प्रतिज्ञातं सर्ववेदान्तानां चेतनकारणबोधकत्वमध्यायशेषे समर्थ्यत इति भाष्यत्रयसंप्रतिपन्नम् । गतिसामान्यसूत्रार्थः 'समानैव हि सर्वेषु वेदान्तेषु चेतनकारणावगतिः' इति भाषितो भवद्भाष्ये । 'यच्च 'गतिसामान्यात्' इत्यचेतनकारणनिराकरणमुक्तम्; तदपि वाक्यान्तराणि ब्रह्मविषयाणि व्याचक्षाणेन ब्रह्मविपरीतकारणनिषेधेन प्रपञ्च्यते' इति तत्र भाषितमीक्षत्यानन्दमयाधिकरणयोरन्तरालेऽध्यायशेषस्य प्रयोजनोपपादनाय । अध्यायान्तिमे सर्वव्याख्यानाधिकरणे कृत्स्नस्याध्यायस्य ब्रह्मेतरकारणत्वनिरासः; ब्रह्मणः कारणत्वं च विषय इति स्पष्टा अवगतिः । उपक्रमे ईक्षत्यधिकरणे प्रतिज्ञातस्य गतिसामान्यस्यानन्दमयाधिकरणमारभ्य वृत्तेनाधिकरणकलापेन साधितत्वमाचार्यो मनुत इति स्पष्टम् । तदाधिकरणे भाषितम् "'ईक्षतेर्नाशब्दम्' इत्यारभ्य प्रधानकारणवादः सूत्रैरेव पुनः पुनराशङ्क्य निराकृतः" इति ।

'एतेन प्रधानकारणवादप्रतिषेधन्यायकलापेन सर्वेऽण्वादिकारणवादा अपि प्रतिषिद्धतया व्याख्याता वेदितव्याः । तेषामपि प्रधानत्वादशब्दत्वाच्छब्दविरोधित्वाच्च'

इति सूत्रार्थो भावितस्तत्र । 'प्रतिज्ञा लक्षणं लक्ष्यमाणे पदसमन्वयः । वैदिकः स च तत्रैव नान्यत्रेत्यत्र साधितम्' इत्यध्यायान्तेऽध्यायार्थसंग्राहिका भामतीकारिका । 'प्रथमसूत्रे विचारप्रतिज्ञा । लक्षणं द्वितीये । लक्ष्यमाणे समन्वयश्चतुर्थे । स च तत्रैवेति शिष्टायां त्रिपाद्यां ; नान्यत्रेति चतुर्थपादे' इति सा कारिका व्याख्याता कल्पतरौ । द्वितीयाध्यायोपक्रमभाष्येण चेदं स्पष्टीक्रियते । 'यदुक्तं ब्रह्मैव सर्वज्ञं जगतः कारणमिति' इति तत्र पूर्वाध्यायवृत्तानुवादः । 'चेतनजगदुपादानसमन्वयः साङ्ख्यस्मृत्या सङ्कोच्यते न वा' इति तदध्यायकल्पतरूपक्रमः । कारणत्वलक्षणयुक्तब्रह्मणि समन्वयप्रदर्शनमध्यायकृत्यम् । उपक्रमोपसंहाराभ्यां चेदं स्पष्टं भवति । मध्ये विचारितानां केषांचिदुपास्यत्वनिरतिशयदीप्तियुक्तत्वादिबोधकानां वाक्यानां कारणसमन्वयाध्याये सङ्गतत्वं तच्छेषतयोपपादनीयम् । 'कारणं तु ध्येयः' इति ध्येयत्वस्य कारणत्वसमनियतत्वम् । कारणत्वाक्षेपकस्य निरतिशयदीप्तिलिङ्गस्यादित्यादिज्योतिषि दृश्यमानत्वाद्ब्रह्मणः कारणत्वं न सिद्ध्यतीति पूर्वपक्षी । 'अतः परं जगत्कारणत्वव्याप्तेन येन केनापि निरतिशयोत्कृष्टगुणेन जुष्टं ज्योतिरिन्द्रादिशब्दैरर्थान्तरप्रसिद्धैरप्यभिधीयमानं परं ब्रह्मैवेत्यभिधीयते ज्योतिश्चरणाभिधानादित्यादिना' इत्यत्र श्रीभाष्योपक्रमः । "निरतिशयदीप्तिरेव कारणत्वाक्षेपकलिङ्गम् । 'न तत्र सूर्यो भाति' 'तस्य भासा सर्वमिदं विभाति' इति प्रकरणे 'तथाक्षरात्संभवतीह विश्वम्' इति निरतिशयदीप्तियुक्तस्य कारणत्वश्रवणात्" इति तत्र श्रुतप्रकाशिका । स्वमतस्थितिमपरिज्ञाय स्वमतग्रन्थाननवलोक्य मद्रूपमात्रेण भवद्भिर्वृथा दूष्यते "अत्रोदाहरणे कारणत्वस्यानभिधानाद्भ्रमीति तान्त्रिकः, यत एवमाह— अत्र कारणत्वस्याननिधानेऽपि तद्व्याप्तमभिधीयते निरतिशयोत्कृष्टदीप्तिजुष्टत्वम् । व्याप्तिग्राहकं तु तस्य भासा सर्वमिदं विभातीति श्रावयित्वा तथाक्षरात्संभवतीह विश्वमिति श्रावकं मुण्डकम् । तथा चात्र व्याप्यानुधारणाद्व्यापकस्यानुधारणम्,

यथा धूमावधारणाद्धूमध्वजस्येति" इति । अत्र को बंभ्रमीति । भवानेवेति स्फुटम् । प्रसिद्धमिदं स्वयं बंभ्रम्यमाणो भ्रमरहितवस्तुषु भ्रमणं मन्यत इति । प्रसिद्धस्य तन्न्यायस्य भवान्प्रथमनिदर्शनं भवति । स्वमतग्रन्थेषु यदि प्रावीण्यमभविष्यत्, अस्मिन्विषये भवतामीदृशो मतिभ्रमो नैवाजनिष्यत । यच्च तदनन्तरमुच्यते भवद्भिः— 'अत्रैकं परं भवति हर्षहेतुः; यदि श्रुत्यन्तरमादाय त्वमाक्षिपसि तदाहमपि वाक्यान्तरमादाय प्रतिक्षिपामीति यत्' इति तस्यार्थ एव न बुध्यते । अस्मदुक्ताक्षेपशब्दस्य प्रापकत्वमर्थो न निषेधकत्वम् । ध्रुवं भवन्तो बंभ्रम्यमाणा एवेदं लिखन्ति । अकारणवाक्यस्य ज्योतिर्वाक्यस्यास्मिन् कारणवाक्यसमन्वयाध्याये चेतनकारणावगतिसामान्यरूपगतिसामान्यनिरूपके कथं सङ्गतत्वमिति तटस्थशङ्का अपनीयते श्रीभाष्यकारैः श्रीसुदर्शनसूरिभिश्च श्रुत्यन्तरमादाय । कस्याक्षेपो वाक्यान्तरमादाय कस्य वा प्रतिक्षेपः । यदुक्तं तदनन्तरम् 'परं तु तदेव मुण्डकवाक्यं कुतो नोदाहृतमिति पर्यनुयोगे ज्योतिःशब्दाघटितत्वादिति वक्तव्यम्' इति । तत्र ब्रूमः । अत्र केनाक्षेप्तुं शक्यं ज्योतिर्वाक्यं विषयवाक्यतया न प्रदर्शनीयमिति । तदेव वाक्यं साक्षाद्विषयतया प्रदर्शयद्भिर्भवाद्भिर्नैवमाक्षेप्तुं शक्यम् । स्वव्याघातकप्रश्नैरेव स्वग्रन्थं पूरयन्तो भवन्तः काममिममाक्षेपं कुर्वन्तु । सुनिरसो भवदाक्षेपः । सूत्रकाराभिप्रेतं विषयवाक्यं किमिति विवादः । न भवतां ज्योतिःसूत्रस्यैकस्य ज्योतिराधिकरणत्वमिष्टं यथा द्वैतिनाम् । चतुर्णां सूत्राणामेतदधिकरणघटकत्वमिष्टमावयोरुभयोः । मुण्डकवाक्ये छन्दोऽभिधानं नास्ति । तथा चेतोर्पणनिगमो नास्ति । प्रत्यभिज्ञाभञ्जकत्वेनोपन्यासयोग्यो व्यपदेशभेदोऽपि नास्ति । अनन्तरसूत्रत्रिकं भवदाक्षेपं गलहस्तयति । तिष्ठत्वनन्तरसूत्रत्रयम् । ज्योतिःश्रुतिरेकैवालं भवन्तं प्रतिक्षेप्तुम् । श्रुत्यनुगमः सूत्रस्य न्याय्य इति भवद्भाष्यसंमतम् । अधिभूतप्रकरणं विच्छिद्येतेति न वयं वदामः । नात्राधिभूतप्रकरणम् । ब्रह्मप्रकरण-

मैवेदं सिद्धान्तरीत्या । 'तस्य भासा—' इति मुण्डकवाक्यस्य भवद्रीत्यानुकृत्यधिकरणे विचार्यत्वादत्रापि तद्विचारे ध्रुवं पौनरुक्त्यम् । 'अदृश्यत्वादिगुणको धर्मोक्तेः' 'द्युभ्वाद्यायतनं स्वशब्दात्' इत्यधिकरणयोरेतस्य मुण्डकप्रकरणस्य परब्रह्मविषयत्वविचाराच्चात्र तद्वाक्योपन्यासे पौनरुक्त्यं स्यादेव ॥

अत्र प्रतीकोपासनं सिद्धान्तत्वेन वर्णयित्वा तुरीयसूत्रेण 'न ह्यत्र विरोधो द्युसम्बन्धे, तद्बहिर्भावे च । उभयस्मिन्नप्यविरोधात् । यतो वृक्षाग्रमिव श्येनस्योपाधिरेव द्युलोको ब्रह्मणः । नह्युपाधिसम्बन्धासम्बन्धाभ्यामुपहितं भिद्यत इत्यादिकमुपदिष्टं भगवता वेदाचार्येणेति वेदितव्यम्' इति भवन्त इदंप्रथमतयोपदिदिक्षन्ति । नात्र वेदाचार्य उपहितानुपहितविषये किञ्चिदप्युपदिशति । भिन्नकारकव्यपदेशप्रयुक्तप्रत्यभिज्ञाभञ्जनमेव परिजिहीर्षत्यत्र । कारकभेदेऽपि प्रयोगबलात् सम्बन्धैक्यं सिद्धान्तयति । भिन्नयोरधिकरणत्वापादानत्वव्यपदेशयोरेकार्थकत्वं खलु स्पष्टं सिद्धान्त्यते सूत्रेण । सूत्रेषु भवदभिमतोपहितानुपहितपरिभाषाया अविद्यमानत्वात्, भवन्तो हठात्कारेणात्र तां सूत्रकृदभिमतत्वेनावजिगमयिषन्ति । नात्र तस्य प्रस्तावावकाशगन्धोऽपि । नात्र तद्विषयविचिकित्सा पूर्वपक्षसिद्धान्तयोः । 'यथा लोके वृक्षाग्रसम्बद्धोऽपि श्येन उभयथोपदिश्यमानो दृश्यते वृक्षाग्रे श्येनः, वृक्षाग्रात्परतः श्येन इति च' इति सूत्रकृदभिप्रेतदृष्टान्तवर्णनं भवदीयभाष्ये । सम्बद्धस्यैव श्येनस्योभयथा व्यपदेशविषयत्वमुक्तं दृष्टान्ते । ततश्च दार्ष्टान्तिकेऽपि द्युसम्बन्ध एव ब्रह्मणो व्यपदेशद्वयेऽपि सिद्ध्यति । "उभयव्यपदेशदर्शनेन दिवि स्थित एव ब्रह्मणि 'दिवि' 'दिवः परः' इत्युभयथा व्यपदेशोपपत्तेः" इति न्यायरक्षामणौ ब्रह्मणोऽपि दिवि स्थितावेव प्रयोगोपपत्तिः प्रदर्शिता ॥

अत्र भवन्मतरीत्या प्रतीकोपासनसिद्धान्ते निर्गुणसिद्धान्तनस्यानवकाश एव । विषयवाक्ये पादशब्दश्रवणेऽपि श्रुत्यनुगममाद्रियमाणः सूत्रकारः किमर्थं चरणशब्दं प्रयुयुजे । अतोऽत्र चरणशब्दघटितं विषयवाक्यान्तरं वर्णनीयमित्याक्षिप्तं द्वैतिभिः । ज्योतिःसूत्रस्यैकस्य पृथगाधिकरणत्वञ्च वर्णितं तैः । अनन्तरं सूत्रत्रयं गायत्र्यधिकरणं तन्मते । तत्र विषयवाक्यं समानमस्मद्भाष्याभ्याम् । स्वारस्यमनुरुन्धानैः श्रीमच्चन्द्रिकाचार्यैरस्मद्व्याख्यानरीत्या चतुर्णामपि सूत्राणामैकाधिकरण्यमपि वर्णितम् । पादशब्दं विहाय चरणशब्दं किमर्थमपठत्सूत्रकार इति भवत्प्रश्नः । अयं प्रश्नः समाहितः सुरपुरं श्रीनिवासाचार्यैः । समाधास्यामश्च वयं भवत्प्रश्नं तदुक्तरीत्या, तदन्यरीत्यापि । प्रथमं तदुक्तसमाधाने गृह्णीमः । पादशब्दः समांशमात्रे प्रसिद्धः । चरणशब्दः समासमभेदं विहायांशसामान्ये प्रसिद्धः । अत्र चरणशब्देन 'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि' इति मन्त्रवर्णप्रत्यभिज्ञापनमिष्यते सूत्रकृता । मन्त्रवर्णगतपादशब्दस्यांशमात्रे तात्पर्यमिति सूत्रकारहृदयम् । स्पष्टश्चेदं 'मन्त्रवर्णात्' इत्यंशत्वसाधने अंशाधिकरणे एतन्मन्त्रोदाहरणात् । अंशमात्रे तत्रैतन्मन्त्रस्थपादशब्दव्याख्यानानुरोधेनात्र चरणशब्दं प्रयुंक्ते सूत्रकार इत्येका रीतिः । श्रीतारानाथीये वाचस्पत्ये चरणशब्दार्थवर्णने उक्तम् 'अंशमात्रे, यथा ज्योतिश्चरणाभिधानात् इति' इति । तच्चास्मिन् विषये प्रमाणम् । पुरुषसूक्तस्थमन्त्रोऽयं प्रायेण । तत्र च पुरुषस्य विश्वतो व्यापनरूपं चरणमुक्तम् । तच्चाभिप्रेयते चरणक्रियावाचकेन चरणशब्देन । अन्यच्च स्वारस्यद्वयमस्तीति वयं मनुमहे । पूर्वमन्त्रगतस्य विभूतिद्वयस्यापि ग्रहणमिष्यते चरणशब्देन । त्रिपाद्विभूतेरेकपाद्विभूतेश्च ग्रहणमिष्टम् । पादशब्दस्वरूपम् 'पादोऽस्य विश्वाभूतानि' इत्येकपाद्विभूतावेव दृश्यते । पादशब्दग्रहणे तन्मात्रस्य ब्रह्मपादत्वमुक्तमिति शङ्का स्यात् । मोक्षशास्त्रे त्रिपाद्विभू-

तेरपि ब्रह्मणः पादत्वेन प्रदर्शनमिष्यते सूत्रकारेण । उभयस्याप्यत्र ग्रहणं वर्ण्यते भवद्ग्रन्थेषु । चरणशब्दपठनेन पादरूपार्थग्रहणात् त्रिपादित्युक्तस्यापि ग्रहणं भवेत् । इदमेकं प्रयोजनम् । त्रिपाद्विभूतिस्थमुक्तानामेकपाद्विभूतिस्थानां संसारिणां चाविशेषेण भगवद्दास्यमुपदिदिक्षत्याचार्यः सर्वेषामेव तच्चरणत्ववर्णनेन । 'दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः' इति स्ववचनं स्मरति सूत्रकारः । दासीभूता इति नोक्तमभूततद्भावार्थकं च्विमाश्रित्य । स्वाभाविकं च दास्यं, स्वत इति पदेन च स्पष्टीक्रियते । 'आत्मदास्यं हरेः स्वाम्यं स्वभावं च सदा स्मर' इति च स्वोक्तिः स्मर्यते । अनुचरत्वादन्यद्वैधर्म्यमिति स्पष्टं बोध्यते 'कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते' इति । इदमनुरुध्यैव भगवत्पादैरुक्तं मुक्तावपि तदीयत्वमेव, न तद्भवनमेवेति 'नाथ तवाहम्, न मामकीनस्त्व' मिति । श्रुत्युक्तपादशब्दपठने तत्राभिप्रेतैकदेशमात्रार्थस्य ग्रहणं भवेत् । अनन्तरसूत्रेऽपि श्रुतिस्थगायत्रीशब्दमपठित्वा छन्दःशब्दं प्रयुङ्क्ते सूत्रकारः । तत्राप्यस्ति प्रयोजनं शब्दान्तरप्रयोगे । 'तथा हि दर्शनम्' इति सूत्रखण्डेन छन्दोन्तरभूतविराट्छन्दसो ग्रहणमिष्यते दृष्टान्ते । गायत्रीशब्दपठने 'तथा चेतोऽर्पणनिगमात्' इति तथाशब्देन गायत्रीग्रहणात् तदनन्तरतथाशब्दस्यापि गायत्रीत्वेनेत्यर्थस्य प्रसक्तिः स्यात् । तन्मा भूदिति सामान्यपदग्रहणमिव ।

अत्र भवदुक्तं चरणशब्दप्रयोजनमनूद्य प्रतिवदामः । "यत्सर्वभूतपादेनोन्मितं ब्रह्म ततस्तेषां यच्चरणं संसरणं तद्ब्रह्मण एव अंशेन । सर्वभूतात्मकं सद्ब्रह्मैव संसरतीत्यर्थः इति । तथा च श्रौतः पादशब्दश्चरणत्वेन व्याख्यातः । नह्युन्माने चरणशब्दः प्रयुज्यते लोके । किं तु चरस्य गमनसाधने । एवञ्च चरसामान्यं पादत्वेनोक्तमिति द्योतयितुं चरणाभिधानादित्युक्तमिति वेदितव्यम्" इति भवदुक्तिः । ब्रह्मण एव संसारित्वमत्रोपदिश्यत इति भवतामतिविचित्रं प्रदर्शनम् । पादशब्देन सर्व-

भूतानां ब्रह्मणोंशत्वं प्रतिपाद्यत इति सूत्रकृतः स्पष्टं व्याख्यानमंशाधिकरणे मन्त्रवर्णादिति सूत्रे । ब्रह्मोद्दिश्य तस्य संसारित्वविधानवर्णनं भवदीयां मोक्षशास्त्रकुशलतां सम्यगावेदयति । नित्यमुक्तस्य ब्रह्मणः संसारित्ववर्णनेन तस्य मोक्षप्रदत्वं सम्यक् समर्थ्येत । संसारिणमुद्दिश्य तस्य ब्रह्मापरोक्ष्येण ब्रह्मभावो विधीयत इत्युच्यत इति भवन्मतरहस्यम् । ब्रह्मण एव संसारित्वविधानमत्यत्यन्तविपरीतम् । 'अधिकं तु भेदनिर्देशा'दिति सूत्रकारः संसारिणोऽन्यत्वमधिकत्वं स्पष्टं सिद्धान्तयति ब्रह्मण एव संसार्यभेदप्रसङ्गं निरस्य । 'यत्सर्वज्ञं सर्वशक्ति ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं शारीरादधिकमन्यत्, तद्वयं जगतः स्रष्टृ ब्रूमः । ....न च तस्य ज्ञानप्रतिबन्धः ; शक्तिप्रतिबन्धो वा क्वचिदप्यास्ति, सर्वज्ञत्वात्सर्वशक्तित्वाच्च । शारीरस्त्वनेवंविधः' इति तत्र भाषितं भवद्भाष्ये ॥

यत्र जीवब्रह्मैक्यं साध्यत इति भवन्मतं तस्मिन्नात्मत्वोपासनाधिकरणे भाषितम् 'न हीश्वरस्य संसार्यात्मत्वं प्रतिपाद्यत इत्यभ्युपगच्छामः । किं तर्हि ? संसारिणः संसारित्वापोहेनेश्वरात्मत्वं प्रतिपिपादयिषितम्' इति । आवृत्त्यधिकरणे च भाषितम् 'तत्त्वमसीत्येतद्वाक्यं त्वंपदार्थस्य तत्पदार्थभावमाचष्टे' इति । कामं भाषन्तां भाष्यकाराः । अहं स्वतन्त्रः स्वराट्, मन्मनोरथमनुसृत्य ब्रह्मण एव संसारित्वं वदामीति चेत्—'अधिकं तु भेदनिर्देशात्' 'भेदव्यपदेशाच्चान्यः' 'नेतरोऽनुपपत्तेः' 'अनुपपत्तेस्तु न शारीरः' 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते' 'स्थित्यदनाभ्यां च' 'अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्' 'कर्मकर्तृव्यपदेशाच्च' 'शब्दविशेषात्' इति बहुभिः स्पष्टसूत्रैः सूत्रकारैरेव भवान्निपुणं प्रत्युक्त इति भवन्तं बोधयामः । 'स्वयं तरितुमक्षमः किमितरानसौ तारयेत्' इति वृद्धाः ॥

'वाक्यान्तरगतेन ब्रह्मलिङ्गेन वाक्यान्तरस्य तत्परत्वसाधनेन सन्दिग्धवाक्यगतेन लिङ्गेन विचार्य निर्णीतान्यपि ब्रह्मलिङ्गानि गौणयन्तोऽयोग-

व्यवच्छेदेन पादस्य पणं पणन्तश्च पराकृता भवन्ति' इति भवतां दुर्बोधा अर्थशून्या उक्तिः । 'वाक्यान्तरगतेन ब्रह्मलिङ्गेन वाक्यान्तरस्य ब्रह्मपरत्वं निर्णीतमस्माभिः' इति भवदनुवादो अयथार्थदर्शनैकमूलः । यदि वाक्यान्तरशब्देन ज्योतिर्वाक्यभिन्नतत्पूर्ववाक्यग्रहणमभिप्रेयते तत्समानं मतद्वयेऽपि । अकारणवाक्यस्यात्र सङ्गतत्वमात्रमुक्तं मुण्डकवाक्योदाहरणेन । अधिकरणनिर्णेयार्थो नैव साध्यते मुण्डकवाक्येन । अस्य ज्योतिर्वाक्यस्य ब्रह्मपरत्वं तद्वाक्यबलेन स्वप्नेऽपि नास्माभिः साधितम् । 'स्वप्नो नु माया नु मतिभ्रमो नु' इति भवद्भिर्येऽवश्यवक्तव्यं भवति । 'सन्दिग्धवाक्यगतलिङ्गेन विचार्यं' इति मुण्डकवाक्यस्य सन्दिग्धत्वमभिप्रेयत इव भवद्भिः । नाद्यापि मुण्डकवाक्यं ब्रह्मविषयतया निर्णीतम् । अदृश्यत्वद्युभ्वाद्यधिकरणयोः खलु तस्य ब्रह्मपरत्वं निर्णेष्यत इति भवदाक्षेप इव । मुण्डकवाक्यगतलिङ्गं नोदाहृतमस्माभिर्ज्योतिर्वाक्यस्य ब्रह्मत्वसाधकत्वेन । निरतिशयदीप्तिः कारणत्वव्याप्यत्वं प्रदर्शितं मुण्डकवाक्योदाहरणेन । तच्चाकारणवाक्यविचारस्यास्मिन्नध्याये सङ्गतत्वनिरूपणायैव । तद्वाक्यस्य यद्यपि ब्रह्मपरत्वं नाद्यापि निर्णीतम् ; यत्किमपि वा कारणं भवतु , यन्निरतिशयदीप्तिमत्तत्कारणमिति समन्वयत्वं तत्र दृश्यत एव । तावन्मात्रमेवापेक्ष्यतेऽध्यायसङ्गतिनिरूपणाय । इदं च स्पष्टं श्रुतप्रकाशिकायां निपुणं निरूपितम् "निरतिशयदीप्तिरेव कारणत्वाक्षेपकलिङ्गम् । 'न तत्र सूर्यो भाति, तस्य भासा सर्वमिदं विभाति' इति प्रकरणे तथाक्षरात् संभवतीह विश्वमिति निरतिशयदीप्तियुक्तस्य वस्तुनः कारणत्वश्रवणात् तत्प्रकरणस्य कारणविपयत्वं ह्यविगीतम् । परमात्मविषयत्वे हि विमतिः" इति । भवदाक्षेप एव आशङ्क्य त्रिकालज्ञैस्तैः प्रत्युक्तः ॥

अस्य पादस्य भवन्मतेऽप्ययोगव्यवच्छेदपरत्वमेवेति विस्तरशः प्रतिपादितमस्माभिः । इदमत्रावधेयम् । 'यदतः परो दिवो ज्योतिर्दीप्यते

विश्वतःपृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु' इति वाक्यम् 'यज्ज्योतिरतो दिवो द्युलोकात् परं दीप्यते प्रकाशेत विश्वेषामुपरि । असङ्कुचद्वृत्तिरयं विश्वशब्दोऽनवयवत्वेन संसारमण्डलं ब्रूत इति दर्शयितुमाह — सर्वतः पृष्ठेषूत्तमेषु । न चेदमुत्तममात्रम् ; अपि तु सर्वोत्तममित्याह— अनुत्तमेषु। नास्त्येभ्योऽन्य उत्तम इत्यर्थः' इति भामत्यां व्याख्यातम् । ज्योतिःशब्दवाच्यत्वेन संप्रतिपन्नमत्र सर्वसंसारमण्डलातीतसर्वोपरिभूतसर्वोत्तमलोकेषु दीप्यमानतया श्रुतिप्रसिद्धत्वेनावगम्यते । सर्वसंसारमण्डलादुपरि दिवीति निर्दिष्टो द्युलोको वर्तत इति भामतीव्याख्यानात् स्पष्टम् । 'सर्वस्माद्भूरादिलोकात् सर्वसंसारमण्डलादुपरीत्यर्थः' इति ब्रह्मामृतवर्षिणी । द्युलोकस्य सर्वोत्तमत्वं श्रूयते । दीप्यमानस्य ब्रह्मणो द्युलोकोऽधिकरणत्वेन श्रूयते । अधिकरणत्वश्रुतिरेव प्रत्यभिज्ञाभञ्जकत्वेनोपन्यस्ता पूर्वपक्षे । समाहिता च सूत्रकृता तुरीयसूत्रे अधिकरणत्वार्थेऽपि दिवः पर इति प्रयोगोपपत्तिदर्शनेन । अधिकरणार्थत्वमेवोपपादितं सूत्रकृता स्वसिद्धान्तत्वेन । 'शब्दविशेषाच्च' इति सूत्रन्यायेनाधिकरणाधिकरणिभावो भेदनियतः । 'पूर्ववाक्ये च द्युसम्बन्धि त्रिपाद्ब्रह्म प्रसिद्धम्' इति भामती । दिवस्तत्सम्बन्धिनश्च ब्रह्मणो भेदो नियतः । 'तत्र यच्चतुष्पदो ब्रह्मणस्त्रिपादमृतं द्युसम्बन्धि रूपं निर्दिष्टम् ; तदेवेह द्युसम्बन्धान्निर्दिष्टमिति प्रत्यभिज्ञाप्यते' इति भाषितमप्यत्र स्मर्तव्यम् । 'दिवः परेषु लोकविशेषेषु दीप्यमानत्वमपि कीर्तयति' इति द्युलोकाधिकरणा दीप्तिर्ब्रह्मणः स्पष्टमुक्ता । इत्थं च संसारमण्डलादुपर्यप्राकृतो लोकोऽस्तीति प्रतीयते । न स लोको भवदभिमतः सत्यलोको भवेत् ; तस्य संसारमण्डलान्तर्गतत्वात् । इत्थं चास्मत्सिद्धान्ताभ्युपगतो नित्योऽप्राकृतलोकोऽस्तीति श्रुत्यर्थो निश्चीयते । 'सर्वगतस्यापि ब्रह्मण उपासनार्थः प्रदेशविशेषपरिग्रहो न विरुध्यते' इत्यस्मिन्नधिकरणे भाषितम् । त्रिपाद्विभूतिविशिष्टस्य त्रिपदो ब्रह्मणः फलत्वेना-

नुभाव्यत्वमस्ति । न तस्योपास्यत्वमालम् । उपासनार्थ इति पदेनानुभाव्यतार्थ इति समुच्चेतव्यम् । ब्रह्मणः पुरुषार्थस्वरूपामृतत्वं खलूक्तम् । 'त्रिपादस्यामृतं दिवि' इति । अप्राकृते द्युलोके दीप्यमानममृतं ब्रह्म तत्र निवसद्भिरनुभाव्यम् ॥

अप्राकृतलोकेऽमृतस्य ब्रह्मणो मुक्तानुभाव्यत्ववर्णनप्रकरणे भवन्तस्तस्यैव ब्रह्मणः संसारित्वं प्रतिजानते चरणशब्दार्थत्वेन । अत्र संसारमण्डलादुपर्यनुत्तमलोकेषु खलु ब्रह्मणो दीप्तिरुच्यते । यदि दीप्यमानत्वं ज्योतिषश्चरणक्रिया , तर्हि सा चरणक्रिया अप्राकृतलोकेष्वेव ; न संसारमण्डले । कथमत्र भवदाशाया अवकाशः ? ॥

॥ इन्द्रप्राणाधिकरणम् ॥ (प्रतर्दनाधिकरणम्) ॥

अत्रोपक्रमे 'अनुगमः केषाम् ; यज्जीवविशेषलिङ्गम् , यश्च भूतवाचकः शब्दः ; यच्च तस्यापि लिङ्गम् , यच्च सैद्धान्तिकं ब्रह्मलिङ्गमित्येषाम्' -इति भवदुक्तिः । सूत्रस्थानुगमशब्दस्य विवरणमेवं क्रियत इव भवद्भिः । अत्र भवद्विजृम्भणमत्यन्तमसङ्गतम् , भवन्मतविरुद्धं च । तथा अनुगमात् परमात्मतया अनुगमादित्यसद्व्याख्या । 'तथा परमात्मपरत्वेन प्रकरणस्योपक्रमपरामर्शोपसंहारैरनुगमात्' इति न्यायरक्षामणिव्याख्या ।' वाक्ये पदार्थानां समन्वयो ब्रह्मप्रतिपादनपरतयोपलभ्यते' इति श्रीशङ्करभाष्ये । स्वमतविरुद्धासङ्गतभूयोवर्णनैरेव भवद्ग्रन्थः पूर्यते । "उपासात्रैविध्यात्' इत्युपासात्रैविध्याभ्युपगमादित्युपास्यप्रधानः प्रवर्तिष्यते" इति भवदुक्तिः । तथा च सूत्रकारस्यात्रोपासात्रैविध्यस्य सिद्धान्तनमभिप्रेतमिति भवता अभ्युपगम्यते प्राचीनवृत्तिकारव्याख्यामसद्व्याख्यां चानुरुद्ध्य । अत्रान्त्यसूत्रे "उपासात्रैविध्यात्' इत्युपासात्रैविध्यहेतोरिति , आश्रितत्वादिति प्रकरणान्तरेषूपासात्रैविध्यस्याश्रितत्वात् ; इह तद्योगादितीहापि प्रकरणे तस्य युक्तत्वात्" इत्यर्थवर्णनं स्वरसम् ॥

भवन्मते "उपासात्रैविध्यप्रसङ्गात्' इति प्रथमपदे प्रसङ्गशब्दाध्याहारः । 'आश्रितत्वात्' इत्यस्यान्यत्रापि ब्रह्मलिङ्गवशात्प्राणशब्दस्य ब्रह्मणि वृत्तेः" इत्यर्थवर्णने महान् क्लेशः । उपासात्रैविध्यस्याश्रितत्ववर्णनं स्वरसम् । 'इहापि च हिततमब्रह्मलिङ्गयोगाद्ब्रह्मोपदेश एवायं' इति सूत्रचरमखण्डस्यार्थवर्णनमत्यन्तक्लिष्टम् । एवं निरङ्कुशं स्वातन्त्र्यमेवावलम्ब्यते भवन्मते सूत्राक्षरस्वारस्यं तृणाय मत्वा । प्राचीनो भवदीयवृत्तिकारोऽपि भाष्यकाराभिप्रायपरिपन्थी । भवानपि भवद्भाष्यकारपरिपन्थीति गम्यते , वृत्तिकारोक्तार्थे रुचिप्रकटनेन । एवं भवद्भाष्यकारस्य तत्प्राचीनास्तदर्वाचीनाश्च तन्मतस्था एवात्र परिपन्थिन इत्यापतति ॥

"इन्द्रप्राणादिशब्दिताज्जीवविशेषाद्ब्रह्म पृथक्कर्तुमधिकरणम्'इति वर्णयतां किं समाधानं स्यात् ? इन्द्रस्तथाऽनुगमादिति कुतो नोक्तम् ; सत्यपीन्द्रस्य प्रियं धामोपजगामेति श्रवणे तस्याहङ्कारवादे च" इति भवदुक्तिः । अत्र श्रुतप्रकाशिकोक्तसमाधिर्नावलोकितो भवद्भिः । 'प्राणशब्दस्य परमात्मलिङ्गप्रतिपादकवाक्यस्थत्वेन सिद्धान्तहेतुद्योतकत्वात्सूत्रे प्राणशब्देन धर्मी निर्दिष्टः । न त्विन्द्रशब्देन । इन्द्रशब्दनिर्दिष्टस्य विचारविषयत्वमर्थमिति सूत्रकाराभिप्रायः' इति तत्रोक्तं भवदाक्षेपं प्रतिवदति । अस्मिन् प्रतर्दनवाक्ये यद्यपि 'इन्द्रस्य प्रियं धामोपजगाम' इत्युपक्रमे इन्द्रशब्दो दृश्यते, तस्योपदेष्टृत्वमेव तेन गम्यते । न तत्र तस्योपास्यत्वश्रवणमस्ति । न तमिन्द्रमुपासितुं तत्र यातं प्रतर्दनेन । 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्स्व' इत्युपासनं विधीयते इन्द्रेण । तत्र प्रज्ञात्मत्वेन विशेषितप्राणाभिन्नत्वेन स्वमुपदिश्य तादृशं मामायुरमृतमुपास्स्वेति विधीयते । 'प्राणं मामुपास्स्व' इति स्वस्योपास्यत्वं स्वस्य प्राणत्वनिबन्धनमिति बोध्यते । निगमनवाक्ये 'स एष प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृतः' इत्युपास्यस्य प्राणत्वं प्रज्ञात्वञ्चोच्यते । इत्थञ्चोपासनाविधिवाक्ये, निगमने च प्राणाभिन्नत्वमुपा-

स्यस्य श्रूयते । एवञ्च प्राणत्वसंयुक्तमिन्द्रस्योपास्यत्वं भवेत् । इत्थं प्रधानसंशयबीजमिन्द्रस्य प्राणत्वश्रवणम् । प्राणेनोपक्रमः प्राणेन निगमनम् । तस्य चेन्द्राभेदः । प्राणाभिन्न इन्द्रोऽत्रोपास्य इति पूर्वपक्षः । प्राणशब्दसमानाधिकरणस्य ब्रह्मण उपास्यत्वमिति सिद्धान्तः । प्राणसामानाधिकरण्येनेन्द्रस्य प्रसक्तिः । प्राणशब्दनिर्दिष्टो धर्मी इन्द्रः ब्रह्म वेति विशयः । अतः प्राणशब्देन पक्षनिर्देशः ।'इन्द्रस्तथाऽनुगमात्' इत्युक्ते उपासनविधायकश्रुतिवाक्ये साक्षादुपात्तस्य शब्दस्य सूत्रेऽनुगमो न स्यात् । 'तं माम्' 'प्राणं माम्' इत्युपास्यनिर्देशः । उपास्य इन्द्रो वा, ब्रह्म वेति विचारः प्रदिदर्शयिषितः । मामिति वा , अहमिति वा पक्षनिर्देशो न युक्तः । इन्द्र इति तन्निर्देशे उपासनवाक्यानुपात्तः शब्द एव गृहीतो भवेत् । विषयवाक्यमपि प्रत्यभिजिज्ञापयिषति सूत्रकृत् । प्राणनिर्देशेन विषयवाक्यस्य प्रत्यभिज्ञापनं सुलभम् । प्राणमत्र पक्षीकृत्य तस्येन्द्रत्वब्रह्मत्वविषये विचार इति स्पष्टमनन्तरात् सूत्रात् । इन्द्रो वक्तृत्वेन निर्दिश्यते सूत्रकृता । प्राणो न ब्रह्म ; किन्त्विन्द्र एव । वक्तुरिन्द्रस्यात्मन एवोपास्यत्वोपदेशादिति तत्सूत्रे स्पष्टमुच्यते । तथा तत्सूत्रस्पष्टवचनात्तत्पूर्वसूत्रे उपास्यत्वेन श्रुतः प्राणो नेन्द्रः ; किन्तु ब्रह्मेत्यर्थो विवक्षित इति गम्यते । वक्तुरिन्द्रस्यात्मनोऽधिकस्य परमात्मनः सम्बन्धभूम्नोऽत्र प्रकरणे दृश्यमानत्वाद्ब्रह्मैवोपास्यमिति सिद्धान्तः । आधिक आत्मा अध्यात्मेत्यप्यर्थो ग्राह्योऽध्यात्मशब्दस्य । नेन्द्ररूपात्मा ; किन्तु तदधिकस्तदन्तर्यामी परमात्मा यः 'अधिकं तु' 'अधिकोपदेशात्' 'अध्युपदेशात्' इत्यादिसूत्रेषु जीवाधिकत्वेन सूच्यते । 'अधिराजः' इत्यादावधिको राजेत्येवार्थः । अयमर्थोऽपि प्रदर्शितो ऽस्मद्ग्रन्थेषु । तृतीयं सूत्रं वक्तुरात्मोपदेशस्योपपत्तिसमर्थकम् ॥

अन्तरधिकरणेनास्य गतार्थतोक्तेर्न काऽपि युक्तिः प्रदर्शिता भवद्भिः । केवलं शपथमात्रं क्रियते वृथा शपथकुशलैः ॥

आनन्दमयवाक्येन विशेषणवाक्यसमन्वयोपक्रमः । 'आनन्दोऽजरोऽमृतः' इत्यानन्दत्वबोधकवाक्येनोपसंहारः । पर्यङ्कविद्ययोपसंहारः । 'कोह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्' इत्यानन्दमयवाक्ये आनन्दरूपब्रह्मणो विश्वप्राणयितृत्वमुक्तम् । अत्राप्युपसंहारे प्राणानन्दयोः सहपठनं प्रदर्श्यते ।

चतुःसूत्रीक्रमविषयेऽस्मद्भाष्यप्रदर्शिता प्रणालिका भवद्भिराक्षिप्ता । भवन्मते संक्षेपशरिरककृतस्तद्व्याख्यातारः श्रीमन्मधुसूदनाश्च सूत्रपाठक्रमस्यासाङ्गत्यं निश्चित्य शास्त्रयोनित्वसूत्रं समन्वयसूत्रादनन्तरं पठनीयमिति वदन्ति । पाठक्रमस्यासाङ्गत्ये अर्थक्रमेण तद्बाध इति न्यायमुदाहृत्य सूत्रक्रमं स्पष्टं वाचन्ते । 'अत्रार्थक्रमस्य पाठक्रमाद्बलवत्त्वात्तृतीयचतुर्थसूत्रयोर्व्यत्यासो द्रष्टव्यः' इति मधुसूदनसरस्वत्यः । का प्रत्याशा भवतां सूत्रानुगुण्यान्वेषणे ॥

'कर्मणि पूर्वभागस्य न समन्वयः' इति भवदुक्तिः । 'जैमिन्यादिभिर्हि कर्मकाण्डमेव स्वार्थसमन्वितं कृतम् । उपनिषदः स्वार्थात्प्रच्याविताः । कैश्चिच्च भेदविलयवादिभिरुपनिषदः स्वार्थसमन्विताः कृताः कर्मकाण्डन्तु स्वार्थात् प्रच्यावितम् । ....श्रीमद्भगवत्पूज्यपादैस्तु व्यावहारिकत्वेन कर्मकाण्डप्रामाण्यप्रवृत्त्यादि व्यवस्थाप्य वेदान्तानां तात्त्विकशुद्धाद्वैतपरत्वं व्यवस्थापितमिति स्वार्थसमान्वितत्वं कृत्स्नवेदस्य संपन्नम्' इति संक्षेपशारीरकव्याख्योक्तिर्भवदुक्तिं व्याहन्ति ।

'स्वेच्छातः सर्वहेतुः शुभगुणविभवानन्तनिःसीमहर्षः
शुद्धाक्रमोत्थदिव्याकृतिरनुपधिकाकाशनादिस्वभावः ।
समागमाप्राणभेदव्यतिभिदुरजगत्प्राणनो दिव्यदीप्तिः
प्राणेन्द्राद्यन्तरात्मा प्रभुरधिकरणैः सप्तभिः प्रत्यपादि ॥'

इत्यधिकरणसमावल्यां सप्तसूत्र्यां ब्रह्मणि कल्याणगुणादिसमन्वयः प्रदर्शितः ।

श्रीरङ्गिणः श्रीमदपर्यासामृतस्य चानुभावकेन संक्षेपशारीरकान्तिमश्लोकेनै-तत्पादमुपसंहरामः ।

भुजङ्गमाङ्गशायिने विहङ्गमाङ्गगामिने ।
तुरङ्गमाङ्गभेदिने नमो रथाङ्गधारिणे ॥

तृतीयपादेन भगवत्परत्वप्रबोधककेशवनाम स्मर्यते । 'न दैवं केशवात् परम्' इति खलु प्रतिजज्ञे पाराशर्येण शारीरकप्रणेत्रा ।

इति सूत्रानुगुण्यसिद्धिविमर्शे
प्रथमः पादः ।

शुभं भूयात् ॥